निजाऽऽत्मैव परब्रह्म, विज्ञाय स्वाऽऽत्मसंस्थितः
शुद्धोपयोगतः सत्यां, भावय ब्रह्मभावनाम् ॥२०६॥

स्थिरदीपकवद्ध्यान, मात्मनः स्याद्यदातदा;
आत्माप्रकाशते साक्षात्–स्वस्मिन्स्वानुभवः स्वतः

बाह्यतः कर्मकुर्वन्स, ज्ञाऽऽत्मानं हृदि चिन्तय;
स्वयंस्वस्मिन्परीणामी, भव शुद्धाऽऽत्मभावतः॥२०८॥

बाह्यदृश्येषुनैवाऽस्ति, किञ्चिदपिनिजाऽऽत्मनः
अतोबाह्येषुनोकुर्या, मत्तद्वृत्तिंतु मोहतः ॥२०९॥

जडपदार्थविज्ञानं, कृत्वास्वाऽऽत्मोपयोगिनीम्,
प्रवृत्तिमाचर त्वं ता, मात्मप्रगतिहेतवे ॥ २१० ॥

प्रतिबन्धो न सर्वत्र, सर्वकर्मसु धर्मिणाम्;
प्रवृत्तिषुनिषेधेषु, निर्बन्धाः साधवः सदा ॥ २११ ॥

शुद्धोपयोगतः सन्तो, मुक्ता धार्मिकबन्धनैः
तथाऽपिबन्धनाचारै, र्वर्तन्ते तेयथातथा ॥ २१२ ॥

व्रताचारेषु नैयत्यं, नोगुणानां निजाऽऽत्मनः
वेषव्रतक्रियाद्यैस्तु, भिन्ना आत्मगुणाःसदा ॥२१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकान्तेन निमित्तत्त्वं, नैव वेषक्रियादिषु,
आत्मनः शुद्धयेज्ञेया, श्चैकान्तात्सात्त्विकागुणाः ॥२१४
सर्वनिमित्तहेतूनां, निमित्तत्त्वमपेक्षया,
सम्यग्दृशाभवत्येव, द्रव्यं भावस्यकारणम् ॥ १५॥
शुद्धोपयोगिनांनृणां, सर्वनिमित्तहेतवः
ग्राह्यास्त्याज्याश्च सापेक्षो–,पयोगत्वविवेकतः॥२१६॥
ग्राह्यास्तेऽपिचहेयाःस्युर्हेयाःस्युर्ग्राह्यरूपिणः
देशकालदशाद्यैश्च, निमित्तानां च हेतुता ॥२१७॥
अतःस्याद्वादबोधेन, धर्मकर्मप्रवृत्तिषु।
शुद्धोपयोगिनोलोका, वर्तन्ते च यथातथम् ॥२१८॥
शुद्धप्रेमदयादान–भक्तिसेवाप्रवृत्तिभिः
सात्त्विकैः सद्गुणैस्सन्तो, वर्तन्ते च यथातथम्॥२१९॥
असंख्यातनिमित्तानां, हेतुता स्वोपयोगिनाम्;
एकैकयोगतोजीवा, अनन्ता मुक्तिसंश्रिताः ॥२२०॥
शुद्धोपयोगिनां सर्वं, विश्वमाऽऽत्मविशुद्धये;
आस्रवाअपिमुक्त्यर्थं, परिणमन्तिभावतः ॥२२१॥
उत्तरोत्तरहेतूनां, हेयोपादेयताभवेत्;
नृणां नानाप्रभेदत्वं, हेतूनांचपरस्परम् ॥२२२॥
शुद्धोपयोगिनां यत्तद्, कर्तुंयुज्येत वा न तद्,
अयोग्यंयच्चयोग्यंतद्, जानन्ति ते विवेकतः ॥२२३॥
शुद्धोपयोगिनां सर्वं, स्वाऽन्योपकृतिहेतवे;
स्वल्पदोषमहाधर्म–, हेतवेचयथातथम् ॥ २२४ ॥
ज्ञानानन्दमयंपूर्ण, मात्मानं हृदिचिन्तय;
स्वाभाविकविवेकस्तु, ततःसंजायते स्वयम् ॥२२५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावनायाःप्रवाहस्य, सन्तत्याबलमाऽऽत्मनः
प्रादुर्भवतिनूनंतद्, पूर्णमैश्वर्यकारकम् ॥ २२६ ॥
औपशमिकभावेन, क्षायोपशमिकत्वतः
क्षायिकभावसंजन्या, ज्ञानाद्याआत्मनोगुणाः॥२२७॥
क्षायोपशमिकत्वेन, सात्त्विकाश्चाऽऽत्मसद्गुणाः
प्रादुर्भवन्ति गीतार्थो, जानन्ति सूत्रबोधतः ॥२२८॥
क्षयोपशमभावीय–, ज्ञानानन्दादिसद्गुणाः
आत्मन्येवसमुद्भूता, अनुभूताश्च सात्त्विकाः॥२२९॥
क्षयोपशमभावस्य, स्थिरत्वं न सदाभवेत्;
क्षायिकभावमासाद्य, स्थिरा आत्मगुणाः सदा॥२३०॥
मयाक्षायिकभावेन, प्राप्ता नो स्वाऽऽत्म सद्गुणाः
अनुभवोऽप्यपर्यन्त, मेवं शास्त्रादितस्तथा ॥२३१॥
तथाऽपिस्वाऽऽत्मशुद्ध्यार्थं, क्षयोपशमभावतः
ज्ञानसंयमयोगाना, मभ्यासः क्रियतेऽधुना ॥२३२॥
शुद्धाऽऽत्मरमणाऽभ्यासाज्ज्ञानध्यानोपयोगतः
क्षायिककेवलज्ञानं, प्राप्स्येऽहंभाविजन्मनि ॥२३३॥
क्षयोपशमजन्या ये, गुणास्तेक्षायिकान्प्रति;
आन्तराहेतवोनूनं, वीर्योत्साहप्रवाहतः ॥२३४॥
क्षयोपशमभावस्य, स्युर्येनिमित्तहेतवः
आलम्ब्याहेतवस्तेभ्यो जायन्ते स्वाऽऽत्मसद्गुणाः २३५
शुद्धाऽऽत्मजीवनं लक्ष्यं, कृत्वाजीवन्तिपुद्गलैः
आत्मजीवनलाभार्थं, जीवन्ति ते वपुःस्थिताः ॥२३६॥
शुद्धाऽऽत्मजीवनंलक्ष्यं, नास्तियेषांहृदिस्फुटम् ॥
जीवन्तोऽपिनजीवन्ति, पुद्गलैर्ज्ञानमन्तरा ॥२३७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीवन्तोऽपिमृतास्तेस्यु, ब्रह्मजीवनमन्तरा;
शुद्धाऽऽत्मप्रेमबोधाद्यैः प्राणनाशेऽपिजीविनः॥२३८॥
संकीर्णदृष्टिमन्तोये, देशकालाद्युपाधिभिः
परब्रह्म न संयान्ति, जडव्यामोहधारकाः ॥ २३९ ॥
मत्तद्बुद्धिविनासन्तो, मत्तद्भावोपचारिणः
व्यवहारात्प्रवर्तन्ते, यथायोग्यस्वकर्मसु ॥ २४० ॥
कषायाणांनिमित्तेभ्यो, येषांमोहोनजायते ॥
तेषांमोहनिमित्तानां, संगेऽपिनैवदोषता ॥ २४१ ॥
मोहनिमित्तसंस्थोऽपि, निर्मोहीचोपयोगतः
ईदृज्ज्ञानी भवेन्मुक्तो भोग्यपिभोगवर्जितः ॥२४२॥
स्थूलभद्रादिकल्पाना, माऽऽत्मशुद्धोपयोगिनाम्;
सर्वदासर्वथाब्रह्म, पूर्णं हृदि प्रकाशते ॥ २४३ ॥
कामरसो न भोगेषु, यस्य ब्रह्मरसोद्भवः
कामोत्पादकसङ्गोऽपि, तस्यनिष्कामकारणम् ॥२४४॥
अनुभूय निजाऽऽत्मानं, पूर्णानन्दमयंप्रभुम् ।
बहिरन्तश्चसर्वत्र, पूर्णानन्दमयोभव ॥२४५॥
शब्दरूपरसस्पर्श–गन्धेषु साम्यभावतः
प्रारब्धेन प्रवृत्तिःस्या–त्तदाब्रह्मरसोद्भवः ॥२४६॥
क्षयोपशमभावेतु, स्वाऽऽत्मानन्दः प्रजायते;
वेदनीयविपाकेन, सुखं दुःखं च वर्तते ॥ २४७ ॥
केवलिनां सुखं दुःखं, वेदनीयविपाकतः
पूर्णानन्देसमुत्पन्ने, सतितद्यपिजायते ॥ २४८ ॥
क्षयोपशमभावीय–, ज्ञानध्यानोपयोगतः
आत्मानन्दस्तथादुःखं, सुखं च वेद्यते मया ॥२४९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाताऽशातोदयाच्छर्म, दुःखंचाऽऽत्मोपयोगिनाम् ।
आत्मानन्दरसास्वाद, श्चैवं स्वानुभवोहृदि ॥२५०॥

शातोदयेसमुत्पन्ने, सुखे चाऽऽत्मोपयोगिनाम्;
बाह्यसुखे न रागःस्याद्, ब्रह्मानन्दस्यभोगतः ॥२५१॥

पूर्णब्रह्मनिमग्नोऽस्मि, पूर्णब्रह्मस्वरूपतः
पुद्गलैःपुद्गलास्तृप्तिं,यान्तिस्वाऽऽत्मानिजाऽऽत्मना२५२

आत्मनः सत्यतृप्तिस्तु, स्वाऽऽत्मानन्देन जायते;
आत्मानन्दरसावाप्तेः पुद्गलेच्छा विनश्यति ॥२५३॥

क्षयोपशमभावीय–, ज्ञानचारित्रयोगतः
आत्मन्येव सुखाम्भोधिः स्वयंस्वेनाऽनुभूयते ॥२५४॥

क्षणिकं हृदि विज्ञाय, सर्वं वैषयिकं सुखम्;
आत्मानन्दस्यभोगार्थं, मात्मन्येव स्थिरोभव ॥२५५॥

अनन्तगुणपर्याय, शक्तिरूपं सनातनम्;
देहस्थं तं विजानीया, देहाध्यासं भृशं त्यज ॥२५६॥

मा मुह्य जडभोगेषु, किञ्चिचाऽपि ततः सुखम्;
न स्यात्परन्तु दुःखानां, प्राप्तिः पश्चात्समुद्भवेत्॥२५७

भोगाद् रोगादिदुःखानां, पारम्पर्यं प्रजायते;
भोगे रोगभयोत्पादो, देहनाशोऽल्पसौख्यता ॥२५८॥

जायते च महादुःखं, विश्रान्तिरपि नोद्भवेत्
भोगजन्यसुखं दुःख, मेवजानीहि निश्चयात् ॥२५९॥

भुक्ता अनादितो भोगाः प्रत्युत दुःखदाः सदा ।
ज्ञात्वैवंकामभोगांस्त्वं, त्यजाऽऽत्मसुखनिश्चयात्॥२६०॥

जन्ममृत्यु जरादुःखं, व्याधिदुःखं पुन भृंशम्;
आधिजं सर्वं सम्बन्ध–जन्यं दुःखमुपाधिकम्॥ २६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नास्तिशर्मच पुत्राद्यै, र्लक्ष्मीदारादिभिर्नच;
यशोविद्यादिभिर्नास्ति, किञ्चिन्न बाह्यवस्तुभिः ॥२६२॥

मैथुनेन सुखंनाऽस्ति, प्रत्युत दुःखकृद् भवेत्;
मनोवाक्काययोगेन, ब्रह्माराधनतः सुखम् ॥ २६३ ॥

भ्रमतां बाह्यसौख्यार्थं, सर्वत्र चक्रवर्तिनाम्;
मिलिता सत्यशान्तिर्नो, सत्यशान्तिर्निजाऽऽत्मनि॥२६४॥

वैषयिकस्य शर्माशा–, सागरोऽस्ति भयङ्करः
तत्पारंकोऽपि न प्राप्तः पारं यास्यसि नो ध्रुवम् ॥२६५॥

जडानन्दाप्तये यद्यत् , कल्प्यते तत्तु दुःखकृत्;
जायतेऽनुभवं प्राप्य, तत्रकिं परिमुह्यसि ॥ २६६ ॥

यशःसन्मानकीर्त्यर्थं, नामरूपप्रमोहतः
कृतं यत्तन्न शान्त्यर्थं, स्यात्प्रत्युतच दुःखकृत् ॥२६७॥

बाह्यानन्दाय यद्यच्च, क्रियते तत्त दुःखकृत्;
जायते मोहिनां नृणां, नच ब्रह्मसुखैषिणाम्; ॥२६८॥

कोटिकोटिमहोपायै, र्नित्यानन्दो न बाह्यतः
आत्मन्येव सुखं सत्यं, बाह्ये त्वं मा परिभ्रम ॥२६९॥

विद्यया न सुखं सत्यं, नच शान्तिरविद्यया;
शास्त्रेभ्यो न सुखं शान्ति, र्विवादाच्च न जायते ॥२७०॥

सत्त्वरजस्तमोजन्यं, सुखं तु नैव तात्त्विकम्;
सत्त्वादिप्रकृतेर्भिन्न, मात्मसुखं प्रवेदय ॥ २७१ ॥

शुभाऽशुभमनोवृत्ति–लयेनैव प्रकाश्यते;
निर्विकल्पं सुखं सत्य, मात्मनःस्वनुभूयते ॥ २७२ ॥

अन्तर्बहिश्च सर्वत्र, सुखमाऽऽत्मोपयोगिनाम्;
सर्वथा सर्वदा नित्य, मस्ति भोगाभिमन्तरा ॥२७३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामभोगादितोजातं, सुखं स्वप्नोपमं मतम्;
तत्रनो मुह्यति ज्ञानी, शुद्धोपयोगशक्तितः ॥ २७४ ॥

काम्यस्पर्शेषु मामुह्य, रूयादिरूपेषुमुह्य मा;
जडत्वं स्पर्शरूपेषु, तेभ्यः शर्म न जायते ॥ २७५ ॥

सुखत्वं न जडेष्वेव, तेभ्यः शर्म कथं भवेत्?
आत्मोपयागतोज्ञात्वा, ज्ञानी तत्र न मुह्यति ॥ २७६ ॥

आत्मायत्तं मनः स्याच्चे-दिन्द्रियाणि तथाऽऽत्मनः
वश्यानि तर्हि साधूना, मत्रैवमुक्तिसिद्धयः ॥ २७७ ॥

रागद्वेषविनिर्मुक्तं, सर्वसंकल्पवर्जितम्;
आत्मायत्तं मनः स्याच्चेन्, मुक्तिरत्रानुभूयते ॥२७८॥

अहंत्वंतद्विनिर्मुक्तं, लिंगाध्यासविवर्जितम्;
मनः शुद्धोपयोगेन, भवेत् तत्र न संशयः ॥ २७९ ॥

लोकसंज्ञादिभिर्मुक्ता, अवधूताः सुखैषिणः
उन्मत्ता इव संसारे, वर्तन्ते ब्रह्मदर्शिनः ॥ २८० ॥

आत्मशर्मनिमग्नानां, वेषाचारमतादिषु;
बन्धनंनैवचोन्मत्त, इव सर्वत्र वर्तनम् ॥ २८१ ॥

केषांचित्तु भवेदेवं, नानाशुद्धोपयोगिनाम्;
जानाति ज्ञानिनं ज्ञानी, गुप्तं व्यक्तस्वबोधतः ॥२८२॥

लोकाचारविचारेण, विरुद्धा इव वर्तिनः
ब्रह्ममग्ना महासन्तो, ज्ञायन्ते ब्रह्मदर्शिभिः ॥२८३॥

बाह्यवेषादिभिः सन्तो, ज्ञायन्ते न कदाचन;
उन्मत्ता आत्ममग्नास्ते, ज्ञायन्ते च स्वबोधतः ॥ २८४ ॥

आत्मोन्मत्तावधूतानां, हृदि शुद्धेश्वरो महान्;
आविर्भूतोऽस्ति विज्ञाय, तेषां भक्तौ रतोभव ॥ २८५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वेषरागादिभिर्मुक्ताः शुद्धाऽऽत्मानो महर्षयः
वीतरागा जिनाः शुद्धा, ईश्वरा देहसंस्थिताः ॥ २८६ ॥
सत्त्वप्रकृतिसंयुक्ता, ईश्वरा ब्रह्मरूपिणः
एतैः प्रबोधितो धर्मो, जैनधर्मोऽस्ति शाश्वतः ॥ २८७ ॥
सर्वज्ञा वीतरागा ये, तैर्हि विश्वस्थदेहिनाम्;
मुक्त्यर्थं स्थापितो धर्मो,–जैनधर्मः स उच्यते ॥ २८८ ॥
त्यागिनां च गृहस्थानां, स्वाधिकाराद् द्विधाशुभः
गृहस्थैस्त्यागिभिः सेव्यो, जैनधर्मः स्वमुक्तये ॥ २८९ ॥
अन्यधर्मेषु सत्यं यत्, सापेक्षनयबोधतः
तत् सापेक्षतया ग्राह्यं, गीतार्थगुरुनिश्रया ॥ २८७ ॥
शुद्धोपयोगिनां सर्वं,–जगत् सम्यग्दृशां सदा,
आत्मानन्दस्य हेत्वर्थं, सर्वं सम्यक्तया स्थितम् ॥२८८॥
निश्चयाद् व्यवहाराद्यो, जैनधर्मो द्विधा सदा;
व्यवहारो न मोक्तव्यो, निश्चयदृष्टिधारिभिः ॥२८९॥
व्यवहारनयोच्छेदा, ज्जैनधर्मक्षयो भवेत्;
संघतीर्थक्षयश्चेति, सर्वार्हद्भिः प्रभाषितम् ॥२९०॥
शुद्धोपयोगलाभार्थं, व्यवहारस्य हेतुता;
आत्मनो निश्चयोधर्मः शुद्धोपयोग आत्मनि ॥२९१॥
आत्मन्येवाऽऽत्मनो धर्मः शुद्धोपयोग इष्यते;
शुद्धोपयोगिनां सर्वं, विश्वमानन्दहेतवे ॥ २९२ ॥
आत्मानन्दोपयोगार्थं, निमित्तं च जगद्भवेद्;
ज्ञानेज्ञेयं जगत्सर्वं, सुखाय स्वोपयोगिनाम् ॥२९३॥
बाह्यमह्यां सुखंनास्ति, तद्यपि शर्महेतवे;
ज्ञाने ज्ञेयतया भाति, ज्ञानात्सुखं निजात्मनि ॥२९४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाह्यान्तरं जगत्सर्वं, शुद्धब्रह्मोपयोगिनाम्;
ब्रह्मानन्दप्रदं भूयात्, मूढानां दुःखहेतवे ॥ २९५ ॥

सर्वविश्वस्थलोकानां, भक्तिरन्नादिदानतः
कर्तव्या सर्वसाधूनां, यथाशक्ति यदा तदा ॥ २९६ ॥

आत्मशुद्धोपयोगार्थं, सेवाभक्तिप्रसाधनम्;
दयादानादिभिःसेवा, कर्तव्या देहिनां सदा ॥ २९७ ॥

आत्मोपयोगिनां किञ्चित्, कर्तव्यं नावतिष्ठते;
मुक्त्यर्थं च तथा कर्म, कुर्वन्ति व्यवहारतः ॥ २९८ ॥

मनोवाक्काययोगाना, मुपयोगं सुयोगिनः
उपकाराय कुर्वन्ति, शुद्धोपयोगजीविनः ॥ २९९ ॥

उपग्रहोऽस्ति सर्वत्र, जीवानां च परस्परम्;
उपग्रहप्रवृत्तिस्तु, जीवन्मुक्तसयोगिनाम् ॥ ३०० ॥

सत्कर्म देहपर्यन्तं, कुर्वन्ति वीतरागिणः
अत आदेहमर्हन्तो, विश्वजीवोपकारिणः ॥ ३०१ ॥

अर्हतां मार्गमालम्ब्य, संप्रति ज्ञानयोगिनः
यद्योग्यं तत्प्रकुर्वन्ति, कर्म स्वपरशर्मदम् ॥ ३०२ ॥

धर्मजातिक्रियावर्ण-, देशभेदाद्युपाधितः
निर्मोहत्वं समाश्रित्य, प्रवर्तन्ते मुनीश्वराः ॥ ३०३ ॥

अन्धश्रद्धात्वयातानां, विरुद्धभिन्नधर्मिणाम्;
उपकाराय वर्तन्ते, जैनाः शुद्धोपयोगिनः ॥ ३०४ ॥

स्वोपयोगेन धर्मोऽस्ति, बन्धोऽस्ति मोहभावतः
कर्मबन्धः कषायेन, मुक्तिः साम्येन देहिनाम् ॥ ३०५ ॥

रागद्वेषपरीणाम, एव संसारकारणम्;
रागद्वेषारिहन्तॄणां,-मोक्ष एव करस्थितः ॥ ३०६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मशुद्धिर्भवेन्नैव, रागद्वेषक्षयं विना;
ईश्वरः सपरब्रह्म, रागद्वेषक्षयङ्करः ॥ ३०७ ॥

आत्मशुद्धोपयोगेन, रागद्वेषारिसंक्षयः
जीवः स्वयं सशुद्धाऽऽत्मा, वीतरागो जिनः शिवः॥३०८॥

सर्वविश्वस्वरूपोऽस्ति, स्वाऽऽत्मा स्वपरपर्ययैः
पूर्णानन्दमयं ब्रह्म, स्वाऽऽत्मानं प्रेमतः स्मर ॥३०९॥

आत्मनो दर्शनेनैव, सर्वतीर्थादिदर्शनम्;
जायते सर्वतीर्थानां, यात्राच धर्मकर्म वै ॥३१०॥

आत्माऽहं व्यापको भिन्नः, सर्वपुद्गलपर्ययैः
मनोऽसंख्यविचारेभ्यः, पृथक् शुद्धाऽऽत्मब्रह्मराट् ॥३११॥

मनोमतोद्भवै धर्मै, र्योद्धव्यं न जनैः सह;
मनोमतोद्भवद्धर्मा-, ऽधीना मोहमनीषिणः ॥३१२॥

रागद्वेषमयैः सर्वै र्मनोवृत्त्युद्भवैर्मतैः
व्याप्तं जगदतो ज्ञानी, सापेक्षदृष्टिधारकः ॥३१३॥

मनोमतैर्विभिन्नाःस्यु, रात्मशुद्धोपयोगिनः
आत्मज्ञाननयैः सर्वै, र्मनोमतविचारिणः ॥३१४॥

मनोमतोद्भवाः सर्वे, धर्माःस्युरात्मवेदिनाम्;
सापेक्षदृष्टितः सत्य-, धर्माय साम्ययोगिनाम् ॥३१५॥

मनोमतविभिन्नानां, नृणामसंख्यधर्मिणाम्;
आत्मधर्मस्य लाभार्थं, देयं स्याद्वादशिक्षणम् ॥३१६॥

रागद्वेषक्षयेनैव, शुद्धज्ञानं प्रकाशते,
शुद्धाऽऽत्मज्ञानतः सम्यग्-सत्यतत्त्वं प्रकाशते ॥३१७॥

अध्यात्मपरिभाषायां, रागद्वेषमयं मनः
कथ्यतेऽध्यात्मसामान्य-, ज्ञानिभि र्व्यवहारतः ॥३१८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वज्ञै द्रव्यभावाभ्यां, प्रज्ञप्तं द्विविधं मनः
पौद्गलिकं मनोद्रव्यं, संज्ञिनां वर्तते ध्रुवम् ॥३१९॥

मतिश्रुतविचाराणां, मनस्त्वं भावतः स्मृतम्;
द्विविधं तु मनोज्ञेयं, तत्त्वज्ञानविवेकतः ॥३२०॥

शुद्धप्रेमपरीणाम,-साम्यज्ञानसुभक्तितः
सर्वदर्शनलोकानां, मुक्तिराऽऽत्मनि निश्चिता ॥३२१॥

सर्वदेहस्थजीवाना, मात्मवद्दर्शनं यदा;
वर्तनं च भवेत्सत्यं, तदा मुक्तिस्तनौस्थिते ॥३२२॥

शुद्धप्रेममयी भक्ति, र्यदा संजायते हृदि।
तदाऽऽत्माहि परब्रह्म, स्वाऽऽत्मना दृश्यते स्वयम् ॥३२३॥

आत्मनो व्यापकप्रेम, यदा सँज्ञायते तदा।
सर्वविश्वस्य सेवास्या, दात्मवद् दर्शनं भवेद् ॥३२४॥

लज्जाभेदश्च खेदश्च, लोकसंज्ञादिवृत्तयः
भेदो न विद्यते भक्तौ, सेवायां च सदाऽऽत्मनाम् ॥३२५॥

ऐक्यरूपं जगत्सर्वं, महत्त्वंभेदनिर्गतम्;
शुद्धप्रेम्णा प्रकाशेत, पराभक्तिजुषां सदा ॥३२६॥

शुद्धोपयोगिनः सन्तो, व्यापकाः सर्वदेशिनः
असंख्यधर्मभेदानां, सापेक्षज्ञानधारकाः ॥३२७॥

पराभक्त्या प्रकाशेत, स्वाऽऽत्मन्येव प्रभुः स्वयम्;
पराभक्तिमयाः सन्तः, सर्वविश्वोपकारिणः ॥३२८॥

सेवाभक्त्यादयः सर्वे, योगाः शुद्धोपयोगिनाम्;
विश्वपरोपकाराय, सम्भवन्ति स्वभावतः ॥३२९॥

समत्वेन प्रभोः प्राप्तिः सर्वदर्शनधर्मिणाम्;
स्याद्वादज्ञानतः प्राप्यः समयोगो महात्मभिः ॥३३०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्तिः साम्यंविनानैव, सर्वदर्शनधर्मिणाम्;
साम्यं विना प्रभोः प्राप्ति, र्नास्ति शुद्धाऽऽत्मनः खलु॥३३१॥

साम्यमेव सतां धर्मः, सात्त्विकप्रकृतेः परः
साम्योपयोगतो मुक्ति, र्जीवन्मुक्तमहात्मनाम् ॥३३२॥

साम्योपयोगमालम्ब्य, याता यास्यन्ति यान्ति च;
अनन्तदेहिनो मुक्तिं, तत्र कश्चिन्न संशयः ॥३३३॥

सेवाभक्त्यादियोगेभ्यः श्रेष्ठोऽनन्तगुणो महान्;
समो योगः स्वभावेन, समासेव्यो महात्मभिः ॥३३४॥

समो यस्सर्वभूतेषु, सर्वजातीयधर्मिषु;
समो यः शत्रुमित्रेषु, शुभाऽशुभेषु कर्मसु ॥३३५॥

शुभाऽशुभविपाकेषु, यः समः साक्षिभाववान्;
क्षणमात्रमपि व्यक्तः स्यात् सः शुद्धोपयोगवान् ॥३३६॥

एकक्षणिकशुद्धोय, उपयोगो यदा भवेत्;
तदाऽनन्तभवैर्बद्धं, कर्म नश्यति तत्क्षणात् ॥३३७॥

अन्तर्मुहूर्तकालीन, शुद्धोपयोगशक्तितः
जायते केवलज्ञान, मात्मनि सत्यनिश्चयः ॥३३८॥

समः सर्वत उत्कृष्टः शुद्धोपयोग इष्यते;
बहिरन्तः परब्रह्म, भासते ब्रह्मयोगिनाम् ॥३३९॥

मनोवाक्काययोगानां, व्यापारकारकाश्चते;
प्रारब्धाऽघातिकर्माणः सर्वत्र समसाक्षिणः ॥३४०॥

असंख्यभेदतो ज्ञेयः क्षयोपशमभाववान्;
शुद्धोपयोग आऽऽत्मैव, भव्यजीवेषु सम्प्रति ॥३४१॥

ज्ञानदर्शनचारित्र-परीणाममयः शुभः
क्षायोपशमिको व्यक्तः शुद्धयोगोऽप्रमादिनाम् ॥३४२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



औत्सर्गिकापवादाभ्यां, क्रियमाणेषु कर्मसु;
प्रभोः स्मृतिप्रवाहोय-उपयोगः स इष्यते ॥३४३॥

शुद्धाऽऽत्मसंस्मृते र्धारा, वर्तते या प्रतिक्षणम्;
शुद्धोपयोग इष्यःस, आत्मशुद्धिप्रदो महान् ॥३४४॥

सर्वकर्मविनाशार्थं, पूर्णं शुद्धाऽऽत्मसंस्मृतिः
धार्या प्रतिक्षणं कर्म-, कुर्वद्भिः कर्मयोगिभिः ॥३४५॥

शुद्धाऽऽत्मश्रीमहावीर, स्मृति र्भृशं सुरागतः
उपयोगः प्रविज्ञेयो, हृदि धार्यो विवेकिभिः ॥३४६॥

आत्माऽऽहं सच्चिदानन्दो, गुणपर्यायभाजनम्,
इत्येवं या स्मृतिः सैव, शुद्धोपयोग इष्यते ॥३४७॥

क्रियमाणेषु कार्येषु, प्रतिक्षणं प्रभोः स्मृतिः
सोपयोगोऽस्ति विज्ञेय, स्ततो मोहो न जायते ॥३४८॥

धर्म्ययुद्धादिकार्येषु, प्रवृत्ताः स्वाधिकारतः
शुद्धोपयोगिनो भव्याः, कुर्वन्ति कर्मनिर्जराम् ॥३४९॥

त्यागिनश्च गृहस्थाये, स्वाधिकारप्रवर्तकाः
शुद्धोपयोगतो मुक्तिं, यान्ति तत्र न संशयः ॥३५०॥

क्षणमात्रमपि प्राप्त, उपयोगं य एकशः
मुक्तिमवश्यं सो याति, सम्यग्दृष्टिः स्वभावतः ॥३५१॥

परस्परविरुद्धानां, वेषाचारादिकर्मणाम्;
सापेक्षया निमित्तत्व, मात्मोपयोगिनां भवेत् ॥३५२॥

परस्परविरुद्धत्वं, धर्मनिमित्तकर्मसु;
मिथ्यादृशां भवेदेव, मिथ्यात्वमोहवर्धकम् ॥३५३॥

असंख्यधर्महेतूनां, भिन्नानां स्वाधिकारतः
आत्मोपयोगहेतुत्वं, ज्ञायते ज्ञानिभिः सदा ॥३५४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुलक्ष्य निजाऽऽत्मानं, वर्तन्ते योग्यहेतुभिः
अविरोधो विरुद्धेषु-, हेतुषु ब्रह्मवेदिनाम् ॥३५५॥

परस्परविभिन्नेषु, बाह्येषु धर्महेतुषु;
व्रतक्रियाणां सापेक्ष-हेतुत्वमुपयोगिनाम् ॥३५६॥

मनोवाक्कायसंशुद्ध्या, सात्त्विकान्नादिना तथा;
सात्त्विकबुद्धियोगेन, शुद्धब्रह्म प्रकाशते ॥३५७॥

उपादाननिमित्ता ये, शुद्धोपयोगहेतवः
स्वाधिकारेण संसेव्या, गीतार्थगुरुनिश्रया ॥३५८॥

श्रीचतुर्थगुणस्थान, मारभ्य स्वोपयोगताम्;
आप्नुवन्ति जना ब्रह्म-, शक्तीश्चात्मोन्नतिक्रमात् ॥३५९॥

कर्मणां निर्जरा बह्व्य, श्चाल्पबन्धः प्रजायते;
सम्यग्दृष्टिमनुष्याणा, मास्रवारम्भकारिणाम् ॥३६०॥

आत्मोपयोगिनां नृणा, महिंसा आन्तरा यतः
हिंसाभावं विनानैव, हिंसातः कर्मबन्धता ॥३६१॥

आत्मोपयोगिनां दोषा, नश्यन्ति पूर्णवेगतः
आत्मशुद्धिर्भवेत्तूर्णं, तत्र किञ्चिन्न संशयः ॥३६२॥

आत्मोपयोगिनः सन्तो, गृहस्थाश्च विवेकतः
बहिरन्तःप्रवर्तन्ते, मोक्षार्थं तत्प्रवृत्तयः ॥३६३॥

गच्छादिमतभेदाये, क्रियादिभेदवृत्तयः
तत्रोपयोगिनः सन्तो, मुह्यन्ति न कदाग्रहात् ॥३६४॥

सर्वगच्छस्थिताः सन्तो, गृहस्थाश्चोपयोगिनः
स्वस्वगच्छक्रियावन्तः समत्वान्मुक्तिगामिनः ॥३३५॥

सर्वगच्छक्रियादीनां, तात्पर्यमाऽऽत्मशुद्धये;
क्रियादिमतभेदेषु, क्लिश्यन्ति न समत्वतः ॥३६६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्रदायादिभेदस्थ-, नृणां मुक्ति र्हि साम्यतः
गच्छक्रियादिनिर्मोहा, याता यास्यन्ति सद्गतिम् ॥३६७॥
आत्मोपयोगिनः सर्वं, कुर्वन्ति व्यवहारतः
संलक्ष्य शुद्धमात्मानं, वर्तन्ते स्वाधिकारतः ॥३६८॥
सर्वधर्मीयशास्त्राणां, मतानां चावलोकिनः
असंख्यनयसापेक्ष-, सत्यार्थिनस्तु मुक्तये ॥३६९॥
असंख्यनयसापेक्ष-सत्यज्ञानस्य सागराः
महावीरस्यदेवस्य, भक्ता जैना हि मुक्तिगाः ॥३७०॥
शुद्धाऽऽत्मैव स्वगच्छोऽस्ति, सम्प्रदायो निजाऽऽत्मनि;
सर्वदर्शनरूपाऽऽत्मा, जानाति योऽस्ति साम्यवान् ॥३७१॥
आत्मनः स्वांशरूपास्ता दृष्टयः सर्वधर्मिणाम्;
अनुभूतो मयास्वाऽऽत्मा, नयैरेवमपेक्षया ॥३७२॥
बन्धोऽस्ति मोहभावेन, बाह्यतो निष्क्रियावताम्;
मोहंविना तु निर्बन्धा, बाह्यतः कर्मकारिणः ॥३७३॥
परस्परोपकाराय, जीवाऽजीवाश्च सर्वदा;
विश्वस्थसर्वजीवानां, परस्परमुपग्रहः ॥ ३७४ ॥
जीवाऽजीवसहायेन, जीवा जीवन्ति भूतले;
मनुष्याणां विशेषेण, जीवाऽजीवसहायता ॥३७५॥
महीचन्द्रार्कसाहाय्या, जीवानां जीवनं भवेत्,
मातुः पितुश्च वृद्धानां, निमित्तैरस्ति जीवनम् ॥३७६॥
अन्नपानाद्युपायैस्तु, लोकानामस्ति जीवनम्;
जीवाऽजीवादितः सर्व, मन्नादिकं मिलेध्यतः ॥३७७॥
नरा जीवन्ति धर्मार्थं, जीवाऽजीवसहायतः
पारम्पर्येण मोक्षार्थं, जीवाद्या उपकारकाः ॥३७८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतो जीवादिरक्षार्थं, मनुष्यैः सर्वयत्नतः
यतितव्यं स्वभावेन, विश्वोपग्रहहेतवे ॥ ३७९ ॥

पशुपक्षिमनुष्याणां, रक्षणं स्वीयशक्तितः
वृक्षाणां रक्षणंकार्यं, विवेकेन यथातथम् ॥३८०॥

मातुः पितुश्च वृद्धानां, सद्गुरूणां सुभक्तये;
निष्कामबुद्धितो नित्यं, यतितव्यं स्वशक्तितः ॥३८१॥

आत्मोपयोगिभिर्भक्तैः स्वाऽन्योपकारिणःप्रति;
वर्तितव्यं सुसेवाभिः सेवाधर्मोऽस्ति धर्मिणाम् ॥३८२॥

स्वार्पणेन सदा सेव्यः सम्यक्त्वज्ञानदायकः
आत्मोपयोगलाभार्थं, सन्तः सेव्याः सुभावतः ॥३८३॥

परोपकारिणां नृणां, कार्या सेवा सुभावतः
सेवाधर्मसमो धर्मो, नैवभूतो भविष्यति ॥३८४॥

स्वोत्पन्नैः सद्गुणैः सेवा, कार्या विश्वस्थदेहिनाम्;
प्रतिफलं न चाकांक्ष्यं-, सन्तो निष्कामकर्मिणः ॥३८५॥

सात्त्विकसद्गुणैः सेवा,- भक्तिकर्मादिभिर्जनैः
आत्मशुद्धिः प्रकर्तव्या, साध्यं सिद्ध्यति साधनात् ॥३८६॥

विश्वसेवा सदाकार्या, प्राप्तशुद्धोपयोगिभिः;
शुद्धोपयोगिनः सन्तः, सेवायामधिकारिणः ॥३८७॥

आत्मज्ञानं विना सेवा-, कारिणः पापबन्धकाः
निष्पापा ज्ञानिनो ज्ञेया, यतस्ते स्वोपयोगिनः ॥३८८॥

क्षयोपशमभावेन, प्राप्तशुद्धोपयोगिनाम्;
सतांसेवा भृशं कार्या, उपायैरपिकोटिभिः ॥३८९॥

शुद्धात्मप्रभुलीनानां, देहाध्यासविवर्जिनाम्;
आत्मोन्मत्तमनुष्याणां, हृदिव्यक्तो प्रभुर्महान् ॥३९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धब्रह्मरसास्वाद–, प्राप्तमाधुर्यजीवनात्;
जीवन्ति ते यतः सन्तः, प्रभोर्जीवनजीविनः ॥३९१॥

आन्तरं जीवनं ज्ञान, मनन्तमुपयोगिनाम्;
अनन्तवीर्यसम्पन्नं, जीवनं निर्मलं शुभम् ॥३९२॥

बाह्यजीवनजीवन्त, आन्तरं जीवनंविना;
जीवन्ता स्ते मृताज्ञेयाः मोहजीवनजीविनः ॥३९३॥

बाह्यजीवननाशोऽस्ति, चानन्तं ब्रह्मजीवनम्;
ब्रह्मजीवनजावन्तो, वैदेहाऽऽत्मस्वरूपिणः ॥३९४॥

आत्माधीनं मनःकायो–, वचश्च यस्य वर्तते;
मनोवाक्कायपावित्र्या, त्तस्य स्वातंत्र्यजीवनम् ॥३९५॥

सद्बुद्ध्या वर्तनं यस्य–दुर्बुद्ध्या नैववर्तनम्,
इन्द्रियाणां न दासोऽस्ति–स्वतन्त्रश्चोपयोगवान् ॥३९६॥

आत्मजीवनजीवन्तो, बाह्यजीवनजीवकाः
अन्तर्बहिः स्वतन्त्रास्ते, प्रतिबन्धविवर्जकाः ॥३९७॥

मनोवाक्कायगुप्तीनां–, धारकादोषवारकाः
समितिवाहकाः सन्तः स्वतन्त्रा धर्मचक्रिणः ॥३९८॥

योग्याचारेण जीवन्तो, योग्याहारविहारिणः
आत्माधीनाश्च सर्वत्र, स्वाऽऽत्मोपयोगजीविनः ॥३९९॥

विवेकेन प्रवृत्ताये, आजीविकादिकर्मसु;
बाह्यजीवनसापेक्ष–, सर्वाचारविचारिणः ॥४००॥

मैत्रीभावेन वर्तन्ते–, माध्यस्थभावधारकाः
प्रमोदभावसम्पन्नाः कारुण्यभाववाहकाः ॥४०१॥

सूपयोगं प्रकुर्वन्तो–, मनोवाक्कायकर्मणाम्;
आत्मानन्दरसोन्मत्ताः प्रभोर्जीवनजीविनः ॥४०२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाह्यजीवननिर्बन्धा, बाह्यतोजीविनोऽपिते;
साक्षिभावेनसर्वत्र, ब्रह्मजीवनजीविनः ॥४०३॥
प्रवृत्तिषुनिवृत्तिषु, वर्तनं वा निवर्त्तनम्;
तत्र स्वतन्त्रबुद्ध्याते-वर्तिनश्चनिवर्तिनः ॥४०४॥
आत्मोपयोगिनां सर्वं-, जगदाऽऽत्मिकशुद्धये;
आत्मोन्नतिक्रमार्थश्च, स्यादन्तस्तउपाधिषु ॥४०५॥
अशातायां च शातायां, वने गृहे च सागरे;
आत्मनः परिणामाय, सर्वंस्यादुपयोगिनाम् ॥४०६॥
सात्त्विकाचारवृत्तिषु, सात्त्विकसद्गुणेष्वपि;
नाऽभिमानश्चयच्चित्ते, प्रवृत्तौ चोपयोगवान् ॥४०७॥
सधनोनिर्धनो वास्याद्, भोगीरोगी च राज्यवान्,
आरण्यो वा गृही त्यागी, मुक्तः शुद्धोपयोगतः ॥४०८॥
नपुंसको नरोनारी, यः कोऽपि स्वोपयोगवान्;
यादृक्तादृगवस्थायां, मुक्तः स्यान्नैवसंशयः ॥४०९॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चस्वोपयोगतः
म्लेच्छामुक्तिपदंयान्ति, नानालिङ्गादिधारिणः ॥४१०ऽ
नाऽहंबालोयुवावृद्धो, नवा नारीपुमानहम्
नाऽहंदेहश्चदेहीवा,-पुद्गलस्थो न पुद्गली ॥४११॥
सर्वपुद्गलपर्याया-दहंभिन्नोऽस्मिनिश्चयात्,
पुद्गलेषुसुखंनाऽस्ति, सुखंब्रह्मणिशाश्वतम् ॥४१२॥
निरञ्जनोनिराकारो, रूपस्थोऽपिनरूप्यहम् ।
विभावपरिणामस्थो, वस्तुतोऽहंस्वभाववान् ॥४१३॥
रागद्वेषपरीणामो, वैभाविकः सउच्यते
ततोभिन्ना निजाऽऽत्माऽस्ति, रागंद्वेषंच मा कुरु ॥४१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वपुद्गलतोभिन्नो, रागःशुद्धात्मनः शुभः
आत्मरागेण शुद्धात्म–, ज्ञानी ब्रह्मरसी भवेत् ॥४१५॥
आत्मपुद्गलसंयोगा–दनादिकालतोऽशुभः
वैभाविकपरीणामो, वर्तते सर्वदेहिनाम् ॥४१६॥
वैभाविकपरीणाम,–नाशआत्मोपयोगतः
आत्मोपयोगिनां शुद्धः, परीणामःप्रजायते ॥४१७॥
आत्मानन्दस्य वाञ्छाचेत्, कामवृत्तिंनिवारय;
यत्रकामोनतत्राऽस्ति, स्वाऽऽत्मारामोप्रवेदय–॥४१८॥
यावत्कामविकाराणां, पूर्णक्षयो न जायते,
तावत् स्त्रीस्पर्शरूपेभ्या, दूरंस्थेयं सुयोगिभिः ॥४१९॥
पौद्गलानन्दवन्तःस्यु, र्गृहस्था मुख्यभावतः
आत्मानन्दस्य लाभार्थ–सम्यग्दृष्ट्या प्रवर्तकाः ॥४२०॥
अविरता गृहस्थाःस्युः सम्यग्दृष्टिप्रधारकाः
व्रताद्यैर्विरताजैनाः–शुद्धसम्यक्त्वशालिनः ॥४२१॥
सर्वकर्मक्षयार्थं ते, गृहस्थधर्मपालकाः
पौद्गलानन्दभोक्तारो, हृदिब्रह्मसुखार्थिनः ॥४२२॥
पौद्गलानन्दतोऽनन्तं, सुखं नित्यं निजाऽऽत्मनि;
तत्सुखाऽवाप्तयेदृष्टि, र्गृहस्थानां प्रवर्तते ॥४२३॥
पौद्गलानन्दभोगार्थ–मुद्यताश्चगृहस्थिताः
आत्मानन्दाऽप्तयेतेस्यु, र्देशविरतिधारिणः ॥४२४॥
शाताऽशाताप्रभोक्तार, आत्मशुद्ध्यार्थमुद्यताः
सन्तआत्मोपयोगेन, प्रवर्तन्तेव्रतस्थिताः ॥४२५॥
आत्मशुद्धोपयोगेन, व्रताव्रतेषुसाम्यवान्;
जीवन्मुक्तोभवेज्ज्ञानी, मुच्यते धर्मसाधनैः ॥४२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



असंख्यजातविद्यानां, ग्रन्थकोटिस्तु भूतले,
तत्पारमाऽऽत्मबोधेन, पार्यते स्वोपयोगिभिः ॥४२७॥

दर्शनधर्ममार्गाणां, सर्वसत्यं निजाऽऽत्मनि;
विज्ञायचाऽऽत्मशुद्ध्यर्थं, जैनधर्मं प्रसाधय ॥४२८॥

षड्द्रव्यनवतत्त्वानां–, नयनिक्षेपभङ्गतः
श्रद्धानपूर्वकं ज्ञानं, सम्यग्दर्शनमुच्यते–॥४२९॥

सम्यग्दर्शनलाभेन, सत्फलाधर्मसाधना;
निष्फलंधर्मकृत्यं स्यात्, सम्यग्दर्शनमन्तरा ॥४३०॥

सम्यग्दर्शनमेवाऽस्ति, शुद्धोपयोगआत्मनः
सम्यग्चारित्रमेवाऽस्ति, शुद्धोपयोगआन्तरः ॥४३१॥

शुद्धोपयोगिनांसर्वं,–वाणीकायादिवर्तनम्;
स्वर्गीयमुक्तयेवास्या, त्तत्रकिञ्चिन्न संशयः ॥४३२॥

दया सत्यं तपादान,–मस्तेयंचापरिग्रहः
आत्मदृष्टिश्च सत्सेवा, शुद्धोपयोगहेतवः ॥४३३॥

भक्तानां भावतः सेवा, प्रमाणिक प्रवर्तनम्;
पारतन्त्र्यं न भोगानां, रोगादौ न च दीनता ॥४३४॥

साहाय्यंदुःखभोक्तृणा, मनीतिवर्जनं सदा;
सत्यांशेषु महारागः शुद्धोपयोगहेतवः ॥४३५॥

सर्वविश्वस्थजीवाना, मुपकारप्रवृत्तयः
सर्वथा मदिरात्यागो, मांसस्यपरिवर्जनम् ॥४३६॥

व्यभिचारस्य संत्यागो, दुष्टव्यसनवर्जनम्;
पशुपक्षिमनुष्याणां, हिंसात्यागो विवेकिता ॥४३७॥

चारित्रिणां महाभक्तिः स्थिरप्रज्ञाक्षमार्जवाः
इत्यादिसद्गुणैर्मोक्षो, विश्वस्थदेहिनांभवेत् ॥४३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्तिःस्वर्गश्च नारीणां, शूद्राणां म्लेच्छदेहिनाम्;
पापकर्मपरित्यागात्, सद्गुणाचारतश्चवै ॥४३९॥
पापाचारविचाराणां, पश्चात्तापो भृशंभवेत्;
ईश्वरप्रार्थनायोगात्, पवित्राऽऽत्मास्वयंभवेत् ॥४४०॥
पूर्वोक्तसद्गुणाचारै, जैनधर्मो जगत्त्रये;
सर्वजातीयलोकानां, मुक्तिदोऽस्तिस्वभावतः ॥४४१॥
पापाद्दुःखंसुखं धर्मात्, सर्वत्र विश्वदेहिनाम्;
इतिविज्ञायधर्मार्थं, जीव!! वारय दुर्गुणान् ॥४४२॥
दुष्टव्यसनदासाये, दुर्गुणैर्येच जीवकाः
दुष्टप्रवृत्तिदासाये, मुक्तिंयान्ति न हिंसकाः ॥४४३॥
विनेयस्तत्त्वजिज्ञासु, रार्हतःसत्यपालकः
शुद्धोपयोगयोग्यःसो, मृतःसन्यश्चजीवति ॥४४४॥
सद्गुणैर्येच जीवन्तो, मृताये दुष्टवृत्तिभिः
येचजीवन्ति मोक्षार्थं, शुद्धाऽऽत्मानोभवन्तिते ॥४४५॥
अनन्तमात्मसामर्थ्यं, प्रादुर्भवतिचेतने;
आत्मोपयोगतः पूर्णं, परब्रह्म प्रकाशते॥४४६ ॥
वैभाविकपरीणामाद्, भिन्नो निजाऽऽत्मनि स्फुटम्;
स्वाभाविकपरीणामः शुद्धोपयोग उच्यते ॥४४७॥
वैभाविकपरीणामाद्, भिन्नः स्वाभाविकाऽऽत्मनि;
उपयोगपरीणामं-कुरुष्व भव्यचेतन !! ॥४४८॥
सर्वविश्वसमाजानां, कल्याणायकलौमहान्;
शुद्धोपयोग एवाऽस्ति, सर्वथा मोक्षदायकः ॥४४९॥
सर्वदोषविनाशाय, सर्वसद्गुणहेतवे;
कृत्स्नकर्मक्षयार्थंच, शुद्धोपयोगमाचर ॥४५०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोगादिजन्यदुःखेऽपि, ब्रह्मतत्त्वविचारिणाम्;
आत्मोपयोगिनांनित्य-, मानन्दोल्लासआत्मनि ॥४५१॥
उपयोगेनवेत्तारं-स्मारं स्मारं विचिन्तय;
विस्मृत्यबाह्यभावं त्वं-, लीनोभवनिजाऽऽत्मनि ॥४५२॥
दूरीकृत्यप्रमादाँस्त्वं-शुद्धाऽऽत्मानंस्मर द्रुतम्,
एकमाऽऽत्माजगत्सारः सत्यंहृदिप्रधारय ॥४५३॥
सर्वसारस्यसारोऽय-, माऽऽत्मातत्त्वमसि स्वयम्
सोऽहंप्रज्ञानमाऽऽत्माऽस्मि, कालस्य कालजित्त्वहम् ॥४५४॥
वादाँश्चप्रतिवादांश्च-कुर्वन्तः सर्वपण्डिताः
आत्मसुखं न संयान्ति, शुद्धोपयोगमन्तरा ॥४५५॥
दर्शनधर्मशास्त्राणां, मोहाल्लोकाः परस्परम्,
युद्ध्यन्तिकर्मबध्नन्ति, यान्तिजन्मपरम्पराम् ॥४५६॥
सर्वदर्शनधर्माणां, सारंसत्यंवदाम्यहम्;
रागद्वेषक्षयः कार्यः कर्तव्यास्वाऽऽत्मशुद्धता ॥४५७॥
सर्वयोगादिसारोऽस्ति-संसाध्यावीतरागता;
आत्मोपयोगतासाध्ये, त्येवंब्रुवन्ति पण्डिताः ॥४५८॥
मनोवाक्कायपावित्र्या-दात्मनः पूर्णशुद्धता;
कर्तव्यासासतांप्राप्या-, सत्यमेवंवदाम्यहम् ॥४५९॥
आर्याः स्युः सद्गुणैः सर्वे, सदाचारैर्भुवस्तले;
मनोवाक्कायशुद्ध्याये-, स्वाऽऽत्मशुद्धिविधायिनः ॥४६०॥
आत्मशुद्धिंविनादेव-देवीभिर्भक्तदेहिनाम्;
मुक्तिप्रदीयतेनैव, स्वाऽऽत्मनानिजमुद्धरेत् ॥४६१॥
जायतेनकदामुक्ति, राविर्भूतगुणैर्विना;
ईश्वरेणाऽपिनोदेया, सत्यमेतद्विचारय ॥४६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवस्यसद्गुरोर्भक्त्या–स्वाऽऽत्मशुद्धिः प्रजायते.
सेवाभक्तिपरीणामाद्–भवन्तिसात्त्विकागुणाः ॥४६३॥

सेवाभक्तिपरीणामो, जायेताऽऽत्मनआत्मनि;
आत्मनाजायतेचित्ते–सात्त्विकमोहमिश्रकः ॥४६४॥

सेवाभक्तिपरीणामः प्रशस्यमोहसंयुतः
केवलज्ञानतः पूर्वं, वर्तते सर्वधर्मिणाम् ॥४६५॥

शुद्धाऽऽत्मरूपदीपाग्रे, स्फटिकाच्छादनंयथा;
तथासात्त्विकमोहीय–मिश्रस्वाऽऽत्मिकसद्गुणाः ॥४६६॥

स्फटिकेन यथादीपो, नावृतोऽह भवेत्तथा;
सात्त्विकेभ्यो निजाऽऽत्मीय, गुणाः स्युर्नावृताः खलु॥४६७॥

आत्मशुद्धोपयोगेन, सेवाभक्त्यादिकारिणाम्;
सात्त्विका नैवबन्धाय, प्रत्युतमुक्तिहेतवे ॥४६८॥

मुक्तिंप्रति समादेया, अतः सात्त्विकसद्गुणाः
सात्त्विकसद्गुणाद्भिन्ना, ज्ञानाद्या आत्मसद्गुणाः ॥४६९॥

सात्त्विकगुणकर्मभ्यो, भिन्नोऽहं ज्ञानदर्शनी;
तथाऽपिस्वाऽन्यशुद्ध्यर्थं, यतेऽहंतत्प्रसाधनैः ॥४७०॥

सात्त्विकगुणकर्माणि; साधनानिनिबोधत;
आत्मोपयोगतस्तानि, व्यापृणीहि यथातथम् ॥४७१॥

सात्त्विकगुणकार्येषु, सम्यक्साधनबुद्धितः
प्रवर्तस्वोपयोगेन–, स्वाऽन्योपग्रहहेतवे ॥४७२॥

सात्त्विकगुणकर्माणि, पुद्गलांश्चविशेषतः
स्वान्योपकारहेत्वर्थं, व्यापृणीहिविवेकतः ॥४७३॥

आत्मोपयोगिनोलोकाः, साधनसाध्यवेदिनः
यथायोगंप्रवर्तन्ते, सम्यग्विश्वावलोकिनः ॥४७४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यक्श्रद्धानसम्यक्त्व–लाभात्पश्चात्प्रकाशते;
अल्पकालेचिरंकाले, चारित्रं चाऽऽत्मनः स्फुटम् ॥४७५॥
स्वाऽऽत्मानंस्वं परिज्ञाय, शीघ्रमुत्तिष्ठजागृहि;
स्वपर्यायगुणानांत्व, माविर्भावंकुरुद्रुतम् ॥४७६॥
आत्मनः पूर्णशुद्धिर्या, सैवसाध्या जिनोदिता
साध्यलक्ष्योपयोगेन, स्वाऽऽत्मशुद्धिंकुरुद्रुतम् ॥४७७॥
साध्यलक्ष्यं हृदिध्यात्वा, कर्तव्यकार्यमाचर !!!
आत्मोत्साहेनवर्तस्व, प्रमादाँश्चनिवारय ॥४७८॥
प्रतिक्षणंपरब्रह्म–, शुद्धरूपंविचारय;
भूयाः शुद्धाऽऽत्ममग्नस्त्वं, विस्मृत्यमोहभावनाम् ॥४७९॥
निर्ममोभवसर्वत्र, दृश्याऽदृश्येषुवस्तुषु;
नाऽहंकारीभव व्यक्त–, दृश्यादृश्येषु सर्वथा ॥४८०॥
साक्षिभावेनसर्वत्र, वर्तस्वस्वोपयोगतः
औपचारिककार्येषु, निर्लेपोभवबोधतः ॥४८१॥
मृत्युतानिर्भयीभूय–स्वाऽऽत्मनिनिर्भयंचर;
जातस्यवपुषोनाशः स्वयंत्वमविनाशवान् ॥४८२॥
जातानांहिविनाशोऽस्ति, तेषांशोकंनिवारय;
आत्माऽसिसच्चिदानन्दः स्वस्वरूपंविचारय ॥४८३॥
साधयस्वाऽऽत्मनः शुद्धिं, वारय मोहवासनाम्
जनान् स्मारय सद्ब्रह्म–धारय स्वोपयोगिताम्–॥४८४॥
जीव !! शुद्धोपयोगेन, म्रियस्व मोहभावतः
विस्मर मोहभावाँस्त्व, मात्मरूपंच संस्मर–॥४८५॥
असंख्यमार्गा मोक्षस्य, सन्तिस्वाऽऽत्मोपयोगिनाम्;
तेषामेकमपिप्राप्य–सिद्धाः सेत्स्यन्ति देहिनः ॥४८६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यक्त्वदर्शनंव्यक्त, माऽऽत्मोपयोग इष्यते
आत्मोपयोगिनां सर्वे-मार्गा मोक्षाय भाषिताः ॥४८७॥
सम्यक्त्वदर्शनं प्राप्य-, मा प्रमादं कुरुष्वभोः
आत्मन् !! शुद्धस्वरूपंते, चिन्तय स्वस्थिरोभव ॥४८८॥
सत्याऽऽसत्यंच विज्ञाय, मा मुह्य मोहकर्मणि;
असत्ये वर्तमानोऽपि, तत्र सत्यं न वेदय ॥४८९॥
सम्यग्दृष्ट्या प्रविज्ञाय, स्वाऽऽत्मधर्मे रतिं कुरु
प्रारब्धकर्मभोगेषु, रतिं मा कुरु चेतन !!! ॥४९०॥
वैषयिकरतिंत्यक्त्वा, शुद्धाऽऽत्मनि रतिं कुरु;
पवित्राऽऽत्मा भवस्पष्टं, परब्रह्ममयोभव ॥४९१॥
सम्मील्य सागरे बिन्दु, यथाब्धिरूपतांभजेत्
तथा परात्मतां प्राप्य, स्वाऽऽत्मासिद्धो भवेत्स्वयम् ॥४९२॥
मनोवाक्कायजान् दोषान्, वारय निजशक्तितः
धारय सद्गुणान् सर्वान्, जीव ! स्वाभाविकैर्गुणैः ॥४९३॥
सन्त्यज्य दुर्मतिं दुष्टां, सन्मतिं भज भावतः
शुभाऽशुभविपाकेषु, हर्षं शोकश्च संत्यज ॥४९४॥
कर्माधीना जगज्जीवा, मित्राणि शत्रवो न ते;
आत्मोपयोगभावेन, सर्वजीवान् क्षमापय ॥४९५॥
रागद्वेषौ न मे सर्व-, विश्वस्मिन् देहिनः प्रति
उत्थितोऽहं स्वमुक्त्यर्थं, समोऽहं सर्वदेहिषु ॥४९६॥
परब्रह्मपदाऽवाप्त्यै, मनोवाक्कायसाधनैः
उत्थितोऽहंपरप्रीत्या, सद्गुरु कृपयाभृशम् ॥४९७॥
परब्रह्ममहावीर-कृपां याचे स्वमुक्तये;
सतां कृपाकटाक्षेण, मदुद्धारो भवेद् ध्रुवम् ॥४९८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्चात्तापोऽस्त दोषाणां, गुणानामनुमोदना;
सर्वसङ्घस्य दासाऽनु,-दासोऽहमुपयोगवान् ॥४९९॥
दासोऽहं सर्वसाधूनां, साध्वीनांच विशेषतः
तत्कृपया मदुद्धारो, भूयात्तत्प्रार्थयाम्यहम् ॥५००॥
सर्वसङ्घस्य सेवायां, स्वार्पणभाववानहम्;
आत्मशुद्धोपयोगार्थं, यते निष्कामभक्तितः ॥५०१॥
आत्मनोगुणदोषाणां-, कर्तव्यंच निरीक्षणम्;
पश्चात्तापादियोगेन-, कर्तव्या चाऽऽत्मशुद्धता ॥५०२॥
गुप्ताऽव्यक्ताश्चयेदोषा, हर्तव्या पूर्णयत्नतः
दोषाभवाय मोक्षाय, गुणाज्ञेया विवेकतः ॥५०३॥
गुणा निजाऽऽत्मनोरूपं, मोहरूपंतु दुर्गुणाः
दोषवृन्दविनाशेन, स्वाऽऽत्मशुद्धिंकुरु द्रुतम् ॥५०४॥
मुक्तिःकदाऽपि नस्याद्धि, रागद्वेषक्षयं विना,
अतोरागादिदोषाणां, नाशाय त्वं यतस्वभोः ॥५०५॥
दोषप्रमादनाशार्थं-, माऽऽत्मरूपं विचारय;
गुणान्व्यक्तान् कुरुष्वत्वं, प्रमादं मा कुरुक्षणम् ॥५०६॥
गारुडिको यथा सर्प-विषमुत्तारयेद् द्रुतम्,
जाङ्गुलीमन्त्रयोगेन, ज्ञानी मोहविषं तथा ॥५०७॥
शुद्धोपयोगमन्त्रेण, मोहाहेर्विषमुत्तरेत्;
ब्रह्मविद्भवतिब्रह्म निर्भयोब्रह्मविज्जनः ॥५०८॥
अग्निरूपा भवेन्नून, मग्नियोगेन वर्तिका;
शुद्धाऽऽत्मभावनालीनः शुद्धाऽऽत्माजायते तथा ॥५०९॥
यथाऽऽत्मकथनं तद्वद्, वर्तनं शक्तितो भवेत्;
तदानिजाऽऽत्मनःशुद्धि, स्तथा मुक्तिश्च जायते ॥५१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पालनंच प्रतिज्ञायाः पूर्णशुद्धाऽऽत्मसंस्मृतिः
चतुर्विधमहासंघ–, सङ्गसेवाप्रवर्तनम् ॥५११॥
निरुपाधिदशाप्राप्त्ये, हेतूनामवलम्बनम्
बाह्यसङ्गेषुनिःसङ्ग–, वर्तनं मान्तरं कुरु ॥५१२॥
आत्मपक्वदशाप्राप्त्यै–मोहकृत्सङ्गवर्जनम्;
यथायोग्यं प्रकर्तव्यं, यत्रतत्रयदातदा ॥५१३॥
शुद्धाऽऽत्मभावनावेगा–दाविर्भावो निजाऽऽत्मनि;
आत्माऽऽनन्दसमुद्रस्य, जायतेऽनुभवोहृदि ॥५१४॥
प्रतिक्षणं हृदिव्यक्ता, कर्तव्या ब्रह्मभावना;
यत्रतत्रसदाभाव्यः शुद्धाऽऽत्मा ध्यानयोगतः ॥५१५॥
सद्गुरुभक्तिसेवाद्यै, रात्मपातो न जायते;
निपातोऽपिनभक्तानां, गुर्वादिभक्तिकारिणाम् ॥५१६॥
दोषान् मुक्त्वा निजाऽऽत्मानं, प्रति क्रमणयोगतः
आत्मशुद्धिर्भवेत्तूर्णं, तत्रमग्नोभवस्वयम् ॥५१७॥
सद्गुणानां प्रकाशाय, दोषाणांनाशहेतवे;
यद्योग्यंतत्प्रकर्तव्यं, योग्योपायैर्यथातथम् ॥५१८॥
आत्मनिभवमग्नस्त्वं, पूर्णप्रीत्याभृशं स्वयम्;
आत्माऽनुभवसंप्राप्त्या, निर्विकल्पो भविष्यसि ॥५१९॥
शुद्धाऽऽत्मानं विनाह्यन्यान्, सङ्कल्पाँस्त्वं भृशंत्यज
सर्वथाऽऽत्मोपरिप्रेम–, धारयोत्साहवीर्यतः ॥५२०॥
यादृग्भावोभवेद्यस्य, फलंतस्याऽस्तितादृशम्;
आत्मशुद्धोपयोगेन, फलंमुक्तिर्निजाऽऽत्मनः ॥५२१॥
आत्मभावेनमोक्षोऽस्ति, भव्यानां भावनावताम्;
भरताद्या गतामुक्ति, माऽऽत्मनो भावनाबलात् ॥५२२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इलापुत्रोगतो मुक्ति, माऽऽत्मनोभावनाबलात्;
आत्मशुद्धोपयोगेन, आषाढःकेवलीप्रभुः ॥५२३॥
आत्मभावनया मुक्ति, मनन्ताः खलुलेभिरे;
भावनारूढजीवानां, शुद्धोपयोग आन्तरः ॥५२४॥
दानादिधर्मकार्याणि, न फलन्ति च तां विना;
शुभाच्छुद्धा प्रजायेत, भावना मुक्तिदायिनी ॥५२५॥
आत्मोपयोगदातृत्वे, भावनाया महद्बलम्;
बाह्यक्रियांविनाभावाद्, यथायोगं फलं भवेत् ॥५२६॥
आत्मनःशुद्धपर्यायाः सिद्धाऽऽत्मादिप्रभेदतः
ज्ञातव्या उपयोगेन, सद्गुरुबोधयुक्तिभिः ॥५२७॥
अर्हन्नस्तिनिजाऽऽत्मैव, सिद्धआत्मैवशाश्वतः
आचार्योऽस्तिनिजाऽऽत्मैव, स्वाऽऽत्मैववाचकप्रभुः ॥५२८॥
साधुरस्तिनिजाऽऽत्मैव, स्वाऽऽत्मैव परमेष्ठिराट्;
शुद्धदर्शनमाऽऽत्मैव, ज्ञानमाऽऽत्मैव सर्वथा ।५२९॥
स्वाऽन्यप्रकाशकंज्ञानं, ज्ञानेनाऽऽत्माप्रलक्ष्यते;
स्वभाव आत्मनो मुख्यो, ज्ञानं ब्रह्मैवसर्वदा ॥५३०॥
निजाऽऽत्मैवाऽस्तिचारित्रं, रमणं स्थैर्यं माऽऽत्मनि;
शुद्धोपयोग एवाऽस्ति, चारित्रं कर्मनाशकम् ॥५३१॥
आत्मवीर्यं निजाऽऽत्मैव, वर्तते तन्निजाऽऽत्मनि;
आत्माऽसङ्ख्यप्रदेशेषु, पर्यायगुणशक्तिदम् ॥५३२॥
निजाऽऽत्मैव तपो बोध्यं, सर्वेच्छारोधकंमहद्;
कर्मणां निर्जरायेन, भवेन् मुक्तिप्रदायकम् ॥५३३॥
गुणाश्चसर्वपर्याया, अनन्ता आत्मसंस्थिताः
स्यादाऽऽत्माऽभेदतस्तेषा, मैक्यंजानन्तिपण्डिताः ॥५३४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मनः सद्गुणाः सर्वे, स्वाऽऽत्मरूपा अनादितः
सत्तातो विद्यमानास्ते, भवन्ति व्यक्तरूपिणः ॥५३५॥

आत्मशुद्धस्वभावेन, मोक्षोऽस्तीति विनिश्चितम् ।
रागद्वेषविभावेन, संसारोऽस्तीति निश्चितम् ॥५३६॥

जीवनंस्वाऽऽत्मभावेन, मृत्युर्मोहेन निश्चितम्
जीवनं मरणं ज्ञात्वा, प्रमादं मा कुरुष्वभोः ॥५३७॥

मुक्तिराऽऽत्मनि विज्ञेया, माऽन्यत्रत्वं परिभ्रम;
आत्मन्येवनिजंराज्यं, बाह्यराज्येषु मामुहः ॥५३८॥

स्वाश्रयेणैव जीव !! त्वं, मा जीव !! त्वं पराश्रयात्;
पारतन्त्र्यं महामृत्युः स्वातन्त्र्यमाऽऽत्मजीवनम् ॥५३९॥

स्वाऽऽत्मन्येवसुखं सत्यं, दुखं हि जडमोहतः
आत्मानमन्तराकोऽपि, कदाचिन्नाऽस्तिशर्मवान् ॥५४०॥

आत्मनोरिपुरात्मैव, रागद्वेषादिसंयुतः
आत्मनो मित्र माऽऽत्मास्ति, साम्येन कर्मनाशकृत ॥५४१॥

आत्मनो बन्धुरात्माऽस्ति, मैत्र्यादिभावसंयुतः ।
आत्मन ईश्वरः स्वाऽऽत्मा, ज्ञानचारित्रसंयुतः ॥५४२॥

आत्मनः सूर्य आत्माऽस्ति, शुद्धब्रह्मप्रकाशवान् ।
आत्मनश्चन्द्र आत्माऽस्ति, शमसंवेगसंयुतः ॥५४३॥

कर्मकर्ता निजाऽऽत्मास्ति, कर्मभोक्ता तथाऽऽत्मराट्,
कर्महर्तानिजाऽऽत्माऽस्ति, बद्धोमुक्तोऽस्त्यपेक्षया ॥५४४॥

अनन्तशक्तिमान् ह्याऽऽत्मा, निजाऽऽत्मशक्तियोगतः
अनन्तशक्तिमत्कर्म, पौद्गलिकक्रियाबलात् ॥५४५॥

कुत्राऽपिबलवत्कर्म, कुत्राप्याऽऽत्मा बली भवेत्;
ज्ञानसाम्यबलोपेत, आत्मा कर्मारिनाशकृत् ॥५४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनादिकालसंयोग, आत्मनः कर्मणो द्वयोः
आत्मा निजाऽऽत्मभावेन, कर्महन्ता स्वयंभवेत् ॥५४७॥
सर्वशक्तिमयः स्वाऽऽत्मा, दैन्यं किञ्चिन्न धारय
सर्वशक्तिप्रकाशार्थं, यतस्व पुरुषार्थतः ॥५४८॥
आत्मोल्लाससमुत्साहा, ज्जीव !! शुद्धाऽऽत्मनिस्वयम् ।
आत्मानन्दरसास्वादं, कुरुष्व स्वाऽऽत्मभावतः ॥५४९॥
आत्मानन्दाऽमृतंपीत्वा, भवमग्नो निजाऽऽत्मनि;
सर्वसाधनतः साध्य, माऽऽत्मानन्दस्यजीवनम् ॥५५०॥
स्वलक्ष्ये निश्चितं ध्येयं, पूर्णानन्दरसोदधेः
कर्तव्यं सर्वथा पानं, त्यक्त्वा मोहविषं द्रुतम् ॥५५१॥
मनः स्वर्गो मनःश्वभ्रं, संसारो मन एवच
मोहरूपं मनो जित्वा, मुक्तो भवति चेतनः ॥५५२॥
मनोनाशाद्भवेन्मृत्यु र्मोहादि कर्मणां द्रुतम् ।
मोहक्षयेन मोक्षोऽस्ति, मोक्षेऽनन्तं सुखं सदा ॥५५३॥
पर्यायाणांगुणानाश्च, व्यक्तभावोऽस्तिसिद्धता,
सन्तस्तेव्यक्तिरूपेण, भवन्ति गुणपर्ययाः ॥५५४॥
व्यक्तोभवन्तिनाऽसन्तः सन्तोव्यक्ताभवन्तिते;
नाऽसतोजायतेसत्त्वं, सतोऽसत्त्वं न जायते ॥५५५॥
गुणा अनन्तपर्याया, आत्मनिसन्ति सत्तया;
सद्भ्यः सामर्थ्यपर्याया, अनन्ता व्यक्तभावतः ॥५५६॥
आत्मा सामर्थ्यपर्याय-, व्यक्तीभावात् भवेत्प्रभुः
सिद्धोबुद्धोजिनेशाऽऽत्मा, स्वयम्भुर्भगवान् विभुः ॥५५७॥
अव्यक्तः सत्तया स्वाऽऽत्मा, व्यक्तोऽव्यक्तगुणादिभिः
अव्यक्ताः सन्ति सद्व्यक्ताः पर्यायाश्चगुणा निजे ॥५५८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मनोऽनन्त सामर्थ्यं, मात्मन्येवस्फुटं भवेत्;
कायादिमिश्रवीर्यात्स्वं, भिन्नं शुद्धं महद्बलम् ॥५५९॥
आत्मवीर्येणदेहस्य, सन्ति कम्पादिकाः क्रियाः
आत्मान मन्तरादेहो, मृतो भवति निश्चलः ॥५६०॥
आत्मानमन्तरादेहे-, ज्ञाता कोऽपि न विद्यते;
देहस्थोऽपि न देहोऽसौ, देहोमे ज्ञानवाँश्चसः ॥५६१॥
स्थूलः कृशश्चमेदेहो, ज्ञाता भिन्नोऽस्तिदेहतः
गृहाद्गृहीयथाभिन्न, स्तथाऽऽत्मादेहसंस्थितः ॥५६२॥
देहयोगेन यो देही, नष्टे देहे न नश्यति;
आत्माऽस्तिदर्शनज्ञान-, चारित्रगुणवान्स्वयम् ॥५६३॥
आत्मानःसङ्ख्ययाऽनन्ता, भिन्नाः प्रतिशरीरिणः
अनादिकालतःकर्म-, सङ्गिनः शाश्वताऽव्ययाः ॥५६४॥
सर्वकर्मविनाशाद्यो जीवो मुक्तो भवेत्प्रभुः
आत्मा पराऽऽत्मतां याति, सिद्धोबुद्धो भवेद्विभुः ॥५६५॥
स्वर्गार्थं न शुभं कर्म, कामयेऽव्यवहारतः
सर्वजीवोपकाराय, करोमिस्वाऽधिकारतः ॥५६६॥
सर्ववेदादिशास्त्राणां, सारोऽस्तितं वदाम्यहम्।
आत्मशुद्धिः प्रकर्तव्या, रागद्वेषविनाशतः ॥५६७॥
सर्वविश्वस्थधर्माणां, शास्त्राणां मर्म वेद्म्यहम्;
पुण्यं स्वर्गाय मुक्त्यर्थं, पापंस्यान्नरकायच ॥५६८॥
सर्वदर्शनसारोऽस्ति, मनोवाक्कायशुद्धितः
आत्मशुद्धिः प्रकर्तव्या, वदामीतिसुनिश्चयात् ॥५६९॥
सर्वदर्शनशास्त्रेषु, यत्सत्यंतत्समाचर;
स्याद्वाददृष्टितःसर्व-, सत्यांशान् यान्ति योगिनः ॥५७०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यग्दर्शनलब्धारो, सर्वदर्शनधर्मतः
सत्यंगृह्णन्ति सापेक्ष–, दृष्ट्या जैनाः शिवार्थिनः॥५७१॥
सम्यग्दृष्टिं हृदि प्राप्य, पश्चाद् भूत्वोपयोगिनः
स्वाऽन्यलिङ्गेषुसिद्धाये, सेत्स्यन्तिते च सर्वथा ॥५७२॥
सम्यग्दर्शनसम्प्राप्त्या, प्रादुर्भवति चेतने;
शुद्धोपयोगसामर्थ्यं, सर्वकर्मविनाशकम् ॥५७३॥
अनेकान्तमताऽम्भोधिः सम्यग्दृष्टिजनोऽस्तियः
सर्वधर्मस्यमर्माणि, जानाति साध्यलक्ष्यवान् ॥५७४॥
स्याद्वादनयसापेक्षा, ज्जिनाङ्गे सर्वदर्शनम्
भाति मया परिज्ञातं, स्याद्वादनयबोधतः ॥५७५॥
सर्वदर्शनसत्यांश–, दर्शकं जैनदर्शनम्;
सर्वकदाग्रहान्मुक्तं, शुद्धोपयोगदर्शकम् ॥५७६॥
रुणद्धिसत्यबोधेन, सर्वविश्वकदाग्रहान ;
सर्वदर्शनसद्रूपं, जयताज्जैनदर्शनम् ॥५७७॥
जैनदर्शनमाऽऽत्माऽस्ति, स्वाऽऽत्माऽहंजैनदर्शनी;
जिनश्चजैनरूपोऽहं, साध्यसाधनभावतः ॥५७८॥
मुक्त्यर्थंयोजिनैर्दिष्टो, जैनधर्मःसउच्यते,
आदर्शध्येयरूपोऽस्ति, पूर्णाऽऽत्मशुद्धिकारकः ॥५७९॥
आत्मनःपूर्णशुद्ध्यर्थं, जैनधर्मोऽस्ति साधनम्;
द्रव्यभावारिजेतारो, जैना जिनाऽनुयायिनः ॥५८०॥
जैनास्तु साधकाऽऽत्मानो, मोहनाशनतत्पराः
रागद्वेषविजेतारो, केवलज्ञानिनो जिनाः ॥५८१॥
जैनधर्मो जिनो जैन, आत्मैवचाऽऽत्मपर्यवाः
आत्मनःशुद्धपर्याय–, सिद्धरूप मुपास्महे ॥५८२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वदर्शनरूपाऽऽत्मा, दर्शनान्याऽऽत्मनःस्फुटम्
श्रुतज्ञानस्य पर्याया, मिथ्यासम्यक्स्वरूपिणः ॥५८३॥
साधिते जैनधर्मेस्युः सर्वधर्माः प्रसाधिताः
सर्वेधर्माःप्रगच्छन्ति, जैनधर्मं प्रति ध्रुवम् ॥५८४॥
सर्वदर्शनपर्यायाः संस्पृष्टास्त्याजिताश्चये;
केवलज्ञानलाभेन, प्रजायन्ते न ते पुनः ॥५८५॥
आत्मनः क्षायिकाद् भावात, केवलज्ञानदर्शनम्;
प्राप्तेरनन्तरं स्वाऽऽत्मा, परमाऽऽत्माध्रुवंभवेत् ॥५८६॥
शुद्धप्रज्ञासुषुम्णैव, भक्ति रिडैवसात्त्विकी;
पिङ्गलैव स्थिरप्रज्ञा, मेरुदण्डोऽस्ति धीरता ॥५८७॥
षट्स्थानकस्ययच्चक्रं, षट्चक्रंतन्निजाऽऽत्मनः
सम्यक्चारित्रमेवाऽस्ति, ब्रह्मरन्ध्रंनिजाऽऽत्मनि ॥५८८॥
अन्तराऽऽत्मा निजाऽऽधार-, चक्र मध्याऽऽत्मभावतः
स्वाऽधिष्ठानं स्थिरज्ञानं, ज्ञेय माऽऽत्मोपयोगतः ॥५८९॥
मणिपूरकचक्रंस्यात्, सम्यग्ज्ञानं प्रतिष्ठितम्;
धर्मध्यानंतु हृच्चक्रं, कण्ठचक्रं श्रुतमहद् ॥५९०॥
दर्शनज्ञानचारित्र, मेवाऽस्ति त्रिपुटी शुभा;
निर्विकल्पोपयोगोऽस्ति-, ब्रह्मरन्ध्रस्थितंमहः ॥५९१॥
प्राणायामस्तु सो बोध्यो, मार्गानुसारिसद्गुणाः
नेतिश्चित्तस्यसंशुद्धि, र्धौतिः सेवैव सात्त्विकी ॥५९२॥
बस्तिरेवगुरोर्बोधो, नौलिकमैव सत्क्रिया;
षट्चक्रदेवदेव्यस्तु, स्वाऽऽन्तरा आत्मवृत्तयः ॥५९३॥
ज्ञानयोगी विजानाति, षड्धास्थानकमाऽऽत्मनः
आत्मोपयोगतः षड्धा-, स्थानकचक्रमाऽऽत्मनि ॥५९४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञातं येन स मुक्तः स्यात्, सम्यग्दर्शननिश्चयात्;
आत्मोपयोगलीनत्वं, प्राप्यते ज्ञानयोगिभिः ॥५९५॥
मोहादिसर्ववृत्तीनां, लयो मोक्षो भवेत् खलु;
महावीरस्यनाम्ना त्वं, वीरे लीनो भवद्रुतम् ॥५९६॥
स्वयंभव महावीरो, वीराद्वीरः प्रकाशते;
सत्तयाऽऽत्ममहावीरो, व्यक्तःसो भवतिध्रुवम् ॥५९७॥
सत्त्वरजस्तमोवृत्ति, मोंहप्रकृतिरेवसा;
प्रकृतेर्भिन्नमाऽऽत्मानं, पुरुषमेव बोधत ॥५९८॥
आत्मनोऽसङ्ख्यनामान, तैराऽऽत्मानंविचारय;
त्वत्तः प्रकाशते विश्वं, स्वाऽऽत्मानंविध्धिसत्प्रभुम् ॥५९९॥
मां नय तमसो ज्योतिः परंब्रह्मजिनेश्वर !!
आत्माब्रूते निजाऽऽत्मान, मलक्ष्यो नैव लक्ष्यते ॥६००॥
आत्मोपयोगतोलक्ष्योऽ–लक्ष्य आत्मा निजाऽऽत्मना
अनुभवी विजानाति, स्ववेद्योऽहं चिदाऽऽत्मना ॥६०१॥
आनन्दज्ञानरूपोऽस्ति, सर्वजीवस्तथाऽऽत्मनः
ज्ञाता आत्मोपयोगेन, शुद्धनिश्चयबोधतः ॥६०२॥
एकाऽऽत्मा संग्रहेणस्या, चित्सत्तातः प्रवेदकः
आत्मसत्तोपयोगेन, सद्ब्रह्मैक्यं प्रवेद्म्यहम् ॥६०३॥
सिद्धदेवसमाः पूर्णा, आत्मानः सन्ति सत्तया;
आत्मोपयोगतः सिद्धो–भविष्यामि न संशयः ॥६०४॥
गच्छादिसम्प्रदायानां, चर्चासु न पतेत् सुधीः
सर्वगच्छेषु मोक्षोऽस्ति, साम्योपयोगतो ध्रुवम् ॥६०५॥
गच्छादिमतभेदानां, मोहान्मुक्तिर्न जायते
मुक्तिः कषायमुक्त्याऽस्ति, साम्यात् कषायमुक्तता ॥६०६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वगच्छेव्यवहारेण, वर्तिनां समभावतः
कषायमुक्तितो मुक्ति, र्भवेत्तत्र न संशयः ॥६०७॥
श्वेताम्बरमतेमुक्ति, स्तथा दैगम्बरे मते;
सर्वकषायमुक्तानां, समशुद्धोपयोगिनाम् ॥६०८॥
वैष्णवानाञ्च शैवानां, बौद्धानां ख्रीस्तिधर्मिणाम्;
महंमदीयलोकानां, भवेन्मोक्षः समत्त्वतः ॥६०९॥
रागद्वेषपरीणाम–, कषायत्यागमन्तरा;
सर्वधर्ममनुष्याणां, मोक्षः कदाऽपिनोभवेत् ॥६१०॥
उपयोगेन धर्मोऽस्ति, बन्धोऽस्ति परिणामतः
अधर्मोऽनुपयोगेन, क्रियातः कर्मबन्धनम् ॥६११॥
कर्मबन्धनकर्त्रीस्याद्, रागद्वेषयुता क्रिया;
कर्मबन्धनमुक्त्यर्थं, क्रिया स्वाऽऽत्मोपयोगिनी ॥६१२॥
सम्यग्दर्शनयुक्तानां, प्रशस्यपरिणामतः
अल्पोऽस्तिकर्मणांबन्धो, जायते निर्जराभृशम् ॥६१३॥
स्वल्पदोषमहाधर्मे, विज्ञाय सर्वकर्मसु;
सम्यग्दर्शनिजैनानां, वर्तनञ्च भवेत्सदा ॥६१४॥
त्यागिनाञ्चगृहस्थानां, सम्यग्दर्शनधारिणाम्;
आत्मोपयोगिनां सर्वाः प्रवृत्तयश्च मुक्तये ॥६१५॥
सम्यग्दर्शनयुक्तानां, पारम्पर्येण मुक्तये;
गार्हस्थ्ययोग्यकर्माणि, भवन्त्याऽऽत्मोपयोगिनाम् ॥६१६॥
पञ्चवर्णीयमृद्धोक्ता, शङ्खः स्वपरिणामतः
स्वयंश्वेतो भवेन्नूनं, तथा सम्यक्त्ववान्जनः ॥६१७॥
सविषोऽस्तियथा सर्पो, लोकानां प्राणनाशकः
तथा मिथ्यात्वयुक्तोऽस्ति, जीवः स्वाऽन्यविनाशकः॥६१८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्विषोऽस्ति यथा सर्पो, दंशान् नाऽन्यविनाशकः
सम्यग्दर्शनवान्जीव, स्तथास्वाऽन्याऽविनाशकः ॥६१९॥
पञ्चेन्द्रियैर्भवेद्भोगी, सम्यग्दर्शनवान् जनः
आत्मशुद्धोपयोगेन, स्वाऽल्पबन्धश्च मुक्तये ॥६२०॥
पशूनां रक्षणं कार्यं, पक्षिणाञ्चविशेषतः
यतना सर्वकार्येषु, कार्यं स्ववीर्यरक्षणम् ॥६२१॥
अन्नंजलञ्चवस्त्रञ्च, देयं तदर्थिने शुभम्;
यत्काले यच्चयोग्यं स्या, त्तद्देयं मुक्तिकामिभिः ॥६२२॥
मनोवाक्काययोगानां, बलवृद्धिश्चरक्षणम्;
आरोग्यंहि सदारक्ष्यम्, नारीभिश्चनरैर्ध्रुवम् ॥६२३॥
आत्मशुद्धोपयोगाय, आन्तरा बाह्यशक्तयः
प्राप्तव्याः सर्वथोपायै, र्वृद्धयुवकबालकैः ॥६२४॥
आजीविकादिसद्यत्नै, र्बाह्यदेहादिजीवनम्;
धार्यंसर्वजनैः सम्यग्, शुद्धोपयोगहेतवे ॥६२५॥
देहादिजीवनोपायै, र्जीव्यंस्वाश्रयिभावतः
स्वतंत्रंजीवनंधार्यं, निर्दोषमाऽऽत्मशुद्धिकृत् ॥६२६॥
क्षात्रकर्मचसद्विद्या, कृषिर्व्यापारकर्मच;
सेवा चेतैर्गृहस्थैर्हि, जीव्यमाऽऽत्मोन्नतेः कृते ॥६२७॥
आन्तरंजीवनं पोष्यं, प्रामाण्यस्वोद्यमादिकैः
आत्मोपयोगशुद्ध्यर्थं, सत्त्वजीवनकारणम् ॥६२८॥
रोगिभ्यऔषधादीनां, दानं शक्त्यऽनुसारतः
विद्यादानञ्च बालेभ्यो, देय माऽऽत्मोपयोगिभिः ॥६२९॥
गृहाऽऽगतस्यसत्कारः कर्तव्यो भोजनाऽऽदिभिः
आपत्कालेचदुर्भिक्षे, कर्तव्यं लोकपालनम् ॥६३०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूरिवाचकसाधूनां, वैयावृत्त्यं सुभावतः
कर्तव्यश्च तथा सेवा, भक्तिराऽऽत्मोपयोगिभिः ॥६३१॥

दानाद्यैराऽऽत्मशुद्धिःस्या, त्तथा सद्गुरुसङ्गतः
प्रादुर्भवति मोक्षार्थ, माऽऽत्मोपयोग आन्तरः ॥६३२॥

जातेर्लिङ्गस्यलक्ष्म्याश्च, देशस्यमोहवृत्तिभिः
धर्माऽभिमानवृत्त्याच, मोक्षोनृणां न जायते ॥६३३॥

आत्मनिगुणपर्यायाः, सत्तातः सन्त्यनादितः
सन्तोये कर्मणोनाशा, दाविर्भूता भवन्ति ते ॥६३४॥

आत्मनोगुणपर्याय-, व्यक्तये हेतवश्चये;
तेषां सदुपयोगेन, स्वाऽऽत्मा सिद्धोभवेत्स्वयम् ॥६३५॥

स्थावरतीर्थयात्राभि, राऽऽत्मशुद्धिः प्रजायते:
जङ्गमतीर्थयात्राभि, राऽऽत्मशुद्धिर्भवेद्द्रुतम् ॥६३६॥

ॐ अर्हंमन्त्रजापेन, चित्तशुद्धिर्भवेत्खलु;
ॐ ह्रीँ अर्हंमहावीर-, जापात् कर्मक्षयो भवेत् ॥६३७॥

आत्मोपयोगसिद्ध्यर्थं, भव्यैश्च विधिपूर्वकम्;
मन्त्रजापः सदाकार्यः पञ्चानां परमेष्ठिनाम् ॥ ॥६३८॥

सर्वयज्ञोत्तमोजापो, यज्ञः सेव्यो मुहुर्मुहुः
मानसिकमहाजापा, न्मोहवृत्तिलयोभवेत् ॥६३९॥

मन्त्रयोगेन शक्तीनां, प्रादुर्भावोभवेद्धृदि;
शुद्धोपयोगहेतूनां, मन्त्राणां जाप इष्यते ॥६४०॥

परब्रह्मोपयोगार्थं, स्मारकश्चाऽऽत्मतेजसाम्;
जाप्योऽर्हंश्रीमहावीर, पूर्णतेजोमयः प्रभुः ॥६४१॥

आत्मोपयोगतोऽनन्त-तेजोरूपश्चिदाऽऽत्मकः
प्रकाशेत हृदिव्यक्त, आत्मारामः सनातनः ॥६४२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चित्तैकाऽग्र्यंयदाध्येये, परब्रह्मणि जायते
तदाऽऽत्माऽऽनुभवःस्पष्टो, ह्येवं वेदितो मया ॥६४३॥
दृष्टिंसंस्थाप्यनाभौये, हृत्पद्मेच स्थिराऽऽत्मना
ध्यायन्ते ब्रह्मभूतास्ते, भवन्ति ब्रह्मदर्शनात् ॥६४४॥
साक्षात्कारः परायांस्या, नाभौत्राटकयोगतः
आत्मपारं न संयाति, वैखरी शब्दशक्तितः ॥६४५॥
सर्ववाचो निवर्तन्ते, ब्रह्मणोऽनुभवे स्फुटम्;
अनुभवः परायांस्याद्, ब्रह्मलीनमहर्षिणाम् ॥६४६॥
आत्मोत्थितापराभाषा, स्वाऽऽत्मज्ञानाऽवगाहिनी;
सत्यंप्रकाशतेब्रह्म, वैखर्या नैव वर्ण्यते ॥६४७॥
नाभौसंयमकर्तारो, ब्रह्मरूपं विजानते;
हृदिसंयमकर्तारः पश्यन्तीपारगामिनः ॥६४८॥
कण्ठेसंयमकर्तारो, मध्यमापारगामिनः
योगाऽनुभविनःसन्तो, भवन्तिब्रह्मरूपिणः ॥६४९॥
स्वाऽधिष्ठानेतथाऽऽधारे, चक्रेचमणिपूरके;
चक्षुषोर्नासिकाऽग्रेच, देयादृष्टिर्निजाऽऽत्मनः ॥६५०॥
दृष्टिंधृत्वाभ्रुवोर्मध्ये, ब्रह्मज्योतिःप्रलोकनम्;
त्राटकदृष्टितोध्येयं, ब्रह्मज्योतिःप्रकाशते ॥६५१॥
ब्रह्मरन्ध्रेमनोधृत्वा, तत्राऽऽत्मनः प्रधारणम्;
कर्तव्यंसविकल्पेन, पश्चात्स्यान्निर्विकल्पता ॥६५२॥
पिण्डस्थेनपदस्थेन, रूपस्थेननिजाऽऽत्मनः
ध्यानेनसत्परंज्योति, र्ब्रह्मपश्यन्ति योगिनः ॥६५३॥
निर्विकल्पंपरब्रह्म, ब्रह्मरन्ध्रे विचिन्तयेत्;
अन्यन्न चिन्तयेत्किञ्चि, न्निर्विकल्पोभवेत्ततः ॥६५४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्विकल्पदशाकाले, ब्रह्माऽऽनन्दः समुल्लसेत् ;
ततःपश्चादुपादेयं, शुद्धब्रह्मैवकेवलम् ॥६५५॥
नाऽन्यत् किञ्चिदुपादेयं, भवेदाऽऽत्मोपयोगिनाम्
शुद्धोपयोगआदेयः स्वभावेनभवेत्स्वयम् ॥६५६॥
शुभोपयोग एवाऽस्ति, सविकल्पसमाधयः
शुद्धोपयोग एवाऽस्ति, निर्विकल्पसमाधयः ॥६५७॥
प्रशस्यरागयोगेन, सविकल्पत्वमिष्यते;
रागद्वेषौनयत्रस्त, स्तद्ध्यानंनिर्विकल्पकम् ॥६५८॥
शस्यरागविकल्पाना, मुपयोगेऽस्तिसम्भवः
शुभोपयोग इष्यः सः शुद्धोविकल्पमन्तरा ॥६५९॥
रागद्वेषादिसङ्कल्प-विकल्पानांसमुद्भवः
नाऽस्तियत्रसबोद्धव्यः शुद्धोपयोगइष्टदः ॥६६०॥
मनोवाक्कायगुप्त्याच, निर्विकल्पोपयोगतः
प्रादुर्भवन्तिवेगेन, स्वाऽऽत्मनोलब्धिसिद्धयः ॥६६१॥
प्रथमःसविकल्पोऽस्ति, स्वोपयोगःशुभङ्करः
विकल्पध्यानतःपश्चा, न्निर्विकल्पंप्रकाशते ॥६६२॥
निर्विकल्पोपयोगेन, केवलज्ञानभास्करः
प्रादुर्भवतिसःसत्य-लोकाऽलोकप्रकाशकः ॥६६३॥
आत्मधर्मपरीणामः शुभःशुद्धश्चहार्दिकः
समाधिरेवबोद्धव्यः सम्यग्दृष्टिमनीषिभिः ॥६६४॥
मनोवाक्काययोगाना, माऽऽरोग्यंचप्रवर्तनम् ;
समितिगुप्तिसत्कर्म, समाधियोगउच्यते ॥६६५॥
मनोवाक्काययोगानां, धर्ममार्गप्रवर्तनम् ;
बाह्यआभ्यन्तरोयोगो, द्रव्यतोभावतस्तथा ॥६६६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षट्चक्रेषुमनःस्थैर्यं, कृत्वाब्रह्मविचारणा ;
कर्तव्यास्वोपयोगेन, सर्वशक्त्युद्भवस्ततः ॥६६७॥

ध्यानसमाधियोगाद्याः सन्ति मोक्षस्यहेतवः
मोक्षसाधनतोभिन्नं, शुद्धाऽऽत्मानंविचारय ॥६६८॥

चित्तस्यमोहवृत्तीनां, निरोधोयोगउच्यते ;
योगस्यलक्षणंह्येतत्, क्षायिकभावयौगिकम् ॥६६९॥

अप्रशस्यकषायाणां, निरोधोयोगउच्यते
सम्यग्दृष्टिगुणस्थान, माऽऽरभ्यवर्त्तते हृदि ॥६७०॥

शस्यकषाययुक्तानां, सेवाभक्त्याऽऽदिकर्मणाम्
व्यापारःशुभयोगोऽस्ति; जायतेमुक्तिकाङ्क्षिणाम् ॥६७१॥

सर्वज्ञधर्मवाञ्छात, इच्छायोगःप्रवर्त्तते;
सद्देवगुरुसेवार्थं, तीव्रेच्छा हृदिजायते ॥६७२॥

सर्वकर्मविमोक्षार्थं, मिच्छाऽपूर्वा हृदिस्फुटा;
इच्छायोगोऽस्तिचाद्यःसो, मार्गानुसारिणांचयः ॥६७३॥

सर्वज्ञोक्तेमहाश्रद्धा, शास्त्रयोगःसउच्यते;
धर्मशास्त्रंसमाश्रित्य, सम्यग्दृष्टिःप्रवर्त्तते ॥६७४॥

सर्वज्ञवीरदेवोक्त–, धर्मशास्त्रावलम्बनम् ;
स्याद्वाददृष्टिसापेक्ष–, शास्त्रयोगःप्रवर्तते ॥६७५॥

शास्त्रयोगबलेनैव, सामर्थ्ययोगआत्मनि;
उद्भवेद्धर्मकार्याणां, व्यापारेण व्रतैषिणाम् ॥६७६॥

देशविरतिमाऽऽरभ्य, सामर्थ्ययोगवर्त्तनम् ;
क्षीणमोहगुणस्थानं, यावदस्तिसयोगिनाम् ॥६७७॥

श्रावकाणाञ्चसाधूनां, व्रतादिधारणंशुभम्,
षडाऽऽवश्यककृत्याद्यैः सामर्थ्ययोग इष्टदः ॥६७८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दानशीलतपोभावैः सामर्थ्ययोगवर्धनम्;
देवसद्गुरुपूजाऽऽद्यै, राऽऽत्मवीर्यप्रकाशते. ॥६७९॥

योगिनांकेवलज्ञानं, सामर्थ्ययोगतोभवेत्;
सर्वकर्मक्षयोमोक्षो, जायते च सयोगिनाम्. ॥६८०॥

आत्माऽसंख्यप्रदेशाना, मरूपिणांनखण्डनम्;
छेदनंभेदनंनैव, पृथक्त्वं न स्वभावतः ॥ ६८१ ॥

आत्माऽसंख्यप्रदेशास्ते; कर्मसम्बन्धयोगतः
देहंप्रमाणंसंकोचं, विकाशं चधरन्तिये ॥६८२॥

कर्मसम्बन्धमुक्तास्ते, निर्मलाएकरूपिणः
न संकोचंविकासं ते, प्राप्नुवन्ति सदास्थिराः ॥६८३॥

प्रतिप्रदेशमानन्त्यं, ज्ञानादीनामनादितः
अनन्तागुणपर्याया, आत्मनि सन्ति सर्वदा ॥६८४॥

मनोवाक्कायगुप्त्यायत्, सामर्थ्य माऽऽत्मनः स्फुटम्;
व्याप्रियते हि मुक्त्यर्थं, सामर्थ्ययोग इष्यते ॥६८५॥

सन्तियोगा असंख्याता, बाह्यान्तरप्रभेदतः
एकैकयोगमाश्रित्य, अनन्ता मोक्षगाजनाः ॥६८६॥

उपशमादिभावेन, स्वाऽऽत्मन आन्तराःखलु
शुभशुद्धपरीणाम–योगा भवन्ति धर्मिणाम्; ॥६८७॥

आत्मनः पूर्णशर्मार्थं, मसंख्ययोगहेतुता;
ज्ञात्वाऽऽत्माऽऽनन्दलाभार्थं, निश्चयंकुरुभावतः ॥६८८॥

मुक्त्वाऽऽत्मानं त्रिलोकस्य, पदार्थैर्न सुखं भवेत्;
सुखाम्भोधिंस्वयं ज्ञात्वा, स्वाऽऽत्मनि त्वं स्थिरो भव।६८९

भ्रामं भ्रामं भृशं भ्रान्त्वा, जगत्सर्व मनेकशः
सुखार्थी न सुखं प्राप्त, आत्मनि शर्म शोधय ॥६९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाह्यसुखस्य कामाऽब्धेः पारं यातो न यास्यसि;
इन्द्रादिकभवेष्वेव, भोगा भुक्ता अनन्तशः ॥६९१॥
ज्ञात्वैवं भ्रान्तिमुत्सृज्य, स्वाऽऽत्मनि सुखनिश्चयम्;
कुरु शुद्धोपयोगेन, बाह्येषु निःस्पृहो भव ॥६९२॥
यदा पूर्णः प्रजायेत, स्वाऽऽत्मनि सुखनिश्चयः
तदासन्तोषवानाऽऽत्मा, भवत्येव महाप्रभुः ॥६९३॥
यावद्बाह्येसुखाशाऽस्ति, तावद् दुःखं प्रजायते
सन्तोषो न भवेत् पूर्णो, मनो भ्राम्यति भूतवत् ॥६९४॥
बाह्यसुखाय यत्प्रेम, तत्प्रेम दुःखदं भृशम्;
सुखीभूतो न लोकेऽस्मिन्, कोऽपिसत्यं विचारय ॥६९५॥
शुद्धोपयोगतः प्रेम, सुखार्थं मुत्तरोत्तरम्;
क्रमेणजायते शुद्ध, माऽऽत्मसिद्धिप्रदायकम् ॥६९६॥
जातेशुद्धोपयोगेहि, बाह्येषुकामवासना;
नश्यति निश्चयं तस्य, यान्ति शुद्धोपयोगिनः ॥६९७॥
बाह्यभोगपराधीनो, जडमोही प्रजायते;
भूत्वा दासस्यदासोऽसौ, मृत्वा याति च दुर्गतिम् ॥६९८॥
बाह्यभोगेषु निर्लेपः स्वाश्रयीच दमी शमी;
स्वतन्त्रोयोऽस्ति सन्तोषी, मृत्वा सो याति सद्गतिम् ६९९
निद्रा मिथ्यात्वबुद्धिर्या, स्वप्नो वैभाविकीदशा,
अन्तराऽऽत्मदशा जाग्रद्, क्षयोपशम भावतः ॥७००॥
तुर्योज्जाग्रद्दशापूर्णा, केवलज्ञानरूपिणी
आत्मज्ञानोद्भवाजाग्र,-द्दशा सम्यक्त्वसंजुषाम् ॥७०१॥
आत्मोपयोगिनो जाग्रद्,-द्दशां यान्ति विवेकतः
अतिजाग्रद्दशां प्राप्य, जीवन्मुक्ता भवन्ति ते ॥७०२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देहेस्थितेऽपिवैदेहा, आघातिकर्मभोगिनः
सर्वविश्वस्यकल्याणं, कुर्वन्ति देशनादिभिः ॥७०३॥

त्यक्त्वा निद्रादशां घोरां, स्वप्नस्यविकलांदशां;
जाग्रद्दशां च संप्राप्य, सम्प्रति जागृहि स्वयम् ॥७०४॥

उत्तिष्ठ जागरूकस्त्व, मात्मधर्मे रतो भव
आत्मनि स्वाऽऽत्मबुद्धित्वं, धारय स्वीयवीर्यतः ॥७०५॥

अन्यतीर्थेषुसिद्धानां, सम्यग्दर्शनमस्तिता;
सम्यग्दर्शनलाभेन, समभावः प्रजायते ॥७०६॥

सम्यक्त्वमन्तरासाम्यं, नोद्भवेत् सर्वधर्मिषु;
मिथ्याबुद्धिः प्रणश्येन्न, सम्यग्दर्शनमन्तरा ॥७०७॥

अन्यदर्शनधर्मेषु, यत्सत्यंदृश्यतेसता,
तत्सत्यं श्रीजीनेन्द्राणां, वचोवारिधिनिःसृतम् ॥७०८॥

नयसापेक्षबोधेन, स्वाऽन्यशास्त्रप्रवाचनम्;
सम्यग्दृशाश्वतत्सर्वं, सम्यग्ज्ञानस्य पुष्टये ॥७०९॥

अध्यात्मज्ञानचारित्र,-लाभः सम्यक्त्वदर्शनात्;
जागर्तिस्वाऽऽत्मनो दृष्टिः शुद्धोपयोगरूपिणी ॥७१०॥

कर्मकर्त्ताचतद्भोक्ता,-हर्ता स्वाऽऽत्मास्वयंभवेत्;
कर्मविपाकवेलायां, परो नैमित्तकस्तथा ॥७११॥

कर्मजन्येसुखेदुःखे, मित्रं शत्रु नं कल्पते;
अन्यंच कर्मरूपज्ञः शुद्धोपयोगवान्जनः ॥७१२॥

कर्मजन्यं सुखंदुःख, माऽऽत्मना तदुपार्जितम्;
स्वकृतकर्मभोगेषु, कुप्य मा तुष्य देहिषु ॥७१३॥

सुखदुःखप्रदंकर्म, तत्कर्ताऽऽत्माऽस्ति सर्वथा;
ज्ञात्वैवं समभावेन, कर्म भुञ्जन्ति पण्डिताः ॥७१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जानन्तिज्ञानिनः सत्यं, कर्मणो गहनां गतिम्;
प्राप्ते सुखे च दुःखे ते, नैव मुह्यन्ति मोहतः ॥७१५॥
कर्म कर्त्रस्तिकर्मैव, शुद्धनिश्चयदृष्टितः
कर्मकर्ताऽस्ति चाऽऽत्मैव, नयात्तुव्यवहारतः ॥७१६॥
रागद्वेषादिकं भाव,-कर्माऽस्ति जिनभाषितम्
अष्टधाकर्मणांभेदा, द्रव्यकर्माऽस्ति निश्चिनु ॥७१७॥
दिव्यमौदारिकं देहं, नोकर्म कर्मबन्धने;
हेतुश्च कर्ममुक्त्यर्थं, मोहिनां ज्ञानिनांक्रमात् ॥७१८॥
अन्तर्मुहूर्तवेलायां, सर्वकर्मक्षयङ्करः;
आत्मज्ञानीभवत्येव,शुद्धोपयोगशक्तितः ॥७१९॥
जीवेऽजीवे न तुष्यन्ति, द्विष्यन्ति न जडाऽऽत्मसु;
कर्मरूपंहिविज्ञाय; ज्ञानिनःसमदर्शिनः ॥७२०॥
तीव्रनिकाचितव्यक्त-प्रारब्धकर्मवेदिनः
नवकर्म नबध्नन्ति, स्वाऽऽत्मोपयोगधारिणः ॥७२१॥
उच्चत्वंनचनीचत्वं, शुभाऽशुभेषुकर्मसु;
अध्याऽऽत्मज्ञानिनोज्ञात्वा, वर्तन्ते कर्मभोगिनः ॥७२२॥
औदयिकशुभेनैव, निजमुच्चा न जानते;
औदयिकाऽशुभेनैव, नीचा निजं न जानते ॥७२३॥
कर्मजन्योच्चनीचत्वाद्, भिन्नंजानन्ति ते निजम्;
आत्मास्वभावतोनीच; उच्चोनचाऽगुरुर्लघुः ॥७२४॥
एवंविज्ञायवर्तन्ते, शुद्धोपयोगिनोजनाः
द्वेषिणामुपरिप्रेम,-कारुण्यभावधारकाः ॥७२५॥
शत्रुषुशत्रुबुद्धिर्न, प्रेम्णा द्वेषोपशामकाः
स्वस्याऽशुभप्रकर्तारं, नाऽन्यंजानन्ति कोविदाः ॥७२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोटिशास्त्रस्य पाण्डित्या, न्नकिञ्चिद्गर्वधारकाः
चक्रवर्त्तिपदं प्राप्य, मन्यन्ते न निजं प्रभुम् ॥७२७॥

आत्मोपयोगिनोरङ्क,-दशायां नैवदुःखिनः
लघुत्वंच प्रभुत्वं स्वं, मन्यन्ते नैव कर्मतः ॥७२८॥

लोकरूढ्यनुदासैर्यं, च्छुभाऽशुभं च कल्पितम्;
शुद्धोपयोगिनः सन्तः, स्तत्रस्वातन्त्र्यवर्तिनः ॥७२९॥

प्रतिष्ठामानसत्कीर्ति,-बाह्यशर्मादिहेतवे
यावच्चित्तस्य चाञ्चल्यं, ताव दुःखोदधिः स्वयम् ॥७३०॥

प्रतिष्ठामानसत्कीर्ति,-बाह्यशर्म विनिर्गतम्;
मनोयस्यसदातस्य, ब्रह्मशर्मोदधिः स्वयम् ॥७३१॥

सद्गुरुकृपया तूर्णं, मुत्थित आत्मशुद्धये;
आत्मोपयोगसामर्थ्यात्, करिष्ये स्वाऽऽत्मशुद्धताम्॥७३२॥

दुष्कृतमद्यपर्यन्तं, कृतं कारापितं च यत्;
मनोवाक्काययोगैस्त, न्निन्दामि स्वोपयोगतः ॥७३३॥

अनन्तभवबद्धंयत्, कर्म शुद्धोपयोगतः
तत्सर्वंक्षणमात्रेण, नश्येत्तत्र न संशयः ॥७३४॥

क्षयोपशमभावेन, स्वाऽऽत्मनः प्राप्तिराऽऽत्मना;
भूता पूर्णाञ्च सद्भावि,-न्येव क्षायिकभावतः ॥७३५॥

आत्मनः शुद्धरागेण, यथाशक्तिप्रवृत्तितः
पूर्णशुद्धाऽऽत्मलक्ष्येण, सञ्जीवामि यथातथम् ॥७३६॥

सद्गुरुकृपयाऽवाप्त, माऽऽत्मज्ञानं सुखावहम्;
अनन्तं जीवनं नित्यं, प्राप्तं सत्यं वहाम्यहम् ॥७३७॥

बहिरन्तर्जगत्सर्वं, चिदानन्दाय साधनम्;
जातं निःसाधनं चैव, जानताऽपि न कथ्यते ॥७३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाऽहं कस्याऽपिनाकोऽपि, ममैवं पूर्णनिश्चयः
सर्वस्थोऽपि न सर्वोऽहं, मलक्ष्यो बाह्यलक्षणैः ॥७३९॥
सच्चिदानन्द आत्माऽस्मि, स्वाऽऽत्मनि स्वोऽनुभूयते;
तद्वक्तुं न समर्थोऽस्मि, ब्रह्मज्ञोऽऽपि स्वभावतः ॥७४०॥
ज्ञाता ज्ञेयंच ज्ञानं त, दाऽऽत्मैवाऽह मपेक्षया;
अन्तवन्तस्तु देहाद्या, अनन्त आत्मराट् स्वयम् ॥७४१॥
अन्तवत्सु न मुह्यामि, पुद्गलेषु न पुद्गली;
सिद्धोऽहमाऽऽत्मसाध्योऽस्मि, निमित्तैर्भिन्नवानहम् ॥७४२॥
निर्लेपीभूयसज्ज्ञानं, प्राप्य शैलूषवच्चये;
सम्बन्धेषुचकार्येषु, वर्तन्ते ज्ञानिनः स्फुटम् ॥७४३॥
सर्वसम्बन्धकार्येषु, स्वाऽऽत्मानंसाक्षिभाविनः
कर्तारं चैव हर्तारं, निजं जानन्ति वस्तुतः ॥७४४॥
अतः शुभाऽशुभेनैव, मन्यन्ते बाह्यवस्तुषु;
कर्मोदयविपाकेषु, येबहुरूपिवेषवत् ॥७४५॥
सम्यग्दृष्टिगुणस्थान,–वर्तिसम्यत्त्वशालिनाम् ;
सर्वविरतिचारित्र,–ग्रहणेच्छा प्रवर्तते ॥७४६
सन्तितेऽविरताः स्पष्टं, सम्यग्दृष्टिमनीषिणः
तद्व्यंपिव्रतरागेण, स्वाऽऽत्मलक्ष्योपयोगिनः ॥७४७॥
गृहस्था विरताः सन्ति, निर्लेपागृहसंस्थिताः
कुटुम्बादिककार्याणां, कारका जैनधर्मिणः ॥७४८॥
द्वादशभिः कषायैस्ते, युक्ता व्रताऽभिलाषिणः
सम्यक्त्वदर्शनाचारै, र्युक्ताःस्युर्मोक्षमार्गिणः ॥७४९॥
सद्देवगुरुधर्माणां, साधका मोहवारकाः
चरस्थावरतीर्थानां, पूजासेवाविधायिनः ॥७५०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीतार्थसद्गुरोराज्ञा,-धारकाः सर्वकर्मसु
प्रत्याऽऽख्यानोदयेनैव, गृहस्थाऽऽवासवर्तिनः ॥७५१॥

देशतोविरतिंप्राप्य, त्यागधर्मानुरागिणः
मन्यमाना गृहाऽऽवासं, पाशवज्जैनधर्मिणः ॥७५२॥

ब्राह्मणाः क्षत्रियावैश्याः शूद्रा ये जैनधर्मिणः
गुणकर्मव्रताद्यैस्ते, भवन्ति मुक्तिगामिनः ॥७५३॥

धर्मराज्यमहीवित्त-स्वकुटुम्बादिरक्षिणः
आत्मोपयोगयुक्तास्ते, मुक्ताः सन्तिगृहस्थिताः ॥७५४॥

धर्मयुद्धादिकर्माणि, चावश्यकानिशक्तितः
कुर्वन्तिगृहिणोजैना, देशविरतिधारिणः ॥७५५॥

देशविरतितोऽनन्त,-गुणश्रेष्ठाः सुसाधवः
आत्मोपयोगिनः सन्तो, रत्नत्रयीप्रसाधकाः ॥७५६॥

मेरुवत्साधवोबोध्याः सर्षपवद्गृहस्थिताः
गृहस्थैः साधवः पूज्या, वन्द्याश्चविधिपूर्वकम् ॥७५७॥

संज्वलनकषायेण, युक्ताः पञ्चव्रतस्थिताः
सरागसंयमव्यक्ताः प्रमादिनोऽप्रमादिनः ॥७५८॥

शस्यरागादिभिर्युक्ताः सम्प्रतिपञ्चमारके;
श्रमण्यः साधवः सन्ति, सूरयोवाचकाः शुभाः ॥७५९॥

आत्मोपयोगयुक्तास्ते, सक्रियानिष्क्रियाश्चये;
सुखदुःखप्रसङ्गेषु, स्वाऽऽत्मनः शुद्धिकारकाः ॥७६०॥

शुभाऽशुभविपाकानां, भोक्तारोऽपिह्यभोगिनः
देहेऽत्रवर्त्तमानास्ते, मोक्षाऽनुभववेदिनः ॥७६१॥

ध्यानसमाधियोगेन, मुक्तिशर्माऽनुभूयते
क्षयोपशमभावेन, मया प्राप्तः प्रभुर्महान् ॥७६२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वोत्कृष्टसमाधिर्हि, शुद्धोपयोगएव सः
समत्वमुपयोगोऽस्ति, पूर्णानन्दमयः प्रभुः ॥७६३॥
इहैववेद्यतेसत्यं, मुक्तिःसुखं मयाऽधुना
क्षयोपशमभावीय-शुद्धोपयोगभावतः ॥७६४॥
सर्वदोषविनिर्मुक्तः सर्वोपाधिविवर्जितः
आधिव्याधिविनिर्मुक्तो, ब्रह्मानन्दः प्रवेद्यते ॥७६५॥
सर्वविषयभोगेभ्यो, भिन्नं शुद्धं च निर्मलम्
ज्ञानानन्दमयंब्रह्म, स्वनुभूतंमयामयि ॥७६६॥
निर्विकल्पंनिराधारं, पूर्णं च सत्तयामहद्
चिदानन्दमयंब्रह्म, स्वोपयोगेन वेद्यते ॥७६७॥
पूर्णक्षायिकभावेन, पूर्णशुद्धाऽऽत्मनोमम;
आविर्भावस्यसिद्ध्यर्थं, मुद्यतस्वोपयोगतः ॥७६८॥
आत्मनोगुरुराऽऽत्मास्ति,-शुद्धोपयोगवान्स्वयम्;
स्वनुभूतोमयाध्याने, स्वनुभवन्तुपण्डिताः ॥७६९॥
देहस्थोऽत्रप्रभुर्व्यक्त, आत्मैवमिलितोमहान्;
क्षयोपशमभावेन, स्वनुभूतो मयामयि ॥७७०॥
माध्यस्थ्यादिगुणैर्युक्ता, व्यवहारनयाऽऽश्रिताः
शुद्धोपयोगयोग्यास्ते, गुरुस्वाऽर्पणकारिणः ॥७७१॥
धीरावीराश्चगम्भीरा, आत्मज्ञानाऽधिकारिणः
मोक्षार्थमुत्थिताभव्या, गुरुपार्श्वेनिवासिनः ॥७७२॥
सहवासंचिरंकृत्य, परीक्ष्याऽनेकहेतुभिः
विधिपूर्वंसुशिष्येभ्यो, देयंज्ञानंशुभाशिषा ॥७७३॥
गुरोरनुभवंप्राप्य, प्रीतिश्रद्धादिसद्गुणैः
आत्मज्ञानं हृदिव्यक्तं, भक्ताः कुर्वन्तितत्क्षणम् ॥७७४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कोट्युपायैर्मिलेद्यन्न, तन्मिलेत्कृपयागुरोः
गुरुकृपांविनाशुद्धः उपयोगो न जायते ॥७७५॥

सद्गुरुद्रोहिदुष्टानां, कोटिशास्त्राऽवगाहिनाम्;
आत्मज्ञानं स्फुरेन्नैव, कोट्युपायैर्जगत्त्रये ॥७७६॥

गुरुकृपांविनाऽध्यात्म–कोटिग्रन्थप्रवाचनैः
आत्मज्ञानं हृदिव्यक्तं, जायते नैव निश्चयः ॥७७७॥

सद्गुरोराऽऽत्मरूपाणां, क्षमादिगुणसंजुषाम्
सुशिष्याणांचभक्ताना, मस्तिज्ञानस्ययोग्यता ॥७७८॥

परीक्षांयुक्तितः कृत्वा, परीक्षायोग्यसाधनैः
आत्मज्ञानरहस्यंतु, देयं भक्ताय भावतः ॥७७९॥

अयोग्यभक्तशिष्याणां, ज्ञाने दत्तेपदेपदे
बालहत्यादिकंपापं, गुरूणामपिजायते ॥७८०॥

गुर्वाज्ञैवप्रभोराज्ञा–मन्तारो भक्तदेहिनः
गुर्वाज्ञापारतन्त्र्येण, लभन्ते गुरुमर्म ते; ॥७८१॥

गुरुहार्दमिलेत्पूर्णं, सद्गुरोराशिषाध्रुवम्;
शुद्धोपयोगसम्प्राप्तिः सद्गुरोः पादसेवया ॥७८२॥

भक्तानां योग्यसाधूनां, गीतार्थपादसेविनाम्
शास्त्राऽभ्यासंविनाऽध्यात्म–ज्ञानंहृदि प्रकाशते ॥७८३॥

सद्गुरोराऽऽत्मभूताये, गुरुस्वाऽर्पणकारकाः
भवन्तितेगुरुप्रीत्या, स्वयं शुद्धोपयोगिनः ॥७८४॥

प्रादुर्भूता हृदिस्पष्टा, शुद्धोपयोगभावना
लिखिताःकाव्यरूपेण, विश्वकल्याणहेतवे ॥७८५॥

यादृशी स्फुरणोत्पन्ना, तादृशीलिखितामया
अनुक्रमो न तत्राऽस्ति, पुनर्दोषो न चाऽऽत्मनि ॥७८६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अध्याऽऽत्मज्ञानलाभार्थं, माऽऽत्मज्ञानाऽधिकारिणाम्
शुद्धोपयोगनाम्नाऽयं, कृतो ग्रन्थो मया शुभः ॥७८७॥

कृतेशुद्धोपयोगेयत्, फलंभूतं च तेन तत्
विश्वस्थसर्वजीवानां, शान्तिर्भवतुशाश्वती ॥७८८॥

शुद्धोपयोगशास्त्रेण, सर्वसंघोन्नतिर्भवेत्
सर्वविश्वस्थपापानि, नश्यन्तु तत्प्रवृत्तितः ॥७८९॥

शुद्धोपयोगशास्त्रस्य, श्रोतारो ये च वाचकाः
सद्गुर्वाज्ञापराः शान्तिं, यान्तुपूर्णसुखश्रियम् ॥७९०॥

शुद्धोपयोगनाम्नोऽस्य, ग्रन्थस्यमर्मवेदिनः
गीतार्थगुरुसेवायाः–कर्तारो यान्तुतत्फलम् ॥७९१॥

गीतार्थगुरुभक्तानां, श्रोतृवाचकदेहिनाम्
शुभाऽशीर्मेभवत्वेवं, स्वर्गसिद्धिप्रदायिका ॥७९२॥

सर्वसंघोन्नतिर्भूया, च्छान्तिः सर्वत्रवर्तताम्
शान्तिस्तुष्टिश्चपुष्टिश्च, भूयात्सर्वत्रमङ्गलम् ॥७९३॥

सर्वजीवाः सुखं यान्तु, दुःखं नश्यतु देहिनाम्
पुण्यकर्माणि वर्धन्तां, नश्यन्तु पापवृत्तयः ॥७९४॥

पापकर्माणि नश्यन्तु, प्रादुर्भवन्तु धर्मिणः
विश्वोद्धारस्यकर्तारः प्रादुर्भवन्तु सूरयः ॥७९५॥

शुद्धोपयोगबोधेन, लोका भवन्तु धर्मिणः
अधर्मदुःखनाशोऽस्तु धर्मः सर्वत्र वर्धताम् ॥७९६॥

योगिनो ज्ञानिनः सन्तो, विश्वशान्तिप्रदायकाः
प्रादुर्भवन्तु राजानो, मन्त्रिणो धर्ममूर्तयः ॥७९७॥

विश्वशान्तिप्रदं सत्यं, धर्ममङ्गलशर्मदम्
सर्वधर्मोत्तमं पूर्णं, जयताज्जैनशासनम् ॥७९८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वदेवाऽधिदेवोयः सर्वज्ञः सर्वशक्तिमान्
वर्धमानो महावीरो, विश्वस्याऽस्तु प्रशान्तये ॥७९९॥
शुद्धोपयोगकर्ताऽयं, ग्रन्थो विश्वप्रशासकः
आचन्द्रार्कमहींयाव, ज्जीवतुधर्मधारकः ॥८००॥
विक्रमाब्दे निधिद्वीपे (१९७९) निधिचन्द्रेशुभाश्विने
दशम्यां शुक्लपक्षस्य, प्रभाते गुरुवासरे ॥८०१॥
अष्टशतैः शुभैः श्लोकैः शुद्धोपयोगकारकः
शुद्धोपयोगनामाऽयं, ग्रन्थोजीयाज्जगत्तले ॥८०२॥
शुद्धोपयोगनामाऽयं, ग्रन्थः कल्याणकारकः
विद्यापुरेकृतः प्रीत्या, बुद्धिसागरसूरिणा ॥८०३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जैनाचार्य्यबुद्धिसागरसूरिविरचितः

# दयाग्रन्थः

परब्रह्ममहावीर, वीतराग नमोऽस्तुते
त्वदुक्तसद्दयाबोधात्, दयाग्रन्थं करोम्यहम् ॥ १ ॥
दयासमो महाधर्मो, न भूतो न भविष्यति
दयायामीश्वराऽऽवासो, धर्ममूलं दयाशुभा ॥ २ ॥
अहिंसा परमोधर्मो, धर्मोनाऽस्ति दयांविना
दयैवपरमं सत्यं, दयैव परमं तपः ॥ ३ ॥
अहिंसैवमहायज्ञो, दयैव प्रभुसाधना,
नाऽस्ति दयासमा सेवा, भक्तिर्नाऽस्तिदयासमा ॥ ४ ॥
दयैव सर्वधर्माणां, सारश्चित्तस्यशुद्धिकृत् ।
हिंसा पापस्यमूलं च, धर्ममूलं दया सदा ॥ ५ ॥
दयार्थं सत्यमस्तेयं, ब्रह्मचर्यं प्रकाशितम्
दयार्थं च क्षमात्यागो, दानं च यतना शुभा ॥ ६ ॥
दया यत्र प्रभुस्तत्र, सत्यं सत्यं वदाम्यहम्;
सर्वजीवस्यरक्षार्थं, दयां दानं समाचरम् ॥ ७ ॥
दयायां वेदवेदान्त–रहस्यंमाति सर्वथा;
दयामूलं प्रभोःसूक्तं, पापमूलंकुवासना ॥ ८ ॥
दयैव देवपूजाऽस्ति, दयैव तीर्थसेवनम्;
मनोवाक्काययोगेन, दया कृत्यं कुरुष्व भोः ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्वादिखादकालोका, निर्दया राक्षसाभुवि
हिंसायांधर्ममन्तारो, यान्तिश्वभ्रं हि हिंसकाः ॥ १० ॥

दुःखस्यवल्लिका हिंसा, स्वर्गमूलं दयास्मृता;
अनन्तादेहिनोमुक्तिं, याता यास्यन्त्यहिंसया ॥ ११ ॥

देव्योदेवाश्चसद्भक्ता, मांसंखादन्ति नैव ते
हिंसया पापयज्ञाः स्यु, धर्मयज्ञा अहिंसया ॥ १२ ॥

अहिंसैव प्रभोर्धर्मो, हिंसायां धर्मशून्यता;
पशुपक्षिमनुष्याणां, दयायां धर्मउच्यते ॥ १३ ॥

पापमूलं मदोज्ञेयः पापं जीवोपपीडनात्;
परोपकारसन्मूलं, दयां चित्ते प्रधारय ॥ १४ ॥

धर्ममाता दयैवस्यात्, मातानाऽस्ति दयासमा
सात्विक्यऽस्ति दयादेवी, धर्मस्य जननी सदा ॥ १५ ॥

धर्मोत्पत्तिरहिंसातो, हिंसातः पापसंभवः
प्रेरणैवं प्रभोःसत्या, सतां हृत्सुस्वभावतः ॥ १६ ॥

आत्मशुद्धिरहिंसातः सर्वत्रसर्वदेहिनाम्
प्रभोप्राप्तिरहिंसात, आत्मासाक्षाद् भवेत्प्रभुः ॥१७॥

मनोवाक्कायतोहिंसां, त्यजन्तिसत्यसाधवः
रागद्वेषपरीणाम, एव हिंसाऽस्ति चाऽन्तरा ॥१८॥

क्रोधान्मानात्तथादंभा, ल्लोभाद्भयाच्चदेहिनः
स्वाऽन्यहिंसांप्रकुर्वन्ति, व्रजन्तिभवसागरम् ॥१९॥

षट्कायजीववृन्दानां, रक्षकाः साधवः शुभाः
यान्तिमोक्षंदयावन्त स्तत्रकिञ्चिन्नसंशयः ॥२०॥

यस्यचित्तेदयानास्ति, तच्चित्ते न प्रभुर्वसेत्
यदाऽऽत्मनिदयावास, ईश्वरः सः प्रभुर्महान् ॥२१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयावन्तोजनादेवा–निर्दयाराक्षसाः स्मृताः
दयावृत्तिंविनालोकाः स्वर्गसिद्धिं न यान्ति ते ॥२२॥

सर्वदर्शनधर्माणां, सत्यसारंवदाम्यहम्
पुण्याद्यर्थंदयाकार्या, हिंसात्याज्याविवेकिभिः ॥२३॥

दयैवसत्यशौचार्थं, पवित्रार्थंदयांकुरु
वैरत्यागोभवेच्छीघ्र, महिंसासिद्धितोध्रुवम् ॥२४॥

कोटिकोटिमहायज्ञैः फलं संजायते च यत्
तदहिंसापरीणाम–तुल्यंनास्तिवदाम्यहम् ॥२५॥

धर्मोदयावतांपार्श्वे, मांसरक्तादिवर्जिनाम्;
प्रभुर्दयावतांपार्श्वे, चित्ते दयां प्रधारय ॥२६॥

हिंसकेभ्यः प्रभुर्दूरः शान्तिर्नैवाऽस्तिहिंसया
शान्तिरहिंसयासत्या, हिंसकाः पापजीविनः ॥२७॥

धनसत्तादिगर्वेण, मिथ्याबुद्ध्या च ये जनाः
घ्नन्तिजीवांश्चखादन्ति, पीडयन्तिनराऽधमाः ॥२८॥

स्वार्थकामादितः पापा, अन्यान्घ्नन्तिदयांविना;
ईश्वरप्रीतयेमूढाः पशून्घ्नन्तिचदुर्धियः ॥२९॥

पूर्णदयामयोदेवो, देवी पूर्णदयामयी,
पशुभोगंचनेच्छन्ति, पूर्णसत्यंभणाम्यहम् ॥३०॥

मांसादिलम्पटैर्लोकैः, हिंसायज्ञाः प्ररूपिताः
हिंसायज्ञैर्महापाप-दुःखराशिपरम्परा ॥३१॥

गवादीषुदयाकार्या, पुण्यार्थंधेनुरक्षणम्
दुष्कालादिप्रसङ्गेषु, संरक्ष्याः पशुमानवाः ॥३२॥

गोचरभूमिदानाद्यैः पशुसेवा शुभङ्करा;
यत्रदेशे दयादानं, तत्रदेशेसुखोदयः ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृक्षादीनांदयाकार्या, हिंसा कार्या न पक्षिणाम्
अनाथादिमनुष्याणां, पालनंपुण्यहेतवे ॥३४॥
वृक्षपश्वादिजीवाना, मुपग्रहैश्चजीवनम्:
मनुष्याणांभवत्येव, कुरु परोपकारताम् ॥३५॥
दयासेवादिसत्कर्म, कुरूपकारिणः प्रति:
धनसत्तादिभोगेन, दुःखिजीवदयांकुरु ॥३६॥
क्रोधेन वैरभावेन, हिंसां मा कुरुदेहिनाम्
देशराज्यादिलोभेन, हिंसां मा कुरुदेहिनाम् ॥३७॥
धर्मयुद्धादिमोहेन, हिंसां मा कुरु देहिनाम्:
वर्णरंगादिमोहेन, हिंसां मा कुरु देहिनाम् ॥३८॥
देवदेव्यादिपूजाया, मिषेण पशुपक्षिणः
माजहि देवदेव्यस्ते, खादन्ति न पशून् ध्रुवम् ॥३९॥
दयाधर्मसमो धर्मो, न भूतो न भविष्यति:
दयादानादिसत्कार्यै, मेंघवृष्टिश्चशान्तयः ॥४०॥
यत्रहिंसाजनादीनां, धर्मभेदैः परस्परम्:
तत्रराज्येच देशे च, दुःखराशिपरम्परा ॥४१॥
स्वधर्मिसंघवृद्ध्यर्थं, माजहि भिन्नधर्मिणः
कस्याऽपिदेहिनोहिंसां, मा कुरु धर्मगर्वतः ॥४२॥
भिन्नधर्मिजनान् हत्वा, मा कुरुष्व स्वधर्मिणाम्:
वृद्धिं हिंसाभवेद्यत्र, तत्र धर्मो न लेशतः ॥४३॥
अहिंसासर्वलोकानां, सर्वजातीयधर्मिणाम्:
कर्तव्या न्यायधर्मेण, नाऽस्तिधर्मोदयांविना ॥४४॥
दुष्टिनास्तकलोकेषु, हिंसाबुद्धितु मा कुरु
विरुद्धधर्मिणांहिंसा, मा कुरुष्व दयांकुरु ॥४५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयाधर्मस्यवृद्ध्यर्थं, हिंसां मा कुरु मोहतः
दययैवदयावृद्धिं, कुरुष्व सर्वदेहिषु ॥४६॥
दयायां मरणं श्रेयो, मा जीव ! हिंसया क्षणम् ।
मनस्यपि न हिंसायाः, परिणामं कुरुष्व भोः ॥४७॥
हिंसा प्रतिफलंहिंसा, दयाप्रतिफलंदया;
दयाप्रेम्णैवहिंसाया, नाशोभवतिनिश्चितम् ॥४८॥
निजाऽपराधिलोकेषु, वरिषुचदयां कुरु
शक्तिमद्भिर्दया कार्या, यथायोगं विवेकतः ॥४९॥
कर्मविश्वासमालम्ब्य, दयां कुरुष्व देहिनाम्
दयाकार्येच दुःखाऽब्धौ, प्राप्तेऽपि न दयां त्यज ॥५०॥
दयाकार्येभवेन्मृत्यु, स्तर्ह्यपि मा दयां त्यज
दयाकार्येचसंप्राप्तं, दीनत्वमपिमुक्तये ॥५१॥
गंगादिस्नानतोऽनन्त,-फलप्रदाऽस्तिसद्दया;
दयैवाऽस्तिमहागंगा, स्वर्गमुक्तिप्रदायिनी ॥५२॥
दयैव सर्वतीर्थानां, तीर्थमस्ति स्वभावतः
दयैव सर्वयज्ञानां, यज्ञमुख्या स्वभावतः ॥५३॥
अहिंसापालने सर्व,-धर्माराधनसत्फलम्;
जायते सर्वदानानां, फलं च त्वं दयां कुरु ॥५४॥
वेदानामपिवेदोऽस्ति, दयैव विश्वरक्षिणी;
सर्वविश्वोपकारार्थं, दयादेवीं भजस्व भोः ॥५५॥
नाऽस्ति दयासमा माता, नाऽस्तिमित्रं दयासमम्
नाऽस्ति दयासमोभ्राता, नाऽस्ति तीर्थं दयासमम् ॥५६॥
नाऽस्ति दयासमा यात्रा, नाऽस्ति दयासमा श्रुतिः
नाऽस्तिदयासमंसत्यं, दयाकृत्यं कुरुष्वभोः ॥५७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयात ईश्वरप्राप्ति, दयां ज्ञात्वा दयांकुरु
क्षुधार्तरोगिलोकानां, सेवां कुरुष्व भावतः ॥५८॥
दयातः सर्वदेवाःस्यु, र्मानवाः स्युरहिंसया
दयातः पुण्यबन्धोऽस्ति, पापबन्धोऽस्ति हिंसया ॥५९॥
नाऽस्ति दयासमंराज्यं, नास्ति दयासमंधनम्
नाऽस्ति दयासमासत्ता, नाऽस्ति दयासमोनृपः ॥६०॥
अहिंसासत्यसाम्राज्य, मान्तरं विश्वशान्तिकृत्
प्राप्य नरा निजंराज्य,-मात्मिकंयान्तिभावतः ॥६१॥
नद्यः सरांसि सद्वृक्षाः कूपा मेघाश्च वापिकाः
दयावन्तोमनुष्याश्च परोपग्रहहेतवे ॥६२॥
अन्धपङ्ग्वादिलोकानां, रुग्णादिपशुपक्षिणाम्
धर्मशालादिकंसर्व, प्रकर्तव्यं दयापरैः ॥६३॥
जलान्नवस्त्रसत्स्थानै, र्धनाद्यैश्चदयापरैः
जनादीनां प्रकर्तव्या, सेवा मोक्षप्रदायिनी ॥६४॥
कपोतादेर्दयाकार्या,-वित्तबुद्ध्यादिसाधनैः
साहाय्यंच मनुष्याणां, कुरुस्वार्पणतः सदा ॥६५॥
रोगापत्तिनिमग्नाना, मशक्तानां सहायताम्
कुरुष्व सदयांधृत्वा,-मा प्रमादं कुरुष्व भोः ॥६६॥
रोगाद्यैर्दुःखिलोकानां, साहाय्यं कुरु शक्तितः
यस्य योग्यं च य त्तस्मै, तद्देयं सदयापरैः ॥६७॥
ईश्वरप्रतिमाः सन्तो, दयोपकारकारिणः
पराऽऽत्मानो भवेयुस्ते, मोहादिकर्मनाशतः ॥६८॥
अहिंसया प्रजीवन्ति, धर्माः सर्वे जगत्स्थिताः
हिंसया नैवधर्मोऽस्ति, भाषितं जिनपुंगवैः ॥६९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमत्तयोगतःप्राण–, नाशाद्धिंसा प्रजायते
हिंसायाः परिणामेन, स्याद्धिंसाकर्मबन्धनम् ॥७०॥
अहिंसापरिणामेन, भवेदाऽऽत्माह्यहिंसकः
हिंसाबुद्धिविनाधर्म–कार्येणशुद्धिराऽऽत्मनः ॥७१॥
अल्पदोषो महाधर्मो, बहुव्ययश्च निर्जरा यतः
कर्तव्यं धर्मकार्यंतद्, दयावद्भिर्विवेकिभिः ॥७२॥
अन्यायेनभवेद्धिंसा, न्यायेन सद्दया भवेत्;
दयाऽस्तिब्रह्मचर्येण, हिंसाऽस्तिव्यभिचारतः ॥७३॥
दयायाश्चविचारेण, प्रवृत्त्या पुण्यबन्धनम्
हिंसायाश्चविचारेण, प्रवृत्त्या पापबन्धनम् ॥७४॥
क्रियमाणेषुकार्येषु, दयादृष्टिप्रधारिणः
पापकर्म न बध्नन्ति, शुद्धोपयोगिदेहिनः ॥७५॥
मैत्रीभावेन जीवेषु, दयाधर्मःप्रवर्धते
प्रमोदभावयोगेन, स्वाऽन्यहिंसाप्रवर्जनम् ॥७६॥
माध्यस्थ्यभावयोगेन, द्रव्यतोभावतोदया;
भवेन्निजाऽऽत्मनः शुद्धि, रहिंसा स्वाऽन्यदेहिनाम् ॥७७॥
निजाऽऽत्मनोभवेद्धिंसा, रागद्वेषकषायतः
साम्येन स्वाऽन्यजीवाना, महिंसा जायते खलु ॥७८॥
अहिंसाजायतेशुद्ध,–प्रेम्णाच संयमेन वै
स्वाऽन्याऽऽत्मनां प्रशुद्ध्यर्थं, सामायिकंसमाचर ॥७९॥
देशविरतियोगेन,–देशहिंसा विनश्यति;
सर्वविरतियोगेन, सर्वहिंसा विनश्यति ॥८०॥
आरम्भश्चसमारम्भो, द्रव्यहिंसादिवर्धकाः
निरारंभतया हिंसा, नश्यति द्रव्यभावतः ॥८१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वारंभपरित्यागी, भवेत्साधुरहिंसकः
अतोगृहस्थतोत्यागी, ह्यनन्तगुणशुद्धिकृत् ॥८२॥
द्रव्यभावदयावन्तः साधवो धर्मदेशकाः
शीघ्रंमुक्तिपदंयान्ति, विश्वदयाप्रवर्धकाः ॥८३॥
कोटिकोटिमहोपायै, धर्मिजीवस्यरक्षणम्
हिंसकेभ्यः प्रकर्तव्यं, सात्त्विकन्यायकर्मभिः ॥८४॥
अन्यायएवहिंसाऽस्ति, न्याय एव दयाशुभा;
कापट्यमेव हिंसाऽस्ति, निर्दंभश्च दयास्मृता ॥८५॥
हिंसायां पापमन्तार, श्चार्या हिंसानिषेधकाः
अनार्याविपरीताःस्यु, र्हिंसाऽऽचारविचारिणः ॥८६॥
मांसरक्तादिभोक्तारः पश्वादिघातिनोजनाः
अनीत्या जनहन्तारो, राक्षसा जनरूपिणः ॥८७॥
जनादीनां विनाशेन, जीवनंचवहन्ति ये;
चण्डालास्तेचविज्ञेया,-जनघातेनजीविनः ॥८८॥
क्रूरहिंसकपापानां, संगोऽपिपापहेतवे;
हिंसकाश्चक्रवर्त्याद्या, मृत्वा श्वभ्रंप्रयान्तिते ॥८९॥
गालिदानेऽपिहिंसाऽस्ति, निन्दा हिंसास्वरूपिणी
अभ्याख्यानंच हिंसाऽस्ति, हिंसाःपैशुन्यवृत्तयः ॥९०॥
हिंसा विश्वासघातोऽस्ति, कूटसाक्षिप्ररूपणम्
कूटलेखोऽपिहिंसैव, हिंसा मिथ्याप्रभाषणम् ॥९१॥
हिंसा चुराऽपि बोद्धव्या, परन्यासापहारणम्
मित्रद्रोहश्चहिंसैव, मिथ्यात्वबुद्धिवासना ॥९२॥
अधर्म्यकामतोहिंसा, जायते निश्चयो महान्
भावहिंसा प्रबोद्धव्या, मोहस्य सर्ववासना ॥९३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावहिंसापरित्यागाद्, द्रव्यहिंसा निवर्त्तते;
अनुपयोगतो हिंसा, चाहिंसा स्वोपयोगतः ॥९४॥

दयातोयतनावृत्ति, र्दयाचारश्चजायते;
दर्शनज्ञानचारित्रे, रहिंसा द्रव्यभावतः ॥९५॥

देशखण्डसमाजेषु, दयाकार्यप्रवृत्तयः
कर्तव्याःसज्जनैः श्रेष्ठाः सम्यग्दयाविचारतः ॥९६॥

आर्या अहिंसयाख्याता, अनार्या हिंसयातथा
आर्यधर्मो दयापूर्णः आर्यदेशो दयामयः ॥९७॥

किंराज्यैः किंधनैर्भोगैः किंपुत्रैश्च दयांविना
मोक्षद्वारं दया ख्याता, शुद्धाऽऽत्मोन्नतिकारिणी ॥९८॥

गुणस्थानक्रमारोहे,-दया साधनमुत्तमम्
मनोवाक्काययोगेन,-दयांकुरुष्व चेतन !! ॥९९॥

दयातःस्वाऽधिकारेण, योग्यकर्म समाचर;
धारय यतनां सर्व,-कार्येषु स्वोपयोगतः ॥१००॥

हिंसापापनिवृत्त्यर्थं, दयाधर्मंसमाचर
हिंसा नश्यतिसत्प्रीत्या, पुण्यात्पापंविनश्यति ॥ १०१॥

दया पुण्यायविज्ञेया, पापायजीवहिंसनम्
आत्मवत्सर्वजीवाना, महिंसां त्वं समाचर ॥१०२॥

स्वाङ्गनाशेयथादुःख,-मन्याऽङ्गनाशनेतथा
स्वमृत्यौचयथादुःख,मन्यमृत्यौ तथा भवेत् ॥१०३॥

नाऽस्तिमृत्युसमांभीतिः, क्षुत्समा नाऽस्ति वेदना;
स्वाऽऽत्मवत्सर्वजीवेषु, ज्ञात्वा दयां समाचर ॥१०४॥

दयांविना न देवत्वं, प्राप्यतेकोटियुक्तिभिः
देवाभूता भविष्यन्ति, भवन्ति सद्दयाबलात् ॥१०५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्णसाम्यदशापूर्वं दयाया: सत्यहेतुता;
ज्ञात्वापरोपकारार्थं. योग्यां दयां समाचर ॥१०६॥
वीतरागाजिनाबुद्धा; सर्वज्ञाः परमेश्वराः
कृतकृत्याअपिव्यक्त,–दयाकार्यप्रवर्तका; ॥१०७॥
पापेनक्षीयतेपुण्यं, पापात्पापंविवर्धते
पुण्येन क्षीयते पापं, पुण्यात्पुण्यंविवर्धते ॥१०८॥
पुण्याद् धर्मस्य सम्प्राप्ति, धर्मान्मोक्षः प्रजायते
मोक्षेऽनन्तसुखं नित्यं, तस्मा द्दयां समाचर ॥१०९॥
निर्धनाश्चदयावन्तो, हिंसकचक्रवर्तितः
कोटिगुणामहाश्रेष्ठा, जीवन्त ईश्वराः शुभाः ॥११०॥
यथाममप्रियाः प्राणा, स्तथैवंसर्वदेहिनाम्
ज्ञात्वेतिसर्वजीवानां, प्राणान्रक्षविवेकतः ॥१११॥
मृत्युःप्रियो न कस्याऽपि, कीटादेश्चप्रवेदय
स्वस्याऽस्तिजीवनंप्रेय, स्तथाऽस्तिसर्वदेहिनाम् ॥११२॥
सौराष्ट्रेगुर्जरेकच्छे,–मरुधरे च मालवे;
दयामयंसुसाम्राज्यं, जैनादिभिःप्रवर्तते ॥११३॥
पशुपक्षिमनुष्याणां, धर्मशालादिकंभृशम्
कपोतपालिकाबह्व्यो, ग्रामेचनगरेपुरे
कुमारपालभूपेन, दयाधर्मः प्रवर्धितः
वस्तुपालादिभिः श्रेष्ठैः दया भृशंप्रचारिता ॥११५॥
सर्वधर्मेषुसत्योऽस्ति, जैनधर्मोदयामयः
सर्वजातिदयावृद्ध्यै, जैनसंघो विवर्धताम् ॥११६॥
सद्दयैवस्वधर्मोऽस्ति. परधर्मोऽस्तिहिंसनम्
दयालवःप्रजीवन्तु, विश्वदयाप्रचारिणः ॥११७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिंसामयानियुद्धानि, पापमूलानि वेदय;
तानित्यक्त्वादयावन्तो, दयांकुरुत देहिनाम् ॥११८॥
पक्षिषु च कपोताद्याः पशुषुहिमृगादयः
जैनामनुष्यसंवेषु, ज्ञेयादयालवो भुवि ॥११९॥
जैनधार्मिकशास्त्रेषु,-दयाधर्मस्यपालनम्
संवर्णितमहिंसायाः साम्राज्यं विश्वशान्तिदम् ॥१२०॥
प्रख्यातः सर्वखण्डेषु, जैनधर्मोदयामयः
तीर्थंकरैश्चसर्वज्ञै, र्दर्शितोऽनादिकालतः ॥१२१॥
आस्तिकानांदयाधर्मो, नास्तिकानां च हिंसनम्
दयाऽस्तिप्रभुभक्तानां, नास्तिकाः सन्तिहिंसकाः ॥१२२॥
दयावतांसुयोग्याऽस्ति, प्रार्थनापरमाऽऽत्मनः
जनादिघातकानांतु, दयाऽभावान्न सा मता ॥१२३॥
दयैव विश्वलोकानां, कर्तव्यमस्ति निश्चितम्
दयैव सर्वधर्माणां, सारोऽस्तीति विनिश्चितम् ॥१२४॥
दयांविना तु मा जीव ! दयावन्तो हि जीविनः
जीवन्तस्तेमृताज्ञेया, जनादेर्हिंसकाजनाः ।१२५॥
अधर्म्याऽन्यायतोजीवान्, माजहिभव्यचेतन !!
धर्म्यंन्यायेनजीव त्व, माजीविकादिसाधनैः ॥१२६॥
अहिंसादिगुणैर्जीव ! ! स्वाऽधिकारेणचेतन !
जीवानांजीवनाद्यर्थं, परस्परमुपग्रहः ॥१२७॥
निर्दयैर्हिभयत्रस्ता, वर्तन्तेविश्वदेहिनः
सदयैर्निर्भयाजीवा, जीवन्ति त्वं दयांकुरु ॥१२८॥
दयाऽस्तिब्रह्मणोरूपं, हिंसा दुःखस्यरूपकम्
प्रभोरूपंदयांज्ञात्वा, दयामाचर चेतन ॥१२९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्णंदयास्वरूपोऽस्ति, देवो हिंसानिवारकः
पशुपक्ष्यादिभोगान्स, नेच्छति नच याचते ॥१३०॥
यज्ञार्थंपशवोनैव, सृष्टा देवेन निश्चितम्
देव्यः पशून् न खादन्ति, पिबन्ति रुधिरं न च ॥१३१॥
पशुपक्ष्यादियज्ञैश्च, प्रसन्ना नैव देवताः
पापोदयेन रोगाश्च, दुःखानि विश्वदेहिनाम् ॥१३२॥
पापोदयेन रोगादि–दुःखंभवतिदेहिनाम्
पुण्योदयेन चारोग्य–सुखंभवतिनाऽन्यथा ॥१३३॥
पापाद्दुःखं सुखं पुण्यात्, सर्वत्र सर्वदेहिनाम्
ज्ञात्वा च पुण्यधर्माय, सद्दयांकुरुचेतन ! ॥१३४॥
मदिरामांसरक्तानां, द्वेषिणांव्यभिचारिणाम्
पापर्द्धिभोगभुक्तानां, हृत्सुनास्ति च सद्दया ॥१३५॥
हिंसाऽस्तिक्लेशयोगेन, परमर्मप्रकाशनात्
अतिपरिग्रहोहिंसा, हिंसाऽस्ति रात्रिभोजने ॥१३६॥
अनर्थदण्डतोहिंसा, परहास्यादिकर्मतः
दयाऽस्तिदेहिनो दुःख,–विनाशकसुकर्मतः ॥१३७॥
येषां चित्तेषु कायेषु, वचस्सु सात्त्विकीदया
स्वर्गोहिजीवतांतेषां, भावेन हि प्रजायते ॥१३८॥
स्वाऽधिकाराद्यथाशक्ति, द्रव्यभावदयांकुरु
तरतमदयायोगैः प्रवर्त्तस्व स्वमुक्तये ॥१३९॥
पापंविज्ञायहिंसासु, हिंसाकर्माणि संत्यज !!
सर्वयोगस्यसन्मूल, महिंसां हृदि धारय ॥१४०॥
कोऽपिदयांविना योगी, नैवभूतो भविष्यति
कोऽपिदयांविना मुक्तो, नव भूतो भविष्यति ॥१४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनानांभक्षणार्थं न, पशुपक्ष्यादयःखलु;
एवंभगवता प्रोक्तं, महावीरेण रक्षिणा ॥१४२॥
सात्त्विकान्नैःफलैर्दुग्धै, र्भोजनपानयोगतः
जीवन्तिधर्मिणः सन्तो, भक्ता जैनाश्चमुक्तये ॥१४३॥
वैरत्यागोभवेन्नून, महिंसापूर्णसिद्धितः
अहिंसापरमोधर्मः सर्वथायोगसिद्धिकृत् ॥१४४॥
सम्यग्दृष्टिजनस्याऽस्ति, सम्यज्ज्ञानंच सद्दया,
अहिंसाप्राप्तये सम्यज्,–ज्ञानस्य सत्यहेतुता ॥१४५॥
अहिंसातोजगन्मैत्री, शुद्धप्रेम प्रकाशते;
चित्तशुद्धिर्भवेत्तेन, मोहरोधः प्रजायते ॥१४६॥
ज्ञानादिकगुणानांच, प्राकट्यं चाऽऽत्मशुद्धता
मोहादीनांक्षयःपूर्णः भवेद्भावदयाबलात् ॥१४७॥
देशतोविरतानांतु, हिंसानाशोऽस्तिदेशतः
सर्वतोविरतानांतु हिंसात्यागस्तु सर्वतः ॥१४८॥
अप्रमत्तमुनीनांतु,–पूर्णदयाऽस्तिभावतः
ज्ञानध्यानादिलीनाना, महिंसायोगसिद्धयः ॥१४९॥
हिंसाबुद्धिंविनानैव, हिंसायाः कर्मबन्धनम्
हिंसायाः परिणामेन, कर्मबन्धो भवेत्खलु ॥१५०॥
सम्यग्दृष्टिमतांनृणां, द्रव्यतोभावतोदया,
मिथ्यादृष्टिमनुष्याणां द्रव्यदयाऽस्तिबाह्यतः ॥१५१॥
सम्यग्दृष्टिमतांनृणां, सम्यग्दृष्टिबलात्खलु;
भवेद्भावदयासत्या, सर्वकर्मविनाशकृत् ॥१५२॥
द्रव्यदयातउत्कृष्टाऽ, नन्तगुणोत्तमाशुभा
भावतोऽस्तिदयासत्या, सर्वथामुक्तिदायिनी ॥१५३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मनः पूर्णमोक्षार्थं, दयाऽस्ति साधनं शुभम्;
आत्मनः शुद्धरूपंहि, साध्यमस्तिदयावताम् ॥१५४॥
एकेन्द्रियादिजीवानां, सद्दयाचोत्तरोत्तरा;
अनन्तपुण्यलाभार्थं, धर्मार्थं देहिनां भवेत् ॥१५५॥
एकेन्द्रियादिजीवेभ्यो, नृणां कोटिगुणोत्तमा
दयाऽस्तिद्रव्यभावाभ्यां, तरतमयोगभेदतः ॥१५६॥
मनुष्येष्वपि मांसादि,-वर्जिनांचोत्तमादया
तेभ्योऽपिज्ञानिसाधूना, महिंसारक्षणं च वै ॥१५७॥
चतुर्विधमहासंघ,-रक्षातो धर्मरक्षणम्
धर्मिणां रक्षणाद्धर्मो, रक्ष्यते सत्यनिश्चयः ॥१५८॥
अहिंसकसुभक्तानां, त्यागिनांरक्षणंशुभम्
अनन्तपुण्यधर्मार्थं, जायते च विवेकिनाम् ॥१५९॥
पशुपक्षिमनुष्याणां, हिंसकेभ्योह्यहिंसकाः
कोटिगुणोत्तमाः श्रेष्ठा, यथायोग्यं दयांकुरु ॥१६०॥
क्षेत्रकालादिकंज्ञात्वा, तरतमयोगतोदयां
कुर्वन्ति ज्ञानिनो मुक्त्यै, सर्वत्र निजशक्तितः ॥१६१॥
दयाभवतिसद्बुद्ध्या, हिंसाभवतिदुर्धिया;
पापकार्येषु हिंसाऽस्ति, धर्मकार्येषुसद्दया ॥१६२॥
स्वल्पाहिंसामहाधर्म,-कारकं परमार्थदम्
अहिंसाधर्मवृद्ध्यर्थं,-मपवादेन चागतम् ॥१६३॥
संघधर्मादिरक्षार्थं, मावश्यकंहि सर्वथा
धर्म्ययुद्धादिकं कर्म, कर्तव्यं च विवेकतः ॥१६४॥
स्वस्वधर्मविवृद्ध्यर्थं, सर्वैर्धर्माभिमानिभिः
क्रियतेधर्मयुद्धंय, त्तन्मृषामोहचेष्टितम् ॥१६५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वधर्मस्यसारोऽस्ति, दयैवसत्यधर्मराट्
तदर्थधर्मयुद्धानि, कर्तव्यानि विवेकतः ॥१६६॥
आपत्कालोऽस्तिसर्वेषां, सर्वदेशीयदेहिनाम्
आपत्कालीनयुद्धानि, न योग्यानि दयांविना ॥१६७॥
देशस्वार्थादिमोहेन, युद्धंमह्यां प्रवर्तते
तत्रपापंप्रविज्ञाय, युद्धंत्यजन्तुधर्मिणः ॥१६८॥
अहिंसाधर्मिसंघस्य, रक्षार्थं चापवादिकम्
अल्पदोषमहाधर्मं, कर्तृयुद्धं प्रवर्तते ॥१६९॥
औत्सर्गिकेणमार्गेण, चापत्तिकालमन्तरा,
धर्मयुद्धमपित्याज्यं, यथायोगं विवेकतः ॥१७०॥
युद्धार्थं च प्रवृत्तानां, घोरहिंसकदेहिनाम्
प्रतिसंघादिरक्षार्थं, योद्धव्यंच यथातथम् ॥१७१॥
निरपराधिलोकानां, तत्राऽपिरक्षणंशुभम्
दंडादिकं यथायोगं, शत्रूणां च विवेकतः ॥१७२॥
शत्रुष्वपियथायोगं, दया कार्या बलान्वितैः
स्वघातार्थप्रवृत्तानां, दण्डशिक्षादयादिकम् ॥१७३॥
हिंसकघोरपापाना, मुद्धाराय दया शुभा;
दातव्यं शिक्षणं तेभ्यो, दयाधर्मस्य मुक्तये ॥१७४॥
घोरहिंसकदेशेषु, समाजेषुच सदया;
सर्वोपायैः प्रचार्या सा, सर्वस्वार्पणशक्तितः ॥१७५॥
गवां संरक्षणं कार्यं, निःशस्त्राणांदयावताम्;
निर्बलानांच बालानां, स्त्रीणांनृणांद्विजन्मनाम् ॥१७६॥
शरणार्हमनुष्याणां, कर्तव्यंशुभरक्षणम्;
शरणार्हा न हन्तव्या, घोराऽपराधिशत्रवः ॥१७७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सावधानतया कार्या, वैरिणां सद्दयाजनैः
विश्वासोनैवशत्रूणां, कर्तव्यः सद्दयाधरैः ॥१७८॥
शक्तानां सद्दयाधर्मो, मोक्षमार्गविहारिणाम्
अशक्तानां दया कार्या, शक्तिमद्भि र्विवेकतः ॥१७९॥
दुष्कालादिप्रसङ्गेषु, मानवपशुरक्षणम्
कर्तव्यमन्नवित्ताद्यै, रनेकैः साधनैर्जनैः ॥१८०॥
दयादानादिसत्पुण्यैः सुभिक्षं च निरोगता
खंडे देशे च संघे च, जायते नैव संशयः ॥१८१॥
महापुण्येन पापस्य, विपाकोपशमो भवेत्
दयादिपुण्यकार्यैश्च, सुखंहि दुःखनाशनम् ॥१८२॥
दयामयेषु देशेषु, खण्डेषु सर्वजातिषु;
शान्तिस्तुष्टिस्तथापुष्टि, रारोग्यं मंगलंभृशम् ॥१८३॥
दयाकार्येषुदोषोऽपि, स्यात्तथाऽपिद्दयाधिया
पुण्यधर्मस्यबाहुल्या, दाऽऽत्मोन्नतिर्भवेद्भृशम् ॥१८४॥
अहिंसायाः प्रचारार्थं, दयाकर्म समाचर
दुर्लभं नृभवं प्राप्य, मा प्रमादं कुरुक्षणम् ॥१८५॥
अहिंसाधर्मकार्येण, नृजन्मसफलं कुरु
किं वित्तेन स्त्रियाभोगै, र्दयाधर्मं समाचर ॥१८६॥
सर्वतीर्थंकरैरुक्तो, दयाधर्मः सुखंकरः
स्वार्पणेन दयाकर्म, कुरुष्व स्वोपयोगतः ॥१८७॥
दुःखीकृत्याऽन्यलोकांस्त्वं, मा जीव पापकर्मभिः
सर्वजीवसुखाय त्वं, जीव पुण्यसुकर्मभिः ॥१८८॥
सर्वलोकसुखार्थं त्वं, स्वाऽऽत्मभोगं समर्पय
कुरुनिष्कामतोलोक,-हितार्थाय शुभं च यत् ॥१८९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वार्थ मन्येषु लोकेषु, निर्दयत्वं न धारय;
साहाय्ययाचकानां त्वं, साहाय्यं कुरु भावतः ॥१९०॥
सद्दयादानकार्याणां, सत्फलं नैव नश्यति
अत आस्तिकभावेन, दयाकार्यं कुरुष्व भोः ॥१९१॥
स्वल्पहिंसा दया बह्वी, स्वाधिकारेण मानवैः
आजीविकादिकार्येषु,–कर्तव्या सद्विवेकतः ॥१९२॥
पशुपक्षिमनुष्यादि–घातादाजीविकादिकम्
कुर्वन्ति न दयावन्तः प्राणान्तेऽपि शिवाऽर्थिनः ॥१९३॥
जीवेन सह बन्धोऽस्ति, हिंसातः पापकर्मणाम्
पापकर्मोदयेनैव,–महादुःखपरम्परा ॥१९४॥
जीवेनसहबन्धोऽस्ति, दयातः पुण्यकर्मणाम्
पुण्यकर्मोदयेनैव, सुखस्याऽस्तिपरम्परा ॥२९५॥
सुखार्थं स्वार्थमोहेन, नाऽन्यजीवान् विनाशय
मिथ्यामोहादिकं त्यक्त्वा, स्वाऽऽत्मानन्दं लभस्वभोः॥१९६
सुखार्थं वित्तदारादि,–भोगानांप्राप्तये हठात्
हिंसाकर्मादिकं कृत्वा, प्राऽन्ते दुःखमवाप्स्यसि ॥१९७॥
हिंसकानां सुखं स्वल्पं, प्रत्यक्षं व्यावहारिकम्
दृष्ट्वा मा मुह्य जीव त्वं, महादुःखं सुखान्ततः ॥१९८॥
पापाऽनुबन्धपुण्येन, हिंसकानां धनादिकम्
दृष्ट्वा मोहो न कर्तव्यः परत्र दुःखराशयः ॥१९९॥
पशुपक्ष्यादिषुश्रेष्ठो, ह्यनन्तगुणमानवः
मनुष्य एव मोक्षस्य, प्रत्यक्षमधिकारवान् ॥२००॥
मुक्तिं यान्ति जना एव, नाऽन्ये यान्तीति निश्चितम्
अहिंसाधर्मसम्प्राप्त्या, मनुष्याऽऽत्मा भवेत् प्रभुः ॥२०१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशदृष्टान्ततोऽतीव–दुर्लभोनृभवोमहान्
प्राप्यस्वाऽऽत्मा भवेत् सिद्धो, दयादिधर्मसाधनैः ॥२०२॥
इति विज्ञाय भोभव्या, दयां कुर्वन्तु भावतः
प्रभुसदृग्मनुष्याणां, हिंसां त्यजन्तु मानवाः ॥२०३॥
अतिपापिमनुष्योऽपि, सम्यग्दृष्ट्याद्दिलाभतः
इहैवमोक्षमायाति–त्यक्त्वा हिंसादिकं क्षणम् ॥२०४॥
अतो मनुष्यघातात्त्वं, विरम कोट्युपायतः
आत्मज्ञानं मनुष्येभ्यो, देयं हिंसानिवारकम् ॥२०५॥
कोटिकोटिमहोपायै, र्मनुष्यसंघरक्षणम्
कर्त्तव्यं शिक्षणं देय, मंहिंसाचारवर्धकम् ॥२०६॥
अहिंसाचारतः शान्ति, र्देशेखण्डे प्रजासु च
राज्येषु भवति स्पष्टा, नान्योपाया भुवस्तले ॥२०७॥
इति निश्चित्यसिद्धान्तं, सर्वखण्डस्थमानवाः
दयाचारै र्विचारैश्च, प्रवर्तन्ते स्वभावतः ॥२०८॥
आत्मन्येव सुखं सत्यं, निश्चित्य भव्यमानवाः
बाह्यभोगाप्तये हिंसां, कुर्वन्तु नैव सज्जनाः ॥२०९॥
बाह्यभोगे सुखभ्रान्तिं, त्यक्त्वा सत्यसुखाप्तये
आत्मन्येव स्थिरीभूय, स्वाऽऽत्मानन्दरसो भव ॥२१०॥
स्वस्वधर्मस्यसत्यत्वं, कथ्यतेसर्वधर्मिभिः
किन्तुतत्र न सत्यत्व, महिंसाधर्ममन्तरा ॥२११॥
ब्रह्मचर्यमहिंसैव, परब्रह्मप्रदायकम्
द्रव्यतोभावतोब्रह्म,–चर्यंशक्तिप्रदायकम् ॥२१२
दुःखिलोकदयाकार्या, दुःखनाशनकर्मभिः
औषधालयसंस्थानं, कार्यमुपाश्रयादिकम् ॥२१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुकुलादिकंस्थान, महिंसाचारबोधकम् ;
स्थाप्यंसंघादिशान्त्यर्थं,विश्ववर्तिदयापरैः ॥२१३॥

एशियावासिलोकैस्तु, युरोपीयजनैर्भृशम्
दयाचारविचाराणां, कर्मकार्यं विवेकतः ॥२१४॥

अमेरिकाजनैःसर्वं, यत्नैर्दयाविवृद्धये
स्वार्पणेन च यद्योग्यं, तत्कर्तव्यंविवेकतः ॥२१५॥

आस्ट्रेलियाजनै विश्व,–शान्तयेचविवेकतः
अहिंसाधर्मवृद्ध्यर्थं, कर्तव्यं धर्मकर्मयत् ॥२१६॥

आफ्रिकावासिभिर्हिंसा,–कर्म त्याज्यं विवेकतः
सर्वविश्वजनैर्हिंसा, त्याज्या सत्यदयापरैः ॥२१७॥

सत्ताधनादिभिर्लोकान्, पीडयन्ति च ये जनाः
ते नरा नरकंयान्ति, घोरपापपरिग्रहैः ॥२१४॥

महादुःखेनसंतप्तान्, जोवान् दृष्ट्वा च यद्हृदि,
दयानोजायते तस्य, राक्षसत्वं प्रकाश्यते ॥२१९॥

स्त्रीबालसाधुसंहर्ता, गर्भनाशी च यो जनः
यातिश्वभ्रं महापापी, निर्दयो देहिनः प्रति ॥२२०॥

तमोवृत्त्यारजोवृत्त्या, हिंसादिपापकर्मिणः
श्वभ्रंयास्यन्तितेघोरं, कृत्वाहिंसां पुनः पुनः ॥२२१॥

हिंसादिपापकर्तॄणां, मुद्धारायसुशिक्षणम्
दयाज्ञानस्यदातव्यं, विश्ववर्त्तिदयापरैः ॥२२२॥

दयार्द्रविश्वसंघेन, सर्वस्वार्पणयोगतः
प्रचार्याः सर्वविश्वस्मिन्, दयोपायाः सुशक्तिभिः ॥२२३॥

दयापूर्णसुशास्त्राणां, कार्या प्रचारणाभुवि
दयोपदेशतत्कार्यै, वर्धयन्तुदयांजनाः ॥२२४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसह्यकोटिदुःखानि, विश्वदयाविवृद्धये,
प्रवर्तन्तां सदा लोकाः साधवः सत्ययोगिनः ॥२२५॥
साधवः प्रभुवत्पूज्या, हिंसादिपापवर्जिनः
सेवाभक्तिश्चकर्तव्या, चाऽहिंसाधर्मियोगिनाम् ॥२२६॥
हिस्त्रव्याघ्रादितोरक्ष्याः क्षत्रियैः पशुमानवाः
क्षत्रियाणां स्वधर्मोऽस्ति, साधुब्राह्मणरक्षणम् ॥२२७॥
क्षत्रियाणां स्वधर्मोऽस्ति, गोसतीबालरक्षणम्
निरपराधिजीवानां, निःशस्त्राणां च रक्षणम् ॥२२८॥
क्षत्रियाणां च कर्तव्यं, न्यायात्संघादिरक्षणम्
राज्यभूम्यादिसंरक्षा, घोरापराधिदण्डनम् ॥२२९॥
मृगयापापखेलादि,-हिंसाकर्मत्यजन्तिते
अहिंसाधर्मिरक्षार्थ, क्षत्रिया उपयोगिनः ॥२३०॥
अहिंसाधर्मबोधार्थं, ब्राह्मणा उपयोगिनः
पशुमांसादिभोक्तारो, ब्राह्मणा अपि राक्षसाः ॥२३१॥
सुरामांसप्रहिंसाद्यै, ब्राह्मणानैवकर्मतः
दयासत्यादिधर्मैश्च, ब्राह्मणा धर्मिणः स्मृताः ॥२३२॥
गवांसंपालनाद्वैश्या, अहिंसाधर्मसाधकाः
पशुपालनकृष्यादि,-कर्मिणश्चदयालवः ॥२३३॥
व्यापारादिप्रवृत्तिषु, दयाबुद्ध्या प्रवर्तकाः
अहिंसाधर्मवृद्ध्यर्थं, धर्मशालादिकारिणः ॥२३४॥
भूपानां च स्वधर्मोऽस्ति, न्यायात् प्रजादिपालनम् ;
साधूनां च गवादीनां, रक्षणं हिंस्रदण्डनम् ॥२३५॥
धर्मिणां रक्षणंनीत्या, चोरापराधिदण्डनम्
अहिंसाधर्मिणोवृद्धिः कार्याच दोषवर्जनम् ॥२३६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शूद्राणां च स्वधर्मोऽस्ति, साधुब्राह्मणसेवनम्
धर्मिणां सेवनं कार्यं, हृदि धार्या दया मतिः ॥२३७॥

आजीविकादिकार्येषु, न्यायबुद्ध्या प्रवर्त्तनम्
मनोवाक्काययोगेन, दयानीतिप्रवर्त्तनम् ॥२३८॥

अहिंसादेशना कार्या, विश्वोद्धाराय साधुभिः
आत्मवत्सर्वजीवानां, रक्षणं शिक्षणं तथा ॥२३९॥

शक्तिमतां दयादानं, क्षमातपश्चसंयमः
जीवन्ति निर्बला लोकाः, शक्तानां सदयाबलात् ॥२४०॥

पीड्यमानान् जनान् दृष्ट्वा, शक्तिमद्भिःस्वशक्तितः
तत्साहाय्यं प्रकर्त्तव्यं-यत्र तत्र यदा तदा ॥ २४१ ॥

क्लेशंभीतिं तथा द्वेषं, वैरं त्यक्त्वा च सज्जनैः
कर्तव्यं सदयाकर्म, दुष्टस्वार्थं विहाय च ॥ २४२ ॥

परस्परेषु भिन्नेषु, धर्मिषु प्रेमभावतः
द्वेषहिंसादिकं त्यक्त्वा, वर्त्तव्यं च परस्परैः ॥ २४३ ॥

अन्यायादन्यलोकानां, दुःखदान हि हिंसनम्
अन्यप्रजीयदासत्व-, कृत्ये हिंसाऽस्ति तात्त्विकी ॥२४४॥

दुष्टाशयाश्च ये दासा, हिंसां कुर्वन्ति पापिनः
अन्यायोपार्जितं वित्तं, भुञ्जन्ति पापकर्मतः ॥४४५॥

पारतन्त्र्य हि हिंसाऽस्ति, स्वातन्त्र्यं स्वदया शुभा
आत्मस्वातन्त्र्यसत्कृत्य, माहिंसाऽस्ति स्वभावतः ॥४४६॥

स्वाऽऽत्मराज्यमहिंसाऽस्ति, मोहराज्यंतु हिंसनम्
शुद्धोपयोग एवाऽस्ति, भावतःसदयाऽऽत्मनः ॥४४७॥

मिथ्यात्वरागवैराद्यो, भावहिंसाऽस्ति देहिनाम्;
अहिंसाऽस्ति समत्वं हि, बाह्यतोऽपि क्रियावताम् ॥२४८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिंसाऽस्ति व्यसनैर्वैरैः हिंसादुर्गुणवृत्तयः
सर्वहिंसादितो मुक्ता, वीतरागा जिनादयः ॥२४९॥
सर्वकर्मसु हिंसात्व, मल्पाधिक्यप्रभेदतः
गृहस्थानां भवेत्तत्र, निर्बन्धा ज्ञानयोगिनः ॥२५०॥
दयाबुद्धिं हृदि न्यस्य, गृहस्था स्त्यागिनो जनाः
स्वाऽधिकारेण कर्माणि, कुर्वन्ति स्वोपयोगिनः ॥२५१॥
यथा धूमावृतो वह्नि, स्तथा सर्वप्रवृत्तयः
सदोषा अपि कुर्वन्ति, ह्याजीविकादिकारिणः ॥२५२॥
निरासक्तितया सुज्ञा, यथायोग्यविवेकतः
आत्मज्ञानोपयोगेन, कर्म कुर्वन्ति सज्जनाः ॥२५३॥
द्रव्यभावदयाज्ञान,-विवेकेन प्रवर्तिनः
स्वाऽधिकारेण कर्माणि, कुर्वन्ति यान्ति सद्गतिम् ॥२५४॥
हिंसाबुद्धिर्न यस्याऽस्ति, शुद्धाऽत्मलक्ष्यधारकः
सर्वकर्मप्रकुर्वाणोऽप्यहिंसाधर्मसाधकः ॥२५५॥
परस्परं च साहाय्यं, कुर्वन्तु भव्यमानवाः
परस्परोपकारेण, जीवा जीवन्ति भूतले ॥२५६॥
परस्परोपकारोऽस्ति, जीवैर्जडैश्चदेहिनाम्
परस्परसहायेन, जीवन्ति विश्वदेहिनः ॥२५७॥
अतःस्वाभाविकं सत्यं, साहाय्यं च परस्परम्
विज्ञायैवं जनाः सर्वे, भवन्तु स्वार्पिताः सदा ॥२५८॥
दुःखिनां दुःखनाशार्थं, सहायिनो भवन्तु भोः
स्वार्थेण कातरा नैव, भवन्तु विश्वमानवाः ॥२५९॥
देशजात्यभिमानेन, वर्णधर्माभिमानतः
परस्परं न हिंसन्तु, भवन्तु सदयापराः ॥२६०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रीडाविलासमोहेन, राज्यसत्तादिमोहतः
विद्याशक्त्यादिगर्वेण, नाशयन्तु न देहिनः ॥२५१॥
राजानो राज्यगर्वेण, पीडयन्तु न देहिनः
हिंसादिपापदोषाँश्च, त्यजन्तु धर्मबुद्धितः ॥२६२॥
राज्यं कुर्वन्तु सद्बुद्ध्या, सर्वलोकहिताय च
अन्यायं नैव कुर्वन्तु, सन्तु हिंसानिवारकाः ॥२६३॥
क्षत्रिया ब्राह्मणा वैश्याः शूद्राश्च विश्वमानवाः
आत्मनः शुद्धिकृत्यार्थं, सन्तु दयैकतत्पराः ॥२६४॥
विश्वदयार्द्रसंवेन, दुःखिनांनिःसहायिनाम्
दुःखनाशाय सद्यत्नै, र्यतितव्यं विवेकतः ॥२६५॥
पशूनां पक्षिणां दुःख,-नाशार्थं च यथातथम्
भवन्तु सद्दयाकम,-कारिणो विश्ववत्सलाः ॥२६६॥
दयाचारिविचाराणां, सामर्थ्यं स्वाऽऽत्ममुक्तये
सर्वकर्मक्षयोमोक्षो, भवेद् भावदयाबलात् ॥२६७॥
अहिंसाधर्मिभिर्धर्मो, वर्द्धयते सर्वभूतले;
धर्मिभिरन्तराधर्मो, वर्द्ध्यते नैव पुस्तकैः ॥२६८॥
अहिंसाधर्मिणांवृद्ध्यै, चार्पिताः सन्तु मानवाः
अहिंसातः प्रभोः प्राप्ति, र्भवत्येव न संशयः ॥२६९॥
अहिंसाभावकार्याभ्यां, जैनसंघः प्रवर्त्तते
सर्वधर्मिषु सः श्रेष्ठो, दयाचारविचारतः ॥२७०॥
रागद्वेषौ परित्यज्य, सत्यन्यायात्प्रवच्म्यहम्
जैनेषु जैनशास्त्रेषु, दयाधर्मस्य मुख्यता ॥२७१॥
मृता नैव मरिष्यन्ति, जैना आर्या दयादितः
आर्यदेशीयलोकानां, दयाधर्मोस्त्यनादितः ॥२७२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वखण्डेषुदेशेषु, दयाऽऽचार्यैः प्रवर्ध्यते
अहिंसाधर्मिणांसत्य, मार्यत्वंगुणकर्मतः ॥२७३॥

मदिरामांसतोदूरा, आर्याःस्युर्गुणकर्मतः
अनार्यम्लेच्छलोकानां, हिंसात्वं वृत्तिकर्मतः ॥२७४॥

सृष्टिविरोधकं कर्म, हस्तकर्मादिकं च यत्;
बाललग्नादिकंहिंसा, त्याज्या धर्मार्थिकामिभिः ॥२७५॥

अतिशोकादिकं हिंसा, ज्ञातव्या च विवेकिभिः
मनोवाक्कायशक्तीनां, रक्षणं सदया मता ॥२७६॥

अत्याहारैस्तु हिंसैव, चातिवादश्च हिंसनम्
मनोवाक्काययोगाना, मतियत्न श्च हिंसनम् ॥२७७॥

कूपादिपतनं हिंसा, विषादिभक्षणं तथा;
अतिपरिश्रमोहिंसा, ज्ञातव्यैवं विवेकतः ॥२७८॥

आर्तरौद्रविचाराणां, हिंसाऽस्ति कर्मबन्धनात्
धर्मशुक्लविचाराणां, स्वाऽऽत्मदयाऽस्तिवस्तुतः ॥२७९॥

स्वाऽऽत्मनो या दया सैव, चाऽन्यसर्वदयादितः
अस्त्यनन्तगुणैः श्रेष्ठा, सर्वकर्मविनाशिनी ॥२८०॥

दर्शनज्ञानचारित्र, मर्हिसैव स्वभावतः
शुद्धोपयोग एवाऽस्ति, ह्यहिंसा च निजाऽऽत्मनः ॥२८१॥

अहिंसा त्रिविधा ख्याता, तामसी राजसी तथा
सात्त्विकी स्वाऽऽत्मशुद्ध्यर्थं, श्रेष्ठाऽस्ति चोत्तरोत्तरा॥२८२॥

मुक्त्यर्थं सात्त्विकी भव्यैः कर्त्तव्या स्वोपयोगतः
निष्कामबुद्धितः कार्यं, मर्हिसाकर्म तात्त्विकम् ॥२८३॥

हिंसा त्रिधाऽस्तिविज्ञेया, तामसी राजसी तथा;
सात्त्विकी च परित्याज्या, स्वाऽधिकारेण मानवैः॥२८४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्देवगुरुधर्मार्थं, संघार्थं च महाजनैः
अल्पदोषमहाधर्म,-कर्म कार्यं यथातथम् ॥२८५॥

वनस्पतिफलाहारात्, सत्त्वबुद्धिः प्रकाशते
सात्त्विकपानयोगेन, शुद्धबुद्धिः प्रकाशते ॥२८६॥

सात्त्विकभोजनाच्छुद्धि,-श्चित्तस्य प्रविजायते
स्वच्छवायुजलाद्यैश्च, दयावृत्ति र्विवर्धते ॥२८७॥

अहिंसाधर्मिणां सङ्गाद्, दयाबुद्धिः प्रजायते
द्रव्यभावदयायोगात्, स्वाऽऽत्मा सिद्धः प्रजायते ॥२८८॥

पवित्रभूमिवासेन, दयाबुद्धिः प्रवर्धते
पवित्रतीर्थवासेन, सद्दया हृदि जायते ॥२८९॥

चण्डकौशिकनागे च, कृताऽपराधिसंगमे;
महावीरस्य नेत्रे द्वे, दयार्द्रे कुरुतां शिवम् ॥२९०॥

यस्य पूर्णदयादृष्टिः कमठेऽत्यपराधिनि
ध्यानावस्थास्थितो देवः पार्श्वनाथः श्रियेऽस्तुवः ॥२९१॥

मृगवृन्दोपरिप्रीतिः सद्दया येन धारिता
अरिष्ठनेमिभगवान्, कल्याणं कुरु सत्वरम् ॥२९२॥

कपोतस्य कृता रक्षा, पूर्वजन्मनि भावतः
सर्वविश्वस्यशान्त्यर्थं, शान्तिनाथोऽस्तुसर्वदा ॥२९३॥

भारतादिकदेशेषु, दयाधर्मिप्रवृद्धये
साधवः प्रेषिता येन, पशुशालाः कृता घनाः ॥२९४॥

अशोकभूपपौत्रेण, जैनसम्प्रतिभूभुजा;
चन्द्रगुप्तेन भूपेन, दया सर्वत्र वर्धिता ॥२९५॥

वस्तुपालो महामन्त्री, तेजःपालोऽपिगुर्ज्जरे
जातौ दयाप्रचारार्थं, भ्रातरौ जैनधर्मिणौ ॥२९६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुष्काले कच्छसौराष्ट्र,-गुर्जरादिषु मानवाः
रक्षिता अन्नदानेन, जगडूशादयालुना ॥२९७॥
इलादुर्गेमहाश्रेष्ठो, दुष्काले सर्वरक्षकः
अंबावीदासजैनोऽभूत्, तस्याऽस्ति कीर्तिरुत्तमा ॥२९८॥
मंडपे पेथडश्रेष्ठी, जैनो बभूव धर्मवान्
क्षुधार्तादिमनुष्येभ्यो, भोजनाद्यं च दत्तवान् ॥२९९॥
अशोको भूपतिः श्रेष्ठः सर्वभूपतिशेखरः
तेन दयासमुद्रेण, देशाद्धिंसा निवारिता ॥३००॥
खारवेलेन भूपेन, भारते वर्धिता दया;
सिद्धसेनोपदेशेन, विक्रमेण दया तता ॥३०१॥
अहिंसा स्थापिता राज्ये, दयामयेन चेतसा
स आमभूपतिः श्रेष्ठो, बभूव जैनधर्मिराट् ॥३०२॥
अक्बरबादशाहेन, भारतदेशचक्रिणा
आर्याणां प्रेमवृद्ध्यर्थं, गवां हिंसा निवारिता ॥३०३॥
हीरविजयसूरीणां, प्रबोधेनैवसद्दया
यस्याऽऽत्मनि भृशं जाता, सोऽक्बरः कीर्तिमान्श्रुतः ॥३०४॥
यस्य विश्वोपरि प्रेम, तस्य व्यापकसद्दया,
दयाहिंसास्वरूपं तु, ज्ञानी जानाति वस्तुतः ॥३०५॥
ज्ञानं पूर्वं दया पश्चात्, नाऽस्ति ज्ञानं विना दया
ज्ञानी ज्ञानेन जानाति, दयां हिंसां च वस्तुतः ॥३०६॥
काययोगेन हिंसा तु, केवलिनामपि भवेत्
द्रव्यहिंसाऽस्ति सादेहान्, न तु भावेन विन्दत ॥३०७॥
रागद्वेषपरीणामा, द्धिंसाऽस्ति भावतःखलु
रागद्वेषपरीणामं, विना नास्ति हि भावतः ॥३०८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावहिंसां विना द्रव्य,-हिंसया भवबन्धनम्
नाऽस्ति तत्तु परिज्ञाय, भवन्तु स्वोपयोगिनः ॥३०९॥
कर्मबन्धनमुक्त्यर्थं, माऽऽत्मन स्त्वं दयां कुरु
आत्मज्ञानेन स्वाऽन्यानां, दया सत्या प्रकाशते ॥३१०॥
दयां हिंसां न जानाति, मिथ्यादृष्टिरबोधतः
दयां हिंसा च जानाति, सम्यग्दृष्टिः सुबोधतः ॥३११॥
सम्यज्ज्ञानी विजानाति, दयां हिंसां च बुद्धितः
कुत्र दयाप्यहिंसा स्यात्, हिंसाऽपि कुत्रचिद्दया ॥३१२॥
कुत्रचिद्बाह्यतोहिंसा, काययोगेन संभवेत्,
तथापि भक्तिसेवाद्यै, रहिंसा चान्तरा यतः ॥३१३॥
सद्देवगुरुसंघस्य, रक्षणार्थं च बाह्यतः
दोषे सति महाधर्मो, जायन्ते बहुनिर्जराः ॥३१४॥
कायेन नैव हिंसाऽपि, रागद्वेषादिमोहतः
मानसिका भवेद्धिंसा, चाऽन्यघातविचारतः ॥३१५॥
आन्तरा भावहिंसाऽस्ति, द्रव्यहिंसा तु बाह्यतः
गीतार्थगुरुबोधेन, स्वाऽधिकारा दयां कुरु ॥३१६॥
प्रमादयोगतो हिंसा, स्वाऽन्यप्राणविनाशनात्
हिंसाया लक्षणं ह्येत, त्तत्त्वार्थसूत्रभाषितम् ॥३१७॥
सम्यग्दृष्टियुता जैनाः सम्यग्दृष्टिगुणास्थिताः
अविरताश्च हिंसाद्यै, रहिंसादिप्रकांक्षिणः ॥३१८॥
हिंसादौ दोषमन्तारो, हिंसादिदोषहानये
उद्युक्ता हि दयालूनां, रक्षार्थं ते प्रवर्त्तकाः ॥३१९॥
अणुव्रतधरा जैनाः श्रावका द्रव्यभावतः
अणुभङ्गेन जीवानां, निरपराधिदेहिनाम् ॥३२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थूलानां हिंसका नैव, स्थूलहिंसाविरामिणः
औत्सर्गिकापवादाभ्यां, सापेक्षव्रतधारिणः ॥३२१॥

सद्देवगुरुधर्माणां, संघस्य भक्तिहेतवे
सेवार्थं तस्य रक्षार्थं, मौत्सर्गिकाऽपवादिनः ॥३२२॥

भक्त्यादिधर्मकार्येषु, हिंसातः कर्मबन्धनम्
स्वल्पं च निर्जरा बह्व्यो, महापुण्यं प्रजायते ॥३२३॥

अतोगृहस्थिताः श्राद्धा, द्विविधाः स्वाऽधिकारतः
देवादिभक्तिरक्षादौ, प्रवर्त्तन्ते यथातथम् ॥३२४॥

महाव्रतधराः सन्तो, मुक्ता हिंसादिपापतः
साधवो विश्वजीवानां, त्रातारः सन्ति बन्धवः ॥३२५॥

औत्सर्गिकाऽपवादाभ्यां, धर्मसंघादिरक्षणे
विश्वलोकदयाद्यर्थं, प्रवर्त्तन्ते यथातथम् ॥३२६॥

द्रव्यभावदयावन्तः षट्कायजीवपालकाः
निर्दोषाऽऽहारपानेन, जीवन्ति च यथातथम् ॥३२७॥

गृहस्थत्यागिभेदेन, द्विधाधर्मोह्यनादितः
सर्वज्ञैर्बोधितः सत्यो, जैनधर्मः प्रवर्त्तते ॥३२८॥

द्रव्यभावीयहिंसातो, विरतिश्चभवेद्यथा
तथा प्रवर्त्तनं कार्यं, द्रव्यभावदयापरैः ॥३२९॥

दर्शनज्ञानचारित्र,-मोक्षमार्गानुसारिभिः
गृहस्थैस्त्यागिभिर्हिंसा, संत्याज्या च यथातथम् ॥३३०॥

सर्वविश्वस्थबालानां, विद्याशालासु मानवैः
अहिंसाधर्मशिक्षार्थं,-वर्तितव्यं यथातथम् ॥३३१॥

हिंसकानां प्रबोधार्थं, सर्वविश्वेषु वर्तिनाम्
सर्वजातिप्रबन्धेन, वर्तितव्यं दयालुभिः ॥३३२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावद्धिसा भवेत्ताव-दशान्तिराऽऽत्मनो ध्रुवम्
अहिंसावृत्तिकर्मभ्यः, शान्तिःशर्म शिवं भवेत् ॥३३३॥
आत्मनः सद्दया श्रेष्ठा, प्रामाण्यवृत्तिकर्मभिः
हिंसा निजाऽऽत्मनो ज्ञेया, प्रामाण्यभ्रष्टजीवनात् ॥३३४॥
औदार्यसत्यगांभीर्यात्, दया सत्या प्रवर्धते
सर्वलोकसहायेन, दयाधर्मो विवर्धते ॥४३५॥
सर्वखण्डस्थलोकानां, रोगदुःखादिनाशने
परस्परसहायार्थं, म्रियन्तां भव्यमानवाः ॥३३६॥
आत्मशुद्धोपयोगेन, कृतेषु सर्वकर्मसु
अहिंसा चान्तरा सत्या, वर्त्तते ज्ञानयोगिनाम् ॥३३७॥
ज्ञानं सत्यसमाधिश्च, सद्दयैव सतां मता
शुद्धोपयोगतः सत्या, वर्त्तते धर्मिणां दया ॥३३८॥
मनोवाक्कायगुप्तानां, द्रव्यभावेन सद्दया
आत्मनः पूर्णशुद्ध्यर्थं, हेतुभूता प्रवर्त्तते ॥३३९॥
यावद्धिंसापरीणाम-स्तावद्दयाविचारणा
हिंसावृत्तिदयावृत्त्योः, शुद्धाऽऽत्मा हि पृथग्भवेत् ॥३४०॥
हिंसावृत्तेः क्षयार्थं हि, दयावृत्तेः प्रयोजनम्
शुद्धोपयोगिनो द्वाभ्यां, स्वं जानन्ति पृथक् ततः ॥३४१॥
कृतकृत्याश्च सर्वज्ञा, दयाचारप्रपालकाः
बोधयन्ति दयाधर्मं, तस्माद्दयां समाचर ॥३४२॥
सद्दयैव मनः स्वर्गः क्रूरत्वं श्वभ्रमेवच
स्वर्गश्वभ्रंपरिज्ञाय-दयाकर्म कुरुष्व भोः ॥३४३॥
गोमहीष्यादिरक्षार्थं, विश्वस्थसर्वमानवैः
कर्त्तव्यंस्वार्पणंपूर्णं, वित्तदेहादिभिर्भृशम् ॥३४४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मांसाहारेण देहस्य, पुष्टिं जानन्ति केचन
मांसं भुञ्जन्ति पश्वादे–र्निर्दया हिंसका जनाः ॥३४५॥

मांसाहारेण लोकानां, दीर्घायुर्नैव जायते
नश्यति सात्त्विकीबुद्धि–र्देहाऽऽरोग्यं न तात्त्विकम् ॥३४६॥

तामसवृत्तिदोषाःस्यु–र्मांसरक्तादिभोजिनाम्
अतिकामादिदोषैश्च, पापराशिपरम्परा ॥३४७॥

मांसाहारिमनुष्याणां, देहपुष्टिर्न तात्त्विकी
फलान्नदुग्धभोक्तृणां, दीर्घायुः सात्त्विकी मतिः ॥३४८॥

मांसमद्यादिभोगेन, धर्मबुद्धिः प्रणश्यति
बहुरोगाः प्रजायन्ते, भवन्ति दुर्गुणा भृशम् ॥३४९॥

जिव्हास्वादस्य लाम्पट्याद्, देहपुष्टिप्रमोहतः
मांसं भुञ्जन्ति ते पाप–कर्म बध्नन्ति दुःखदम् ॥३५०॥

किञ्चित्सुखं महापापं, पश्वादिमांसभोजिनाम्
इतिविज्ञाय मांसस्य, त्यागं कुर्वन्तु मानवाः ॥३५१॥

पश्वादिहिंसनाल्लोका, विरमन्तु दयापराः
प्रेमतःस्वाऽऽत्मवज्जीवान्, रक्षन्तु धर्मिमानवाः ॥३५२॥

शुद्धोपयोग एवाऽस्ति, चाऽहिंसासंयमस्तथा
ज्ञानंध्यानमहिंसैव, भक्तिसेवाऽस्ति चान्तरा ॥३५३॥

आत्मनः शुद्धभावेन, ह्यहिंसा वस्तुतो भवेत्
आत्मोपयोगसामर्थ्या–ज्ज्ञानी निर्हिंसको ध्रुवम् ॥३५४॥

यज्ञार्थंपशवःसृष्टा–इतिमिथ्याप्रलापनम्
दयाब्धिरीश्वरः प्रोक्तः, स हिंसां नैव भाषते ॥३५५॥

पशुपक्ष्यादिकं सृष्टं, नृणां भक्षणहेतवे
प्रभुणेति प्रभाषन्ते, हिंस्रा अनार्यपापिनः ॥३५६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दयालुरीश्वरोज्ञेयः, समः सर्वत्र देहिषु
विश्वजीवपिता नैवं, ब्रूयाद्धिंसावचो यतः ॥३५७॥
सद्यज्ञा भक्तिसेवाद्याः, पशुहिंसाविवर्जिताः
गवादिपशुलोकानां, रक्षैव यज्ञमर्म वै ॥३५८॥
सद्देवगुरुसाधूनां, पूजाऽन्नपानकर्मभिः
क्षुधार्तानां तृषार्तानां, सेवायज्ञः प्रकीर्तितः ॥३५९॥
ज्ञानंतपोदमोदानं, यज्ञाश्च बहुधा मताः
सद्दयां प्रतिगच्छन्ति, सत्ययज्ञाःस्वभावतः ॥३६०॥
सर्वविश्वस्थलोकानां, हितार्थं याः प्रवृत्तयः
शुभायज्ञाश्च शुद्धा हि, शुद्धोपयोगवृत्तयः ॥३६१॥
आत्मवत्सर्वजीवानां, हिंसा दुःखप्रदायिनी
आत्मवत्सर्वजीवानां, दया शान्तिप्रदायिनी ॥३६२॥
आत्मवत्सर्वजीवानां, जीवनेच्छा प्रवर्तते
स्वाऽऽत्मनो मृत्युवद्भीतिः, सर्वेषां भीतिरुद्भवेत् ३६३॥
यथा मम प्रियो देह-स्तथा सर्वाऽत्मनां खलु
ज्ञात्वैवं सर्वजीवानां, यथायोग्यं दयां कुरु ॥३६४॥
पशून् हत्वा च ये यज्ञे, ब्रुवन्ति पशवो दिवम्
गच्छन्त्येवंमहामिथ्या-वादका मोहबुद्धयः ॥३६५॥
यज्ञहोमेन यैःस्वर्गं, नीयन्ते पशवश्चतेः
हुत्वा पुत्रादिकं स्वीयं, स्वर्गंन गमयन्तिकिम् ॥३६६॥
अयोग्यलग्नकर्माद्यं, मिथ्याऽधर्म्यकुरीतयः
अधर्म्यमैथुनं हिंसा, देहवीर्यस्य दुर्व्ययः ॥३६७॥
वैद्यकधर्म्यशास्त्राद्यद्, विरुद्धमतिमैथुनम्
स्वाऽन्यघाताच्चरोगात्त-द्धिंसैव ज्ञानिसम्मतम् ॥३६८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोवाक्कायहिंसादि,-कारकं कर्म यच्च तत्
हिंसां ज्ञात्वैव तत्त्याज्यं, सर्वखण्डस्थमानवैः ॥३६९॥
अधर्म्यकामदोषादि-वृद्धि कृत्कर्म यद्भवेत्
तत्तु हिंसां प्रविज्ञाय, त्यजन्तु सद्दयालवः ॥३७०॥
कन्याविक्रयतो हिंसा, वरविक्रयतस्तथा
आत्महत्या महाहिंसा, सत्यज्ञानं दयाकरम् ॥३७१॥
हिंसा बन्धाय विज्ञेया, चाऽहिंसा स्वाऽऽत्ममुक्तये
हिंसा दुःखाय विज्ञेया, चाऽऽत्मानन्दाय सद्दया ॥३७२॥
दयादानादितः पुण्य-कर्मबन्धो भवेत्खलु
पुण्याद् धर्मस्य सामग्री, प्राप्यते पुण्यकर्मभिः ॥३७३॥
शुद्धवायुर्जलं शुद्धं, स्थानं सात्त्विकभोजनम्
योग्याहारो विहारश्च, दुष्टव्यसनवर्जनम् ॥३७४॥
प्रकाशो मृत्तिका शुद्धा, भोजनं फलदुग्धयोः
देहवीर्यस्य संरक्षा, दीर्घायुर्हेतवः स्मृताः ॥३७५॥
ज्ञात्वैवं धर्मिभिश्चाधि-व्याधिवर्जनहेतवे
दयावद्भिर्जगल्लोकाः कर्तव्या दीर्घजीविनः ॥३७६॥
स्वाऽऽत्मदया प्रकर्तव्या, दयावद्भिर्विवेकतः
मद्यमादकपेयादि-त्यागेनभव्यमानवैः ॥३७७॥
दीर्घायुः साधनं सर्वं, दयैव धर्महेतवे
विज्ञायैवं च संसाध्यं, दीर्घायुर्जीवनं निजम् ॥३७८॥
स्वस्य धर्मस्य मोहेन, चाऽशुभमन्यधर्मिणाम्
चिन्तितं च कृतं तद्धि, निन्दामि सत्यभावतः ॥३७९॥
स्वाऽन्यव्याधिविनाशाय, स्वाऽन्याधिनाशहेतवे
स्वान्योपाधिनिवृत्त्यर्थं, यत्कर्म तद्दया भृशम् ॥३८०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरुपाधिदशावाँश्च, व्याध्याधिवर्जितो नरः
दीर्घायुष्मान् भवत्येव, शुद्धब्रह्माऽधिकारवान् ॥३८१॥
आजन्मब्रह्मचर्येण, दीर्घायुर्धारको भवेत्
मद्यमांसपरित्यागाद्, दीर्घजीवी भवेन्नरः ॥३८२॥
मनोवाक्काययोगानां, दीर्घजीवनहेतवः
ते दयार्थं प्रविज्ञाय, दया साद्ध्या दयालुभिः ॥३८३॥
वित्तदेहादिभोगेन, दयाधर्मैकतत्परैः
व्याख्यानादिप्रबन्धेन, यतितव्यं विवेकतः ॥३८४॥
पश्चात्तापादिभावेन, प्रायश्चित्तेन मानवाः
हिंसादिपापतः शुद्धा, भवन्ति च दयोद्यताः ॥३८५॥
पक्षपातादिमोहेन, देशनीत्यादिरीतयः
मनुष्यैः कल्पितास्तत्र, हिंसादिदोषसंभवः ॥३८६॥
क्षुत्तृड्रोगादियुक्तानां, दुःखिनो दुःखनाशने
अर्पिता वाङ्मनःकायै-र्देवास्ते देहधारिणः ॥३८७॥
बाह्याऽभ्यन्तरदुःखानां, नाशाय सर्वदेहिनाम्
द्रव्यभावदयाद्यैर्ये, प्रवृत्ता स्तेसुरोत्तमाः ॥३८८॥
कारुण्यभावनाचारै-र्जीवन्ति जीविनो हि ते
हिंसाचारविचारैर्ये, जीवन्ति ते मृताः खलु ॥३८९॥
दयाद्यर्थं मनो वाणी, काया वित्तं च यस्य ते
जीवन्तु देवरूपास्ते, विश्ववत्सलसज्जनाः ॥३९०॥
यदायदा हि विश्वस्मिन्, भृशं हिंसा प्रजायते
तदातदा प्रजायन्ते, दयावन्तो जिनादयः ॥३९१॥
हिंसादिपापनाशार्थ-महिंसादिप्रवृद्धये
मोहारिशक्तिनाशाय, प्रभवंति जिनेश्वराः ॥३९२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदा यदा दयाख्यानां, प्राबल्यं क्षीयते तदा
खण्डदेशे च जायन्ते, महासन्तो दयालवः ॥३९३॥

युगमुख्याःप्रजायन्ते, सूरयो धर्मधारिणः
आत्मसामर्थ्यतो विश्व–दयासत्यप्रचारिणः ॥३९४॥

येषां चित्ते दया नास्ति, दुःखिनामवलोकनात्
जीवन्तो राक्षसा ज्ञेया, अशुभा जीविनोऽपि ते ॥३९५॥

दुःखिनो देहिनो दृष्ट्वा, तद्दुःखनाशनोद्यताः
जीवन्तस्ते शुभा ज्ञेया–देवा देहावतारिणः ॥३९६॥

वीतरागमनुष्यैर्हि–दया सत्या प्रकाश्यते
सम्यज्ज्ञानेन कर्त्तव्य–महिंसाकर्म मानवैः ॥३९७॥

नाऽस्ति हिंसासमं पापं, नाऽस्तिधर्मो दयासमः
नाऽस्ति ज्ञानसमं दानं, तपो नास्ति क्षमासमम् ॥३९८॥

धृत्वा मनुष्यजन्माऽपि, दयाधर्मो न धारितः
हारितं जन्म तेनैव, ज्ञात्वा दयां समाचर ॥३९९॥

दयोपदेशं विज्ञाय, यथाशक्ति दयां कुरु
कुरुष्व मा प्रमादं भोः, जागृहि हृदि सत्त्वरम् ॥४००॥

दुर्लभं दशदृष्टान्तै–र्नृजन्म सर्वजन्मसु
संप्राप्य जीव मा मुह्य, दयाधर्मं समाचर ॥४०१॥

दयाचारविचारेण, सर्वंविश्वंदयामयम्
सन्तु परोपकारार्थं, विश्वलोकप्रवृत्तयः ॥४०२॥

हिंसाचारविचाराश्चि, नश्यन्तु सर्वविश्वतः
अस्तु शान्तिमयं विश्वं, प्रभवन्तु दयालवः ॥४०३॥

राजानो मन्त्रिणः श्रेष्ठाः, सन्तु वीरा दयालवः
सर्वविश्वस्यशान्त्यर्थं, दयाधर्मः प्रवर्धताम् ॥४०४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धप्रेम्णा दयावृद्धि–र्हिंसानाशश्च जायते
वैरनाशोऽस्ति सत्प्रीत्या, मैत्र्या च स्वाऽऽत्मवज्जगत् ।४०५॥
सत्यं जानीत भोलोकाः, सत्ये धर्माः प्रतिष्ठिताः
सत्याज्ञया प्रवर्तन्ते, ते यान्ति सद्गतिं ध्रुवम् ॥४०६॥
सत्याज्ञया प्रवर्तध्वं, रागं द्वेषं विहाय च
सत्यनिष्ठा जनाः कर्म–क्षयं कुर्वन्ति सत्वरम् ॥४०७॥
सत्यमेव प्रभोराज्ञा, सत्याद्दया प्रवर्धते
मनोवाक्काययोगेन–हिंसां त्यजन्तु मानवाः ॥४०८॥
सत्यं पश्य प्रियं पश्य, सत्यं पथ्यं समाचर
सत्यं ब्रूहि च सर्वेषां, सत्यं शुभं प्रियं कुरु ॥४०९॥
आत्मनः सर्वशक्तीनां, प्रादुर्भावं कुरुष्व भोः
आत्मन्येव सुखंसत्यं, बाह्यभोगेषु मामुहः ॥४१०॥
सर्वविश्वस्थजीवानां, सुखार्थं यत्न तत्कुरु
दुःखं नेष्टं सुखं जीवा, इच्छन्त्यतः सुखं कुरु ॥४११॥
आत्मानन्दस्य सम्प्राप्ति–र्दयाद्यैः सात्विकैर्गुणैः
अतोदयादिभिःसाध्य–आत्मानन्दो निजाऽऽत्मनि ॥४१२॥
मोक्षमूलं दयां ज्ञात्वा, देहिनां त्वं दयां कुरु
दयैव सत्प्रभोर्दृष्टि–र्दयायां सर्वशक्तयः ॥४१३॥
दयां विना प्रभुर्दूरे, नास्ति धर्मो दयां विना
दयामयः प्रभोर्धर्मः, प्रभोर्वाणी दयामयी ॥४१४॥
सद्दयायां तपःसेवा–भक्तियोगादिकर्मणाम्
समावेशो भवत्येव, सद्दयां त्वं समाचर ॥४१५॥
रक्षिते हि दयाधर्मे, धर्मो रक्षति रक्षकान्;
स्वान्यजीवप्ररक्षार्थं, दयाधर्मं समाचर ॥४१६॥
दयाया भावना याया, आत्मोत्थिता यदा यदा
तदा ताः काव्यरूपेण, संलिखिता मया शुभाः ॥४१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुक्रमो न पद्यानां, दयाग्रन्थे कृतो मया
पुनर्दोषो न पद्येषु, सद्दया परिणामतः ॥४१८॥
मनोवाक्कायतो हिंसा, कृता कारापिता मया
मिथ्या भवतु तत्सर्वा, दयाग्रन्थे कृते सति ॥४१९॥
मोहेन ह्यद्यपर्यन्तं, हिंसाकर्म कृतं मया
हिंसादिपापनाशोऽस्तु, कृतग्रन्थफलेन च ॥४२०॥
शरयुग्माऽधिकैः पद्यै-श्चतुः शतैर्दयाकरः
दयाग्रन्थः कृतोविश्व-लोकानां शान्तिकारकः ॥४२१॥
श्वबालस्य कृता पीडा, मया तत्पापशुद्धये
प्रायश्चित्तं कृतं पूर्णं, दयाग्रन्थे कृते शुभे ॥४२२॥
अहिंसाधर्मसद्बुद्ध्या, दयाग्रन्थे कृते सति
विश्वस्मिन्सर्वलोकेषु, दयाबुद्धिः प्रवर्धताम् ॥४२३॥
सर्वविश्वस्थलोकानां, दयाचारविवृद्धये
दयया विश्वशान्त्यर्थं, दयाग्रन्थः प्रकाशताम् ॥४२४॥
खसिद्धिग्रहचन्द्राङ्कै (१९८०) र्मिते वैक्रमवत्सरे
मार्गशुक्लद्वितायायां, रवौ हि शुभभावतः ॥४२५॥
कृतः पूर्णो दयाग्रन्थो, बुद्धिसागरसूरिणा
मया च तद्दिने प्रीत्या, घंटाकर्णस्य मन्दिरे ॥४२६॥
घंटाकर्णस्य वीरस्य, प्रतिष्ठा च कृता मया
मधुपुर्यां (मह्लुडी) स्थितिं कृत्वा, बुद्धिसागरसूरिणा ॥४२७॥
शमोऽस्तु सर्वविश्वस्य, दयाधर्मस्य सद्बलात्
शान्तिस्तुष्टिश्च पुष्टिश्च, भवन्तु सर्वदेहिनाम् ॥४२८॥
ॐ अर्हंश्रीमहावीरः, सर्वज्ञः परमेश्वरः
दयासत्यप्रचारेण, कुर्या द्विश्वस्य मङ्गलम् ॥४२९॥

ॐ अर्हंमहावीर शान्तिः३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्रेणिकसुबोधग्रन्थः

सर्वज्ञ हेवीर सदा जय त्वं,
धीरः परेशो जगदीश्वरोऽसि ।
गुणास्त्वदीया भगवन्नपाराः,
कृत्वा कृपां तारय मां दयालो ॥ १ ॥

सत्योपदेशं कुरु नाथ मह्यं,
विनिश्चयाद्वा व्यवहारनीतेः ।
श्रीश्रेणिको भारतदेशराजो-
ऽहंप्रार्थये नाथ निजाऽऽत्मराज्यम् ॥ २ ॥

त्वय्यस्ति विश्वास उदारको मे,
प्रकाशय त्वं खलु सर्वसत्यम् ।
न त्वत्समः कोऽपि जगत्सु देव-
स्त्वद्भक्तिसेवामनुकामयेऽहम् ॥ ३ ॥

निशामय श्रेणिक सत्यभूप,
त्वमाऽऽत्मरूपं ननु विद्धि विद्धि ।
आत्मावबोधाद्भवति स्वमुक्तिः,
किञ्चिद्भवेद्भूमिषु नापरोक्षम् ॥ ४ ॥

निजाऽऽत्मशक्तिः परमास्त्यपारा-
ऽस्त्यनन्तसत्याश्रय एष आत्मा ।
जानाति यो ब्रह्म स वेत्ति सर्वं,
गर्वो न दुःखं न भवेच्च तस्मात् ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विश्वास आत्मन्युदितोऽस्ति यस्य,
स जैनभक्तो मम निश्चयेन।
अस्त्याऽऽत्मनि सत्यसुखं विशालं,
सर्वं हि दुःखं जडमोहतोऽस्ति ॥ ६ ॥
स्वर्गो मनो यद्वशमाऽऽत्मनोऽस्ति
मुक्तिर्भवेदाऽऽत्मवशं मनश्चेत्।
मृते मनस्यस्ति समग्रमुक्ति-
र्मनोजयत्वेन भवेद्विमुक्तिः ॥ ७ ॥
यावद्भवेच्चञ्चलता स्वचित्ते,
संसारमध्ये भ्रमणं च तावत्।
रागाद्यधीनं च यतोऽस्ति चित्तं,
स्वप्नेऽपि नो तत्र सुखोद्भवःस्यात् ॥ ८ ॥
समग्रविश्वस्य भवेदधीश,
स्तथाऽपि शान्तिं लभते न किंचित्।
मनुष्य आशानुचरोऽस्तियाव-
त्सुखी न तावत्स विनिश्चयेन ॥ ९ ॥
जिगाय चित्तं स जिगाय विश्वं,
दुःखंतु चेतोजयमन्तरा स्यात्।
मनोवशः कोऽपि भवेन्मनुष्यो-
जगत्सु शान्तिं लभते न कांचित् ॥ १० ॥
मोहस्य यावद्वशमस्ति चित्तं,
शक्रादयःस्युः सुखिनो न तावत्।
तमोरजःसत्वगुणाश्रयःस्या-
त्तावज्जिनः स्यान्नच कोऽपि जीवः ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवन्ति कर्मप्रकृतेर्वशा ये,
ब्रह्मादयस्तेऽपि पराश्रयाःस्युः ।
त्वं भव्यमाऽऽत्मानमतो लभस्व,
धर्मस्य सत्कर्म कुरुष्व तस्मात् ॥ १२ ॥

मोहेन नूनं परतन्त्रता स्या–
च्चतुर्गतिष्वाशु जना व्रजन्ति ।
इन्द्रादयस्ते परवन्त एव,
न मानवाः कर्मवशाः स्वतन्त्राः ॥ १३ ॥

न ज्ञायते मोहत इष्टसत्यं–
दुःखी भवेन्मोहवशो मनुष्यः ।
पश्यन्ति नो मूढजनाश्च देवं,
न चित्तमोहं परिवर्जयन्ति ॥ १४ ॥

तस्मादवै श्रेणिकराज लब्ध्वा,
ज्ञानं परं मानय चाऽऽत्मधर्मम् ।
भ्रान्तिर्विनश्येत्परमाऽऽत्मबोधाद्,
वर्तेत सौख्यं निरुपाधिशान्तिः ॥ १५ ॥

जडेषु नो रक्ष ममत्वलेशं,
दिवानिशं ब्रूहि मुखेन सत्यम् ।
कदापि न स्या जडमोहमुग्ध–
स्तस्माच्च सोऽसौ भविताऽऽत्ममुक्तिः ॥ १६ ॥

विनश्वराः पुद्गलपर्यवास्ते,
स्वीया भविष्यन्ति न ते कदाचित् ।
दूरं ममत्वं कुरु पुद्गलानां,
निवारय त्वं जडभोगबुद्धिम् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पृथक् चल त्वं व्यवहारनीत्या,
निर्लेपतश्चाऽऽत्मनि मोदमानः ।
प्रवर्त्तते स्वाऽऽत्मनि सर्वधर्मो-
निर्लेपतः कर्म कुरुष्व सर्वम् ॥ १८ ॥

विनाऽऽत्मना नास्ति जडेन शान्ति-
र्मिथ्याभ्रमं वारय सर्वमेतम् ।
न त्वं प्रमादी जडपर्यवे स्या-
गर्वी नवा स्या धनसत्तया त्वम् ॥ १९ ॥

सम्बन्धिनो ये स्वजनाश्च वर्गा-
नरान्स्त्रियः पश्यसि यांस्त्वमित्थम् ।
पर्यायतस्ते परिवर्तमाना-
मुह्यन्ति नो ज्ञानिजनाश्च तत्र ॥ २० ॥

त्वमाशु हे श्रेणिक चेत चेत,
कालःस्ववेगं शिरसि प्रदत्ते ।
कालोऽपि नाऽऽत्मानमहो भुनक्ति,
स्यादाऽत्ममोदेन सुखं यथार्थम् ॥ २१ ॥

आत्मा स एवास्ति जिनः पराऽऽत्मा,
दीनं निजं मानय मा कदाचित् ।
आत्मा त्रिलोकस्य परेश्वरोऽस्ति,
स्वान्ते परेशं प्रविलोकय त्वम् ॥ २२ ॥

स्याद् द्वेषरागप्रशमेन बुद्धः
शुद्धो भवेत्सत्यमयं निजाऽऽत्मा ।
विनाऽऽत्मना न त्वमसि द्वितीयः
प्रेम्णेतिवाक्यं मम मानय त्वम् ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याद्द्वेषरागप्रशमो यथाऽत्र,
तथाऽऽत्मबोधः समुदेति दिव्यः ।
आत्मस्वरूपे सुखमस्ति नूनं,
सर्वत्र जीवेषु दया भवेच्च ॥ २४ ॥
नश्येत्कषायो खलु यद्यदंशैः ।
साम्यं भवेदाऽऽत्मनि तत्तदंशैः,
सत्त्वादिसर्वप्रकृतौ गताया-
माऽऽत्मा स्वयं स्यादपवर्गपात्रम् ॥ २५ ॥
उदेति साम्यं हृदि यद्यदंशै,
स्तदंशतश्चोपशमोऽपि तत्र ।
स्वकर्मणांक्षायिकभाव इष्टे,
मुक्तिर्भवेदाऽऽत्मनि चित्स्वरूपा ॥ २६ ॥
स्याद्बाह्यदृष्ट्या खलु कर्मबन्धः
स्यादाऽऽत्मदृष्ट्या तु निजाऽऽत्मधर्मः ।
स्यादाऽऽत्मदृष्ट्या न च कर्म किञ्चि-
दाऽऽत्माऽऽत्मदृष्ट्या प्रविलोक्यमानः ॥ २७ ॥
स्वप्नस्य जाग्रत्सु यथा विनाश-
स्तथाऽऽत्मबोधेषु च मोहनाशः ।
यत्राऽऽत्मदृष्टि र्न ततोऽस्ति मोहो,
जीवन्विमुक्तोहृदयेऽस्ति विज्ञिः ॥ २८ ॥
निजाऽऽत्मना श्रेणिक जागृहि त्वं,
जाग्रत्सु सौभाग्य मथास्ति सर्वम् ।
त्वमाऽऽत्मनोत्तिष्ठ विधूय निद्रां,
मामुख चित्तेषु लभस्व सौख्यम् ॥ २९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यं तु शुद्धाऽऽत्मनि सत्यमस्ति,
त्वं सर्वनीत्या कुरु सर्वकार्यम् ।
मा रक्षय त्वं परमाणुकांक्षां,
त्वं स्वादयाऽऽत्मानुभवस्य सौख्यम् ॥ ३० ॥
उद्धारयाऽऽत्मानमिहाऽऽत्मना त्वं,
रागं कुरु स्वाऽऽत्मनि पूर्णपूर्णम् ।
अर्हत्ववृत्त्याऽस्ति तु कर्मबन्धो-
निर्मोहतः स्यादविनाश आत्मा ॥ ३१ ॥
कालत्रयेऽप्यस्ति स नित्य आत्मा,
स्वाऽऽत्मा चिदानन्दमयः पवित्रः ।
एवं त्वमाऽऽत्मानमवेहि बन्धो,
स्वतःस्वमुद्धारय भारतेश ॥ ३२ ॥
पूर्णश्चिदानन्दमयः पवित्रो,
देहोऽस्त्यनित्यःखलु वस्त्रतुल्यः ।
स्वंकर्मरूपं नच पश्य भूप,
भ्रान्त्या च कर्मादिकमत्र पश्य ॥ ३३ ॥
भ्रान्तौ गतायां स्वयमस्त्यबन्धः
कर्मादिकानां न भवेच्चबन्धः ।
मोहो महीयान् खलु कर्ममूलं,
भ्रान्तौ गतायां न भवेद्भ्रमश्च ॥ ३४ ॥
मोहे विनष्टे खलु शुद्धआत्मा,
बुद्धोजिनोऽर्हन्प्रभुरस्ति साक्षात् ।
लिङ्गं न जातिर्भवदाऽऽत्मनोऽस्ति,
सर्वस्य विश्वस्य परेश्वरोऽस्ति ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कीर्त्यादिसर्वं च शुभाशुभं य-
त्स्वप्नोपमं तत्र भवेन्न गर्वः ।
आरोप एष प्रकृतेर्हि सर्वः,
सर्वं तु तद्विद्धि निजाऽऽत्मभिन्नम् ॥ ३६ ॥

हृत्कल्पितो यो व्यवहार एष,
तत्माऽऽत्मधर्मं न च विद्धि सारम् ।
चित्तस्य भावा हि शुभाशुभाख्या-
भिन्नस्वभावो हि ततोऽयमात्मा ॥ ३७ ॥

यच्चेतसारोपितमस्त्यसत्यं,
न ज्ञानिनस्तत्र रुदन्ति किञ्चित् ।
ये कल्पिते दुःखसुखे मनोभि-
स्ते ज्ञानिनो नाम विदन्ति मिथ्या ॥ ३८ ॥

शुद्धाऽऽत्मका ज्ञानिजना भवन्ति,
त्वमाऽऽत्मनः श्रेणिक विद्धि नीतिम् ।
ये द्वेषरागादिविकल्पकास्तान्,
जानीहि संसारनिदानभूतान् ॥ ३९ ॥

द्वेषस्य रागस्य च बुद्धिभिन्नं,
त्वं ज्ञानिनं विद्धि जिनं नरेन्द्र ।
स्याद्द्वेषरागत्यजनेन सौख्यं,
तौचेद्भवेतां न ततोऽस्ति सौख्यम् ॥ ४० ॥

ये रागिणो द्वेषिजनाश्च जीवाः,
शक्रादयश्चाऽपि तु पामरा हि ।
रागोऽस्ति कश्चिन्नच शुद्धरूपे,
त्यागो न कश्चिन्निजशुद्धधर्मे ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विहाय विद्वेषमनन्यबुद्ध्या,
सदाऽनुकूलां समतां भजस्व ।
तेनैव ते शुद्धमति र्भवित्री,
ततोऽचिरादात्मसुखाऽनुभावः ॥ ४२ ॥
शुद्धोभवेद्यत्रनिजाऽऽत्मधर्मो-
व्रतादयस्तत्र लयं प्रयान्ति ।
रागोऽस्ति कश्चिन्न निजाऽऽत्मरूपे,
त्यागोऽस्तिकश्चिन्ननिजाऽऽत्मधर्मे ॥ ४३ ॥
त्यागं च वैराग्यमथानुरागं,
चित्तोत्थितं वीक्ष्य च जागृहि त्वम् ।
मनोमृतौ नश्यति चित्तधर्मो-
निजाऽऽत्मरूपं तु विभाति नित्यम् ॥ ४४ ॥
व्रतादितश्चास्ति तु भिन्न आत्मा,
निमित्तधर्मोऽपि ततोऽस्ति भिन्नः ।
आत्माऽस्त्यरूपी सच चिद्घनश्च,
वर्णादयः सन्ति न तस्य रूपम् ॥ ४५ ॥
जडेष्वहंभाव उदेति याव-
त्तावन्न पूर्णा समुदेति शान्तिः ।
जडेष्वहंभाव उदेति नो चे-
त्तदा स आत्मा प्रविभाति मुक्तः ॥ ४६॥
अहंक्रियातो भवति भ्रमश्च,
ज्ञेयश्चधर्मो निरहंक्रियातः ।
जडेषु कोप्यस्ति न चाऽऽत्मधर्मो,
दुःखं लयं याति निजाऽऽत्मबोधात् ॥ ४७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्यात्सुखं दुःखमथोऽस्ति पापा-
त्ते पुण्यपापे सह चेतसा स्तः ।
भिन्नं ततश्चाऽऽत्मिकसौख्यमस्ति,
तस्मिन्भव श्रेणिकराज लीनः ॥ ४८ ॥

पञ्चेन्द्रियाणां च यतोऽस्ति भोगः,
स्वज्ञानिनां तत्र भवेद्भोगः ।
जीवेष्वनासक्तितएव भोगाद्,
भवेदबन्धो नच लिप्त आत्मा ॥ ४९ ॥

चेन्मृत्तिकां खादति पंचवर्णीं,
तथापि शङ्खो धवलो हि दृष्टः ।
कर्मोदयैर्भोगचयं च भुञ्जन्,
ज्ञानी स्वयं वर्तत आत्मयोगात् ॥ ५० ॥

स्यात्कर्मणां नाशनमाऽऽत्मबोधा-
ज्जडा जडत्वैः परिणामवन्तः ।
आत्मस्वभावेन भवेन्निजाऽऽत्मा,
कदाचिदासक्तिमृते न बन्धः ॥ ५१ ॥

जलेषु यद्वत्तरकास्तरन्ति,
भोगोदधौ ज्ञानिजनास्तरन्ति ।
स्यात्पूर्वकर्मोदयतश्च भोग-
स्ततो मिलेत्तादृश एव योगः ॥ ५२ ॥

व्यापारतश्चैव यथा विषाणां,
लोका म्रियन्ते न तथा च विद्वान् ।
भोगांश्च भुञ्जन्नपि लेपशून्यः
कदाचिदासक्तिमृते न बन्धः ॥ ५३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्त्याऽऽत्मबोधस्य विशालशक्तिः
कर्माणि तिष्ठन्ति न चैतदग्रम् ।
दुःखे सुखे चापि विभाति साम्यं,
न भोगराशिः समुदेति तत्र ॥ ५४ ॥

कदा निजाऽत्माभिमुखंमनःस्या-
त्तदा न भोगुषु रसग्रहः स्यात् ।
यतो निजाऽऽत्मा परिणामशुद्धः
प्रवेद्यते तत्र च पूर्णबुद्धः ॥ ५५ ॥

न मुच्यते ज्ञानिजनस्य भोगो,
जन्मान्तरोपार्जितकर्मयोगात् ।
तथापि भोगेषु न रागरोषौ,
स्यातामबन्धश्च पुनस्तदाऽऽत्मा ॥ ५६ ॥

साक्षीन्द्रियेष्वस्ति मनस्सु चाऽऽत्मा,
प्रवर्तते स्वे विषये स साक्षो ।
कुर्यात्समग्रं तु सलक्ष्यमाऽऽत्मा,
प्रवर्ततेऽध्यक्षमथाऽऽत्ममोदात् ॥ ५७ ॥

अनन्तशक्त्याकर एष आत्मा,
वर्तेत निष्काममथोपयोगैः ।
किम्वा भवेन्मोहविषं तदग्रे,
ज्ञानी जनश्चेतसि हृष्ट एव ॥ ५८ ॥

कुर्यात्क्रियां किन्तु न कर्मबन्धो-
ज्ञानिजनो भोग्यपि नैव भोगी ।
न बध्यते ज्ञानिजनो जडैस्तु,
किंस्युर्दिनेशाभिमुखं तमांसि ॥ ५९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानी विधातुं सकलं स्वतन्त्रो-
दीनो विपत्तौ न समागतायाम् ।
जडक्रिया ज्ञानिपुरो भवेत्किं,
क्षमेति सिद्धान्तमवेहि भूप ॥ ६० ॥

सम्यक्त्विनो ये च नराः स्त्रियो वा,
ऐतेऽपुनर्बन्धिन एव सन्ति ।
न सर्पदन्तेषु विषं भवेच्चेद्,
विषं चटेन्नैव तदस्य दंशात् ॥ ६१ ॥

वसेन्न नासक्तिविषं कदाचि-
त्प्रवर्तते ज्ञानिजनस्य सौख्यम् ।
कुर्यात्समग्रं न पुनःसमग्रे,
स्याज्ज्ञानिनामाऽऽत्मनि चैव दृष्टिः ॥ ६२ ॥

वर्णस्य धर्मस्य च कर्म कुर्व-
न्न लिप्यते ज्ञानरहस्यमेतत् ।
प्रवर्ततेऽसौ च निजाऽधिकारे,
कुर्यात्क्रियाः किन्तु भवेदकर्मा ॥ ६३ ॥

कुर्यात्क्रियां स्यादखिलांहितार्थं,
यतस्ततःस्यात्सरलं हि चित्तम् ।
स्याज्ज्ञानिनां क्षेमकृते हि सर्वं,
भवन्ति दुःखान्यपि धर्मवृद्ध्यै ॥ ६४ ॥

स्याज्ज्ञानिनां सा प्रकृतिः स्वशुद्ध्यै,
आत्माऽऽत्मनः स्यात्परिणामवाँश्च ।
बाह्येषु भोगः प्रकृतेस्तुवक्र-
स्तथापि चान्तस्तु भवेदवक्रः ॥ ६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ददाति कर्मप्रकृतिः सहायं,
पातो भवेद्येन न चोर्ध्वगानाम् ।
भूत्वा स पश्चाच्च पुरः प्रयाति,
भूत्वैकशुद्धो लभते स्वसिद्धिम् ॥ ६६ ॥

प्रवर्तते ज्ञानिजनो जगत्सु,
तथापि कुत्रापि न बध्यतेऽसौ ।
सम्यग्मते श्रेणिक राजराज,
सम्यक् च सर्वं तव भारतेश ॥ ६७ ॥

स्यात्सम्वरः श्रेणिक आस्रवोपि,
स्याज्ज्ञानिनां वस्त्वखिलं हि सम्यक् ।
अस्तीदृशी ज्ञानवतां तु शक्ति-
श्चित्तेषु नाऽऽसक्तिरुदेति यस्याः ॥ ६८ ॥

मिथ्यात्वशास्त्रं प्रभवेच्च यद्य-
त्सम्यज्ज्ञजीवेषु तदस्ति सम्यक् ।
मिथ्यात्विनां ग्रन्थचयोऽपि सम्यग्,
मिथ्यात्वभावं लभते स नूनम् ॥ ६९ ॥

मिथ्यात्विनो मूढजनाश्च ये स्युः
स्यात् सम्वरो प्यास्रवकृद्धि तेषाम् ।
ये हेतवः सन्ति भवाब्धिमुक्तौ,
ते बन्धनार्थं प्रभवन्ति तेषाम् ॥ ७० ॥

विनाऽऽत्मबोधं सकलं हि मिथ्या,
रोदो यथा निर्जनकाननेषु ।
देहस्य चित्तस्य च याः क्रियास्यु-
र्गुणाय ताः सन्ति निजाऽऽत्मबोधात् ॥ ७१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्कालतः स्याच्चनिजाऽऽत्मबोध,
आत्मोपयोगोऽपि ततो हि कालात् ।
विनाशयेत्कर्मफलं ततो हि,
स्यादल्पबन्धो बहुनिर्जराश्च ॥७२ ॥

ततो हि कालाद् बहुनिर्जराःस्युः,
स्यात्कर्मबन्धः परमल्प एव ।
सर्वा हि कर्मप्रकृतिः प्रयाति,
पूर्णा भवेत्तत्र निजाऽऽत्मशुद्धिः ॥ ७३ ॥

यत्कालतः स्याच्चनिजाऽऽत्मबोध-
स्तत्कालतश्चाऽऽत्मरसस्य पानम् ।
ज्ञाने च भक्तौ मन आशु मत्तं,
भवेत्तनौ सत्यपि मुक्तिसौख्यम् ॥ ७४ ॥

देवोऽस्त्यामाऽत्माय तनुमंदिरे च,
सेवस्व तं तीर्थशिरोमणिं त्वम् ।
कुरुष्व हेश्रेणिक कर्म सर्वं,
स्याः किन्तु निष्काम इतोऽन्तरे त्वम् ॥ ७५ ॥

कौलेयको लेढि यथास्थिखण्डं,
मनोऽपि तद्वद्विषयाँश्च लेढि ।
मिलेन्न रक्तं च यथाऽस्थिलेहे,
भोगे तथाऽसक्तिकरोऽस्ति जीवः ॥ ७६ ॥

पशोर्बलं विद्धि च कामचेष्टां,
ततः सदाक्लेशपरम्पराऽस्ति,
जीवा भ्रमन्त्येव च काममुग्धा-
दुःखस्य नान्तं मनुजा लभन्ते ॥ ७७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामादयः सन्ति हि दुःखमूलं,
भ्रान्त्या न तेषु भ्रम भारतेश।
रागं विना यत्र भवेच्च भोगो,
नास्त्याऽऽत्मनस्तत्र च कर्मबन्धः ॥ ७८ ॥

कुर्वन्ति निष्कामधिया नरा वा,
स्त्रियश्च सर्वव्यवहारमेव।
जीवन्विमुक्तः खलु तत्र सत्यं,
सर्वक्रिया चेदुपयोगतः स्यात् ॥ ७९ ॥

दयाविलीनं मन आत्मनि स्या-
दाऽऽत्मा जिनः स्यात्स च वीतरागः।
भूते सति स्वाऽऽत्मभवैकताने,
भवेद्ध्रुवं तत्र च मुक्तिमानम् ॥ ८० ॥

स्युर्ज्ञानिनां चेतसि सर्वधर्माः,
कुर्वन्ति यत्कर्म भवेत्स्वयोग्यम्।
यत्कर्म योग्यं खलु यत्र काले,
कुर्वन्ति ते योग्यमुपायमेत्य ॥ ८१ ॥

धर्मोऽस्तिसज्ज्ञानिजनान्तिकेषु,
शर्माऽस्त्यपि ज्ञानिजनस्य पार्श्वे।
स सर्वकर्माशयमाशु विद्याद्,
व्रजेन्न पश्चाद् भ्रमितो न च स्यात् ॥ ८२ ॥

भवेत्स्वतंत्रो व्यवहारकार्ये,
वाक्कायचित्तानि वशानि यस्य।
चतुर्विधश्चेद्दशजैनसंघः
सर्वोन्नतिं स्वांहि सुखेन विन्ते ॥ ८३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्याभिलाषस्य वधं न कुर्या-
त्कुर्यान्नवा कार्मिकदास्यवार्ताम् ।
प्राणाँस्त्यजेत्सत्यकृते निजस्य,
कृत्वा मदीयं वचनं प्रमाणम् ॥ ८४ ॥

स्वातंत्र्यतः कर्मगुणौ विधातुं,
धरेत्कदाचिन्न च नाम लज्जाम् ।
राज्यादि सर्वव्यवहारकार्यं,
सेवस्व हे भूप निजाधिकारात् ॥ ८५ ॥

निजाधिकारेण कुरुष्व राज्यं,
न्यायेन साम्राज्य मुदेतियस्मात् ।
निजाऽधिकारं न च विस्मर त्वं,
जहीहि नो कर्म निजाऽधिकारि ॥ ८६ ॥

निजाऽधिकारे व्यवहारकार्यं,
कृते मनः शुद्धिरवश्यमस्ति ।
प्रवृत्तिधर्मं च निवृत्तिधर्मं,
ज्ञात्वा स्वकर्माणि कुरु क्रमेण ॥ ८७ ॥

प्रवृत्तिधर्माचरणेऽस्ति धर्मो-
गृहस्थितानां व्यवहारतोऽस्ति ।
भ्रष्टो न तस्माद्भव तद्विदित्वा,
उदेति तस्मात्खलु धर्मसृष्टिः ॥ ८८ ॥

धृत्वोपयोगं हृदि बाह्यकर्म,
कुरुष्व भूप व्यवहारनीत्या ।
धर्मोश्चरक्ष्या व्यवहारनीत्या,
सर्वस्य विश्वस्य च पालनं स्यात् ॥ ८९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वहाऽऽत्मनि श्रेणिक चाऽऽत्मधर्मं,
परिष्कुरुष्वाऽखिलराज्यनीतीः ।
दुःखं प्रजानां च निवारय त्वं,
प्रजोन्नतिर्यत्र ततो हि धर्मः ॥ ९० ॥
सर्वप्रजाः स्वाऽऽत्मसमाःप्रविद्धि,
न्यायेन राज्यं गुणवन्कुरुष्व ।
दुष्टान्रिपून्दण्डय भूप राज्ये,
दूरीकुरु त्वं दुरुपद्रवाँश्च ॥ ९१ ॥
सर्वप्रजानां च कुरुष्व रक्षां,
सेवाख्यधर्मं वह भूप रागैः ।
ज्ञानप्रचारं च कुरु प्रजासु,
कुरुष्व दुष्टव्यसनाभिघातम् ॥ ९२ ॥
वश्यान्सदाशत्रुजनान्कुरु त्वं,
सत्यांप्रियां ब्रूहि नरेन्द्रवाणीम् ।
मा धत्स्व राज्यादिकृतां महत्तां,
स्वप्नेऽपि नो भूप कुरुष्व गर्वम् ॥ ९३ ॥
त्वं सर्ववर्णान्स्वसमान वेहि,
नवाऽपमानं कुरु सन्मुनीनाम् ।
नीत्या रहस्यं सकलं विदित्वा,
प्रचारय त्वं च मदुक्तनीतिम् ॥ ९४ ॥
स्वप्नेऽपि न त्वं कुरु पक्षपातं,
लोभादिकं वारय संभवन्तम् ।
स्मृत्वा च मां गच्छ नरेन्द्र मय्यां,
गुणज्ञ जीवेषु वहानुरागम् ॥ ९५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोहादनीतिं न कदाऽपि कुर्या-,
स्त्वं दुःखिनां भूप ! सहायकः स्याः ।
कुरु क्रियां सत्यपराक्रमेण,
द्रव्येण भावेन कुरुष्व राज्यम् ॥ ९६ ॥

समाननीतेःसकले मनुष्ये,
प्रधानतो भाति च जैनराज्यम् ।
जहीहि देहादिकमत्र लोके,
देवाय धर्माय तथा गुरुभ्यः ॥ ९७ ॥

जीवन्ति यस्मात्परमार्थवर्गा-
धर्माय तस्मै कुरु धर्म्ययुद्धम् ।
यत्राऽल्पदोषोऽस्ति महाँश्च धर्मो-
गुणश्च तत्कर्म कुरु त्वमेवम् ॥ ९८ ॥

धर्माय सर्वं कुरु भूप ! कार्यं,
सहायतां धर्मिजनाय देहि ।
व्यवस्थया त्वं कुरु भूप ! राज्यं,
नेर्ष्यामियोग्यां कुरु कुत्रचित्त्वम् ॥ ९९ ॥

सत्यं दयाभावमथो विधेहि,
चोराङ्गनाँश्चापनयाऽतिदूरम् ।
निवारय त्वं व्यभिचारमाशु,
प्रचारय त्वं सुगुणान्प्रजासु ॥ १०० ॥

विभाति राज्यं दयया च सत्यैः,
साम्राज्यमाचि भवति प्रमाणात् ।
सर्वप्रजासौख्यकृतेऽस्ति राज्यं,
राज्यादि कार्यं च तदर्थमेव ॥ १०१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वंसमानं खलु जैनराज्ये,
गुणज्ञ ! चैवं परमार्थराज्यम् ।
वर्णादिधर्मानपि पोषय त्व-
मन्यायतो नापि कुरुष्व रोषम् ॥ १०२ ॥
सर्वत्र देशे सुखिनो जना ये,
ते जैनधम नियतं भजन्ति ।
भक्तिर्मदीया समुदेति यत्र,
श्रीमेघवृष्ट्यादि सुखं ततोऽस्ति ॥ १०३ ॥
दुष्टा जना यत्र न चापि नीति-
रधर्म्ययुद्धैःकलहोऽस्ति तत्र ।
हिंसाश्च पापानि भवन्ति यत्र,
नश्यन्ति ते श्रेणिक राजदेशाः ॥ १०४ ॥
मद्वाक्यधिक्कार उदेति यत्र,
स्युर्दुःखिनस्तत्र नराः स्त्रियश्च ।
तत्रास्ति शान्तिर्मम यत्र भक्ति-
र्योगस्य हार्दं समुदेति तत्र ॥ १०५ ॥
श्रीजैनधर्मेण समो न कश्चि-
त्ततो द्वितीया सकलेऽप्यधस्थाः,
श्रीजैनधर्मोऽस्ति निजाऽऽत्मधर्म-
स्ततो भवत्येव समग्रशर्म ॥ १०६ ॥
तमोरजोवृत्तिमपाकुरु त्वं,
संरक्ष भोः सात्त्विककर्मवृत्तिम् ।
श्रीजैनधर्मो व्यवहारतोऽयं,
सर्वत्र लोकेषु सुखालयोऽयम् ॥ १०७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिँश्चिदानन्दमयः स्वधर्मो-
मोहादयो यत्र न सम्भवन्ति ।
शुद्धाऽऽत्मधर्मोऽस्त्ययमेव नूनं,
जानीह्युपादानत एव मर्म ॥ १०८ ॥

सर्वस्य संघस्य कुरुष्व सेवां,
प्रीत्या चल श्रेणिक राजराज ।
ज्ञात्वा परेशं सकलं स्वसंघं,
तत्रैव धर्मं सकलं च विद्धि ॥ १०९ ॥

सर्वत्र संघे विहिते च रागे,
त्यागश्चसम्यक्त्वमुदेति नूनम् ।
हृद्वाग्वपुःशक्तिमुदीरय त्वं,
निजाऽऽत्मशुद्धिं हृदि भावय त्वम् ॥ ११० ॥

बाह्याऽन्तरा एत्य समग्रशक्तीः,
कदाऽपि कुर्या नहि भूप ! गर्वम् ।
निःशक्तिको यःकुरुतेऽतिगर्वं,
नरो भवेदाऽऽत्म गुणैश्च दीनः ॥ १११ ॥

हानिं च लाभं प्रविचार्य चित्ते,
कर्माणि कर्तुं धर निश्चयं त्वम् ।
आज्ञां मदीयां प्रतिपालय त्वं,
भावेन हृद्यः सच शुद्ध आत्मा ॥ ११२ ॥

ममोपदेशाऽऽचरणं कुरुष्व,
यस्मात्सदानन्द उदेति पूर्णः ।
मोहादिकं वारय जायमानं,
मनःप्रभूतं हर दोषराशिम् ॥ ११३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वशा कुरीतिव्यसनस्य माभूः,
शक्रादयो मोहवशा हि दीनाः।
स्वतन्त्रतायां निजराज्यमस्ति,
त्याज्याश्च सर्वे व्यसनस्य दोषाः ॥ ११४ ॥
वर्तस्व चैवं दृढनिश्चयेन,
स्वतन्त्रमुक्तेरियमस्ति युक्तिः।
आत्मोपयोगेन यतो निजाऽऽत्मा,
प्रवर्तते तत्र हि सर्वयोगः ॥ ११५ ॥
प्रवर्तते चाऽऽत्मवशं मनश्चेत्,
सर्वे हि धर्माः सहसोद्भवन्ति।
आत्मप्रकाशं वृणु निश्चयेन,
सर्वप्रकाशोपरि सुप्रकाशम् ॥ ११६ ॥
सर्वं प्रकाशं प्रविकाशयेत्स-
ज्ञानाद्विलासी सहि शुद्ध आत्मा।
एवं प्रलभ्यस्तवशुद्ध आत्मा,
सर्वात्मशक्तीः प्रविकाशय त्वम् ॥ ११७ ॥
शिक्षां च हेश्रेणिक!! धारय त्वं,
नरावतारं सफलं कुरुष्व।
भूपालशिक्षाभयतो हि नार्य-
स्तथानरा धर्ममथोद्वहन्ति ॥ ११८ ॥
राजा च शिक्षां कुरुते यदैव,
धर्मं वहन्त्याऽऽश्वधमा जनाश्च।
प्रभोर्भयैर्मध्यनराः स्त्रियश्च,
धर्मं तथा कर्म सदा चरन्ति ॥ ११९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुभाशुभं कर्म तथा विदित्वा,
धर्मक्रियां ज्ञानिजनः करोति ।
नराः स्त्रियो ज्ञानिन उत्तमाश्च,
निजाऽऽत्मधर्मं प्रविकाशयन्ति ॥ १२० ॥

स्वपापकर्मत्यजनाय हेतु-
र्वैराग्यमस्त्येव च राजनीतिः ।
धर्मस्य रक्षाभिरुदेति धर्मः
स्याद्धर्मिजीवस्य सुखं च शान्तिः ॥ १२१ ॥

अतः स्वधर्मस्य कुरुष्व रक्षा-
मेतत्तु कर्तव्यमहोऽस्ति राज्ञः ।
यथा यथाज्ञानमुदिते चित्ते,
बाह्या स्ततोऽल्पा नियमा भवन्ति ॥ १२२ ॥

प्रवर्तते चाऽऽत्मनि मानसत्त्वं,
बाह्यास्तु शेषा नियमा भवन्ति ।
सर्वस्य वर्णस्य च शिक्षणार्थं,
सङ्केतितं राजपदं पृथिव्याम् ॥ १२३ ॥

त्वं लक्षयित्वा च निजाऽत्मशुद्धिं,
प्रेम्णा प्रजा रक्ष नरेन्द्र ! ! नीत्या ।
निशाम्य च श्रेणिकराजराजो,
धन्यं स्वमात्मानममानयत्सः ॥ १२४ ॥

प्रदक्षिणातः प्रणमन्प्रभुं च,
रोमाञ्चपूर्णः प्रबभूव भूपः ।
धन्यो महावीर जिनेश्वरस्त्वं,
सत्योऽस्त्ययं नाम तवोपदेशः ॥ १२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुद्ध्या विधास्ये सकलं हि कर्म,
निर्लेपभावेन च वर्तिताहम् ।
प्रचारयिष्ये भुवि जैनधर्मं,
श्रीसंघसेवां च तथा करिष्ये ॥ १२६ ॥

तवाज्ञयाऽहंभुवि वर्तिताऽस्मि,
निजावतारं सफलं करिष्ये,
तवोपदेशो खलु सर्वधर्माः,
सत्कर्म सर्वं च तवोपदेशो ॥ २७ ॥

त्वच्छिक्षणे सन्ति समग्रयोगा-
ज्ञानेन नश्यन्ति हि सर्वशोकाः
सत्यं हि सम्यक्त्वमहं प्रपेदे,
त्वय्येव विश्वास इतो मदीयः ॥ १२८ ॥

जिनः परब्रह्म जगत्सु देव-
स्त्वत्सेवनार्थं मम निश्चयोऽभूत् ।
जगत्परब्रह्म जिनेशवीर,
तवोदयात्क्लेशगणस्यनाशः ॥ १२९ ॥

जयप्रदं ते शरणं चकार,
विश्वाश्रय श्रीप्रभुवर्द्धमान ।
त्वमाश्रयस्त्वं च गतिर्मतिर्मे,
प्रेम्णाऽस्ति ते नाथ च "सत्यदृष्टिः ॥ १३० ॥

नाथोऽस्म्यहं श्रेणिक भारतेशो,
गायाम्यहं त्वां भवभीतिशून्यः ।
नाम्नाऽस्ति ते मङ्गलमालिकाऽत्र,
पदे पदे शक्तिरथो महर्द्धिः ॥ १३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वत्र विश्वेषु च शान्तिरस्तु,
नराश्च नार्यश्च शुभं लभन्ताम् ।
अर्हन्महावीरपरप्रकाशः,
सच्चिन्मयानन्दमयो जिनेशः ॥ १३२ ॥
शान्तिं च तुष्टिंच तथा स्वपुष्टिं,
नराश्चनार्यः सततं लभन्ताम् ।
श्रोष्यन्ति ये श्रेणिकराजबोधं,
ज्ञानी च भक्तो भविता स योद्धा ॥ १२३ ॥
श्रीजैनधर्मो विजयी जगत्सु,
प्रवर्ततां वीरविभुर्जिनेशः ।
आत्मोन्नतिर्मङ्गलमस्तु शर्म,
प्रवर्धतां वीरजिनोपदेशः ॥ १३४ ॥

इति श्रेणिकसुबोधः समाप्तः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ श्रीकृष्णगीता ॥

एकदा द्वारिकापुर्यां, नेमिनाथो जगत्प्रभुः ।
वासुदेवस्य कृष्णस्य, बोधार्थं समुपागतः ॥ १ ॥
जिनेन्द्रनेमिनाथेन, महाघोरर्षिणा रयात् ।
आत्मादितत्त्वबोधेन, वासुदेवः प्रबोधितः ॥ २ ॥
अन्तरात्मा तदा जातो-नेमिनाथस्य भक्तराट् ।
वासुदेवेन सम्यक्त्वं, स्वीकृतं तत्त्वबोधतः ॥ ३ ॥
श्रीकृष्णवासुदेवेन, नेमिनाथस्य शिक्षया ।
जैनधर्मप्रचाराय, हिंसायज्ञा निवारिताः ॥ ४ ॥
भारते जैनधर्मस्य, प्रचारः प्रेमतः कृतः ।
पांडवानां सता मध्ये, युद्धकाले विवेकतः ॥ ५ ॥
उपदेशप्रदानस्य, प्रवृत्ति र्वीक्षया कृता ।
ज्ञानेन तस्य सत्सारं, भाषे लोकहिताय तत् ॥ ६ ॥
अरिष्टनेमिनाथेन, जैनधर्मः प्रकाशितः ।
विश्वोद्धाराय सम्पूर्णं, सत्यं तत्र प्रवर्तते ॥ ७ ॥
व्यापकोऽस्त्यात्मरूपश्च, जैनधर्मः सनातनः ।
तदुद्धाराय तीर्थेशा-जायन्ते च युगे युगे ॥ ८ ॥
ब्रह्मचर्यं तपो दानं, भावना शम उच्यते ।
दशधा जैनधर्मोऽस्ति, पञ्चधा च द्विधा शुभः ॥ ९ ॥
गृहस्थत्यागिधर्मश्च, द्विधा धर्मो जगत्तले ॥
स्वाधिकारेण संसेव्यः स्वर्गसिद्धिप्रदायकः ॥ १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवपूजा गुरोः पूजा, धर्मस्याराधनं तथा।
वैयावृत्त्यं सुसाधूनां, मोक्षमार्गो मनीषिणाम् ॥११॥
स्वाधिकारेण कर्तव्यं, कर्म भव्यैः स्वशक्तितः।
निरासक्तितया कर्म-विधाने नैव दूषणम् ॥ १२ ॥
अन्तराऽऽत्मगृहस्थानां, कर्मबन्धो न जायते।
सम्यग्दृष्टितया कर्म-नाशो भवति सर्वथा ॥ १३ ॥
प्रवृत्तिर्नैव बन्धाय, सम्यग्दृष्टिमनीषिणाम्
आस्रवस्यापि यो हेतुः, संवरायैव जायते ॥ १४ ॥
निरासक्त्या भवेन्नैव, कर्मबन्धोऽन्तराऽऽत्मनाम् ॥
आसक्तिः कर्मबन्धाय. जायते सर्वमोहिनाम् ॥ १५ ॥
धर्मयुद्धादिकर्माणि, कर्तव्यानि मनीषिभिः।
कर्तव्यकर्मणां त्यागात्, निपातः सर्वदेहिनाम् ॥१६॥
सद्बलं सर्वथा प्राप्यं, देशकालप्रयुक्तिभिः।
मौढ्यं कदापि नो सेव्यं, ज्ञानं प्राप्यं जनैः सदा ॥१७॥
प्रवृत्तावधिकारोऽस्ति, नृणां प्रकृतियोगिनाम्।
यद् भाव्यं तद् भवत्येव, निश्चयज्ञानधारिणाम् ॥१८॥
कर्मभ्रष्टा भवेयु र्न, कर्तव्यकर्मकारिणः।
साक्षिभावेन वर्तन्ते, शुभाशुभेषु कर्मसु ॥ १९ ॥
स्वधर्मः श्रेयसे नृणां, स्वाधिकारेण संगतः।
अन्यधर्मो न शान्त्यर्थं, जानन्ति ज्ञानयोगिनः ॥२०॥
षडावश्यककर्माणि, कर्तव्यानि जनैः सदा।
मातृपूजादिका यज्ञाः पञ्च सेव्याः सुभावतः ॥ २१ ॥
सर्वत्र सर्वजीवानां, रक्षा पुण्येश्वरात् भवेत्।
सर्वत्र सर्वजीवानां, दुःखं पापयमाद् भवेत् ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्मेश्वरोऽस्ति सर्वत्र, सुखदुःखप्रदायकः ।
तस्येच्छा भाविभावस्य, रूपेणात्र प्रवर्तते ॥ २३ ॥

कर्मेच्छा यादृशी यस्य, तस्य भवति तादृशम् ।
कर्मेश्वरसमो देवो, नास्ति विश्वप्रवर्त्तकः ॥ २४ ॥

कर्मणा मनुसारेण, सुखं दुःखं च देहिनाम् ।
कर्मभिः खलु संसारो, मुक्ति निर्मोहभावतः ॥२५॥

आत्मना भुज्यते कर्म, यत्कृतश्च शुभाऽशुभम् ।
अन्तर्मुखोपयोगेन, सर्वकर्मक्षयो भवेत् ॥ २६ ॥

कर्मरूपेश्वराधीनं, सर्वविश्वं प्रवर्तते ।
कर्मरूपेश्वराधीना, जीवाः संचारिणो भवे ॥ २७ ॥

रजोवृत्तिसमूहाऽऽत्मा, ब्रह्मैव गीयते भुवि ।
तमोवृत्तिसमूहाऽऽत्मा, हर इत्थं प्रकीर्त्यते ॥२८॥

सत्त्ववृत्तिसमूहाऽऽत्मा, विष्णु रेव प्रगीयते ।
एषाऽऽत्मा देहसंस्थोऽपि, ब्रह्मादिनामधारकः ॥ २९ ॥

कर्मवृत्तियुतो जैन--आत्मा सर्वत्र गीयते ।
सत्त्वरजस्तमोवृत्त्या, जैनाऽऽत्मा त्रिविधः स्मृतः ॥३०॥

सात्त्विकप्रकृतिस्वामी, अन्तराऽऽत्मा भवेन्महान् ।
सत्त्वातीतः परब्रह्म, सिद्धोऽर्हन् भवति प्रभुः ॥ ३१ ॥

सात्त्विका स्युर्महासिद्धाः, साधवः सर्वभूतले ।
अवतीर्य स्वशक्त्यैव, भवन्ति विश्वतारकाः ॥ ३२ ॥

आध्यात्मिकं बलं श्रेष्ठं, जडसत्तावलादपि ।
आत्मसत्ताबलस्याग्रे, जडसत्ता न तिष्ठति ॥ ३३ ॥

उदयास्तमयं विश्व–चक्रं नित्यं प्रवर्त्तते ।
ज्ञात्वैवं सत्प्रभौ मग्ना–भवन्ति ज्ञानिनो जनाः॥३४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनःशुद्धिः प्रकर्तव्या, कर्तव्यमाऽऽत्मसाधनम् ।
मनोऽस्ति येन मोक्षाय, पूर्णानन्दरसस्ततः ॥ ३५ ॥

ब्रह्माण्डे विद्यते यादृक्, तादृक् पिण्डे प्रवर्तते ।
पिण्डब्रह्माण्डबोधेन, तत्त्वज्ञानी भवेज्जनः ॥ ३६ ॥

तत्त्वज्ञानेन मोहस्य, नाशो भवति सर्वथा ।
मोहनाशेन जीवानां, जायते परमं पदम् ॥ ३७ ॥

कर्मप्रभोर्नियन्ताऽस्ति, शुद्धाऽऽत्मैव महाप्रभुः ।
कर्मतोऽनंतसामर्थ्यं, शुद्धाऽऽत्मपरमाऽऽत्मनः ॥ ३८ ॥

आत्मैव परमाऽऽत्माऽस्ति, सर्वत्र रक्षकः प्रभुः ।
पुण्यधर्मबलेनैव, हृदिस्थो लोकशर्मदः ॥ ३९ ॥

आत्मोत्कर्षाय भक्तानां, सुखदुःखप्रवृत्तयः
भूता भवन्ति विश्वस्मिन्, भविष्यन्ति शुभाशुभाः॥४०॥

प्रभोर्दर्शनमार्गेषु, विघ्नदुःखस्य कोटयः ।
विज्ञायेति प्रभोर्भक्ता-स्तत्र गच्छन्ति धैर्यतः ॥ ४१ ॥

प्रभोर्मार्गेषु विघ्नादि,-योगेन चित्तशुद्धता ।
सर्वकर्मविनाशेन, आत्मनश्च परं पदम् ॥ ४२ ॥

पारमार्थिककार्येषु, विघ्नकोटिपरंपरा ।
भवत्येव मनुष्याणां, कर्मयोगस्य सिद्धये ॥ ४३ ॥

अनेकजन्मयत्नेन, संस्कारेण च देहिनाम् ।
भवत्येव प्रभोः प्राप्ति-स्तत्राशा जीवनं वरम् ॥ ४४ ॥

जन्मनीह न यत् सिद्ध्येत्, तदमुत्र प्रयत्नतः ।
सिध्यतीति हृदि ज्ञात्वा, धीर आशां न मुञ्चति ॥४५॥

अनन्तानि हि दुःखानि, ये सहन्ते विवेकतः ।
अनन्तसुखधामान-स्ते भवन्ति स्वभावतः ॥ ४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वान्परिषहान् प्राप्य, ज्ञानिनः सिद्धधामनि ।
गच्छन्ति साम्ययोगेन, तत्राऽऽत्मसाक्षिभावतः ॥४७॥

पूर्वं दुःखं ततः पश्चात्, सुखं भवति योगिनाम् ।
सुखाय दुःखभोगोऽस्ति, ज्ञात्वा ज्ञानी न मुह्यति ॥४८॥

सुखज्ञानं तु दुःखेभ्यो,-जायते ज्ञानिनां स्वयम् ।
दुःखात् सुखमहत्तास्ति, दुःखे ज्ञानी न शोचति ॥४९॥

दुःखसंकटकोटिभ्यो-भेतव्यं न कदाचन ।
ततः स्वाऽऽत्मोन्नतिं मत्वा, वर्तितव्यं प्रयत्नतः ॥५०॥

पापाद् दुःखं सुखं पुण्यात्, सर्वत्र सर्वदेहिनाम् ।
उपकारोऽस्ति धर्माय, हिंसा पापाय जायते ॥ ५१ ॥

संपत्तौ न च हर्षोऽस्ति, विपत्तौ नास्ति शोकिता ।
यस्य तस्य समत्वेन, मुक्तिर्भवति निश्चयः ॥ ५२ ॥

सत्तातः पूर्णशुद्धाऽऽत्मा, येन ज्ञातो वपुःस्थितः ।
स कुर्वन् सर्वकर्माणि, निष्कामो जायते जनः ॥ ५३ ॥

पूर्णशुद्धाऽऽत्मनि प्रेम, यस्य पूर्णं प्रजायते ।
सर्वकर्मसु निर्लेपः कर्मयोगी भवेन् महान् ॥ ५४ ॥

बहिरन्त र्न मोहोऽस्ति, यस्य ज्ञानाऽऽत्मयोगिनः ।
तस्य किञ्चिन्न कर्तव्यं, स तथापि प्रवृत्तिमान् ॥ ५५ ॥

कुत्रापि नैव रागोऽस्ति, कुत्रापि नैव वैरिता ।
यस्य स सर्वलोकस्य, हन्ताऽपि नैव हन्यते ॥ ५६ ॥

नित्यः सर्वगतः पूर्णो, ज्ञानेन व्यापकः प्रभुः ।
सत्याऽऽत्मा येन विज्ञातो-निर्भयः स भवेज्जनः ॥५७॥

शस्त्रेण छिद्यते नाऽऽत्मा, दह्यते न च वह्निना ।
वारिणा प्लाव्यते नैव, शुष्यते न च वायुना ॥ ५८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातस्य जायते नाश–आत्मा जातो न कर्हिचित् ।
आत्मनो न भवेन्मृत्यु–र्देहादेस्तंनिबोधत ॥ ५९ ॥

जन्मनाशादितो भिन्न–आत्मा शुद्धस्वभावतः ।
ज्ञात्वैवं मृत्युकालान्न, भीतिमाप्नोति पण्डितः ॥६०॥

देहाद्भिन्नं यथा वस्त्रं, तथाऽऽत्मा देहतः पृथक् ।
जन्म मृत्यु यथा देहे, न तथाऽऽत्मनि विद्यते ॥ ६१ ॥

सदसदादिरूपाऽऽत्मा, ध्येयः प्राप्यो हृदि स्थितः ।
यत्प्रकाशाज्जगत्सर्वं, भासतेऽनादिकालतः ॥ ६२ ॥

अस्तिनास्तिस्वरूपाऽऽत्मा, व्याप्यव्यापकभाववान् ।
अनंतसच्चिदानन्द–आत्मा ध्येयः सनातनः ॥ ६३ ॥

ज्ञाने ज्ञेयलयोत्पादा–भवन्ति यत्र वस्तुतः ।
चेतनः परमाऽऽत्मैव, आत्मा सोऽनंतशक्तिमान् ॥६४॥

आत्मैव जैनधर्मोऽस्ति, चारित्रमार्गदृष्टितः ।
आत्मैव जैनरूपोऽस्ति, शुद्धाऽऽत्मा जिनभास्करः॥६५॥

दर्शनज्ञानचारित्र–रूपाऽऽत्मा विश्वपावकः ।
मोहादिकर्मसंहर्ता, कर्ताऽकर्तास्त्यपेक्षया ॥ ६६ ॥

शुद्धाऽऽत्मा न च कर्ताऽस्ति, विश्वस्थलोककर्मणाम् ।
नैव सृजति भूतानि, न च दुःखादिकारकः ॥ ६७ ॥

सिद्धा जीवा जगत् सर्वं, द्रव्यतोऽनादिकालतः ।
पर्यायापेक्षया सादि–सान्तं द्रव्याऽऽत्मकं जगत् ॥६८॥

पञ्चद्रव्येषु चाऽऽत्मास्ति, सर्वज्ञः परमेश्वरः ।
अनन्तः सच्चिदानन्दः, सत्तया द्रव्यतस्तथा ॥ ६९ ॥

नास्ति पुद्गलभावानां, कर्ता कारयिता च सः ।
शुद्धनिश्चयपूर्णात्मा, परब्रह्म जिनेश्वरः ॥ ७० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जडानां न च कर्ताऽस्ति, देहातीतो निरञ्जनः।
सर्वगः सर्वभिन्नोऽस्ति, जडस्थोऽपि न यो जडः ॥ ७१ ॥
अनन्ताश्चेतना बोध्याः कर्मयुक्ता वपुःस्थिताः।
अनन्ताः परमाऽऽत्मानः, कर्मातीता जिनेश्वराः ॥७२॥
अज्ञानात् कर्मबन्धोस्ति, जीवानां भववर्तिनाम्।
आत्मज्ञानाद् भवेन्मोक्षो--ज्ञानानन्दमयःखलु ॥ ७३ ॥
असुराः प्राणिनो ज्ञेया--देहादिमात्रसेवकाः।
आत्मानस्ते सुरा बोध्या--आत्माभिमुखवृत्तयः ॥७४॥
आसुरप्रकृतेर्जेता, येनाऽऽत्मा सुर उच्यते।
सुराणां शूरता पूर्णा, जायते मोहनाशिका ॥ ७५ ॥
विश्वलोकानुकूलोऽस्ति, जैनधर्मः सनातनः।
वस्तुस्वभावधर्मोऽस्ति, सर्वलक्षणलक्षितः ॥ ७६ ॥
सत्यान्नास्ति परो धर्मो, जिनोक्तं सत्यमेव तु।
सत्यात् परो जयो नास्ति, जयः सत्यात् प्रजायते ॥७७॥
पक्षपातो न धर्मोऽस्ति, धर्मात् सत्यं प्रकाशते।
पुण्यपापात् सदाभिन्न--आत्मधर्मः सुखावहः ॥७८॥
पुण्यात् स्वर्गो भवेच्छ्वभ्रं,-पापाच्च सर्वदेहिनाम्।
पुण्या दूर्ध्व मधः पापात्, धर्मो मोक्षाय जायते ॥७९॥
पुण्यपापक्षयान्मुक्ति-र्भवेन्निर्लेपयोगिनाम्।
पुण्यकर्माणि कुर्वन्सन्, ज्ञानी धर्मप्रकाशकः ॥ ८० ॥
ज्ञानिनो नैव लिप्यन्ते, कदाचित्पुण्यकर्मभिः।
तथापि ते तु सर्वेषां, भवन्ति सुखहेतवे ॥ ८१ ॥
उपयोगेन शर्माऽस्ति, क्रियया कर्म जायते।
परिणामेन बन्धोऽस्ति, जानाति पूर्णतत्त्वविद् ॥८२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मना क्रियते कर्म, आत्मनैव प्रभुज्यते
आत्मना कर्मनाशोऽस्ति, जायते मुक्तिराऽऽत्मना ॥८३॥

शुद्धाऽऽत्मा स्वर्गधामाऽस्ति, दुष्टाऽऽत्मा श्वभ्रमाप्नुयात्।
शुद्धाऽऽत्मा मोक्षरूपोऽस्ति, यद्योग्यं तत् समाचर ॥८४॥

इन्द्रियासक्तियोगेन, मृत्युर्भवति देहिनाम्।
आत्माऽऽसक्त्या तु लोकानां, जन्म मृत्युर्न जायते ॥८५॥

शुद्धाऽऽत्मरूपमादाय, नामरूपादिविस्मृतिः।
कर्तव्याऽऽत्मोपयोगेन, सदसत्सु विवेकिना ॥८६॥

निष्क्रियज्ञानसिद्धाऽऽत्मा, लिप्यते नैव वस्तुषु।
लिप्यते पुद्गलस्कंधः, पुद्गलस्कंधयोगतः ॥ ८७ ॥

भावनाज्ञानयुक्ताऽऽत्मा, क्रियासु नैव लिप्यते।
आसक्तो निष्क्रियःसोऽपि, लिप्यते कर्मपुद्गलैः ॥८८॥

आत्मज्ञानक्रियायुक्तो-निर्मोहो नैव लिप्यते
सूक्ष्मबाह्यप्रवृत्त्या तु, नासक्तो न च लिप्यते ॥८९॥

आत्मज्ञाननिमग्नानां; मुक्तिराऽऽत्मनि संस्थिता।
निःस्पृहत्वं भवेत्तेषां, परिपूर्णस्थिराऽऽत्मनाम् ॥९०॥

आत्माऽधीनं सुखं नित्य, मनित्यं देहसंगजम्।
विज्ञेयं सुखदुःखानां, लक्षणं भव्यमानवैः ॥ ९१ ॥

बाह्याऽऽत्मनां भवेद् दुःखं, सत् सुखं चाऽऽन्तरात्मनाम्।
पराऽऽत्मनां सदा पूर्णं, सुख मव्ययशाश्वतम् ॥९२॥

आत्मनि परमाऽऽत्मानं, पश्यन्ति ज्ञानयोगिनः।
शून्यमिव जगत् सर्वं, न च पश्यन्ति पण्डिताः ॥ ९३ ॥

आत्मज्ञानेन निस्संगो-बाह्यसंगेषु जायते।
अतो ज्ञानसमं नास्ति, पवित्रं वस्तु भूतले ॥ ९४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मज्ञानमहाशस्त्रं, छिनत्ति कर्मपादपान् ।
सर्वजातिभयौघेषु, स्वाऽऽत्मज्ञानी हि निर्भयः ॥९५॥

शुद्धाऽऽत्मानं विना सर्वं, मिथ्या हृदि निबोधत ।
शुद्धाऽऽत्मनि रमन्ते ते, क्रियावन्तोऽपि निष्क्रियाः॥९६॥

तनुभिन्नो भवेदाऽऽत्मा, आत्मतोऽन्यद्वपुः सदा ।
आत्मज्ञानाति विज्ञाय, देहनाशे न शोचति ॥९७॥

आत्मानुभवयोगेन, देहाध्यासलयो भवेत् ।
देहाध्यासलयेनैव, जायते प्रभुदर्शनम् ॥९८॥

आत्मपराऽऽत्मनोर्भेदो–भासते न यदा हृदि ।
सोऽहं सोऽहं भवेज्ज्ञानं, निर्विकल्पं ततः पुनः ॥९९॥

निर्विकल्पदशायां तु, मत्तद् भेदो न भासते ।
जायते केवलज्ञानं, ततः शुद्धाऽऽत्मयोगतः ॥१००॥

पञ्चद्रव्याऽऽत्मकं विश्वं, सर्वं जानाति केवली ।
अघातिनामकर्मोघं, भुनक्ति परमार्थकृत् ॥१०१॥

सर्वज्ञः पूर्णशुद्धाऽऽत्मा, कृतकृत्यो भवेत् स्वतः।
जीवानामुपकाराय, ददाति धर्मदेशनाम् ॥१०२॥

देहनाशे भवेत् पूर्णः, स्वतंत्रः पूर्णशक्तिमान् ।
शुद्धपर्यायवान् सिद्धः, पूर्णानन्दमयः प्रभुः ॥१०३॥

ज्ञात्वैवं जैनधर्मस्य, रहस्यं श्रावकास्तथा ।
साधवः स्वाधिकारेण, यतन्ते मुक्तिसिद्धये ॥१०४॥

अन्तर्मुखोपयोगेन, सर्वकर्तव्यकारिणः ।
सर्वोन्नतिपदं यान्ति, स्वाश्रयिणो विवेकिनः ॥१०५॥

बाह्यमुखोपयोगेन, कर्मलेपः प्रजायते ।
रागद्वेषपरीणाम,–भावकर्मस्वरूपिणा ॥१०६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मज्ञानप्रभावेण, देहे वैदेहभावना ।
जायते मोहनाशेन, तत्त्वज्ञानिनो विदुः ॥१०७॥
विदेहा अन्तराऽऽत्मानो- जैना एव निबोधत ।
महाविदेहतां यान्ति, जिनेन्द्राः परमेश्वराः ॥१०८॥
महाविदेहसत्क्षेत्रं, देहेषु सर्वदेहिनाम्
असंख्यातप्रदेशाऽऽत्म, ज्ञेयमध्यात्मदृष्टितः ॥१०९॥
देहेषु सन्ति वैदेहा-ज्ञानिनः सत्यनिर्भयाः ।
विदेहं शुद्धचित्तं तु, ज्ञानं वैदेहिकं महत् ॥११०॥
महाविदेहदेशेषु, जातानां ज्ञानयोगिनाम् ।
सीमंधरप्रभोः प्राप्ति-र्जायते न च संशयः ॥१११॥
सीमंधरोऽस्ति शुद्धाऽऽत्मा; चित्तहिमोत्तरे स्थितः ।
मानसाख्यसरःपार्श्वे, सच्चिदानन्दरूपवान् ॥११२॥
अन्तराऽऽत्माख्यकैलासाज्, ज्ञानगंगा प्रजायते ।
अष्टापदो महानाऽऽत्मा, योगाष्टकप्रधारकः ॥११३॥
आत्मैव सत्ययज्ञोऽस्ति, ज्ञानाग्निस्तत्र वर्तते ।
कामपशुर्हविस्तत्र, जायते सत्यभावतः ॥११४॥
आत्मयज्ञे परब्रह्म,-साक्षात्कारः प्रजायते ।
आत्मयज्ञस्य कर्त्तारो-जैनाःस्युरधिकारिणः ॥११५॥
अहिंसा सर्वजीवानां, सत्ययज्ञः प्रतिष्ठितः ।
सत्ययज्ञस्य कर्तारः, साधवःस्युः पदे पदे ॥ ११६ ॥
दयापुण्यमया यज्ञा, यद्देशे सन्ति साधवः ।
तत्र दुष्कालपीडाद्या, जायन्ते न कदाचन ॥११७॥
ब्राह्मणाः सत्यजैनत्वं, प्राप्य मोहपराजयात् ।
भवन्ति परमाऽऽत्मानो-, जिना विश्वस्य पावकाः॥११८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनुष्यदेहसद्गेहे, प्रभुराऽऽत्माऽस्ति शक्तिमान् ।
ज्ञानमेव प्रधानोऽस्ति, विवेकः कार्यवाहकः ॥११९॥

क्षायिका लब्धयस्तत्र, प्रकाशन्ते स्वभावतः ।
शुद्धोपयोगसेनानी–रागादिशत्रुनाशकः ॥१२०॥

आत्मनः पूर्णसाम्राज्यं, पूर्णानन्दप्रकाशकम् ।
वर्तते तत्र दुःखस्य, गन्धोऽपि नैव भासते ॥१२१॥

यत्र मोहस्य साम्राज्यं, वर्तते तत्र दुःखिता ।
पारतंत्र्यं मनुष्याणा–मात्मभोगेन नश्यति ॥१२२॥

आत्मस्वातंत्र्यसाम्राज्य–मात्मभोगेन जायते ।
समष्टिव्यष्टिसाम्राज्य–मात्मभोगात् प्रजायते ॥१२३॥

मृत्युभीत्यादियुक्ताऽऽत्मा, देहाऽऽत्माध्यासयोगतः ।
मुक्तिं नाप्नोति मूढाऽऽत्मा, नामरूपादिमोहवान् ॥१२४॥

आत्मानुभवबोधेन, निर्भयो जायते जनः ।
शुभाशुभसमो ह्याऽऽत्मा, साक्षिरूपेण जीवति ॥१२५॥

सर्वकालेषु मुक्ताऽऽत्मा, जायते समभाववान्
आत्मनि नैव कालोऽस्ति, न च कर्माणि निश्चयात् ॥१२६॥

आत्मानमाऽऽत्मभावेन, द्रष्टा सम्यक्त्वयोगिराट् ।
वैकुण्ठं मानसं कृत्वा, स्वतंत्रो जायते हृदि ॥१२७॥

आत्मा येन न विज्ञातो–नैगमादिनयै र्महान् ।
सर्वयोनिषु संसारे, भ्राम्यति दुःखवेदकः ॥ १२८ ॥

येनाऽऽत्मा पूर्णविज्ञात–स्तेन ज्ञात मिदं जगत् ।
बाह्यान्तरे विजेतारो, भवन्ति ब्रह्मवेदिनः ॥१२९॥

मनोवाक्कायशक्तीनां, विकाशाय सुशिक्षणम् ।
आत्मज्ञानस्य संग्राह्यं, परार्थस्वार्थसाधकम् ॥१३०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मज्ञानस्य लाभेन, जैना जयन्ति भूतले ।
आन्तरानेकलब्धीनां, प्राप्तिस्तेन प्रजायते ॥१३१॥
परब्रह्म जिनेन्द्रोऽस्ति, स्वाऽऽत्मैवं स हृदि स्थितः ।
इहाऽमुत्र स सर्वत्र, यत्र तत्र महाप्रभुः ॥१३२॥
एकाऽऽत्मा हृदि संविष्टो, मिथ्या देहादिकं खलु ।
ध्यातव्यः सच्चिदानन्द, स्तत्त्वमस्यादिलक्षितः ॥१३३॥
आत्मनः प्रतिमा नास्ति, विश्वं स्वप्नोपमं हृदि ।
भासते यस्य सद्ब्रह्म, ज्ञानी जैनो भवेन् महान् ॥१३४॥
ब्रह्मज्ञानी भवेदेव, निर्लेपः कर्मयोगिराट् ।
जैनः स विश्वशालायां, जायते परमार्थकृत् ॥१३५॥
जीवानां विश्वशालायां, शिक्षणं सुखदुःखतः ।
भवत्येव समुत्क्रान्ति, राऽऽत्मनोद्रव्यभावतः ॥१३६॥
आत्मन आत्मभावेन, परिणामो भवेद् यदा ।
तदैक्यं जायते साक्षा, द्धृदि द्वैतं न भासते ॥१३७॥
अन्तराऽऽत्मनि सम्यक्त्वं, मौन माऽऽत्मस्वरूपतः
अष्टधाऽऽत्मा भवेत्तत्र, शुद्धाऽऽत्मा स्वोपयोगतः ॥१३८॥
आत्मशुद्धोपयोगेन, परब्रह्म भवेज्जनः ।
अन्तर्मुहूर्तमात्रेण, रागद्वेषक्षयात्स्वतः ॥१३९॥
परब्रह्मनिमग्नस्य, पूर्णानन्दामृतं हृदि ।
अत्रैव वेद्यते साक्षात्, तत्र साक्षी स्वयं भवेत् ॥१४०॥
आत्मनो गुरुराऽऽत्मैव, शिष्य आऽऽत्मैव साधकः ।
सिद्ध आऽऽत्मैव सर्वस्व-माऽऽत्मनि व्यक्तिशक्तितः॥१४१॥
आत्मशुद्धोपयोगाय, ज्ञानिनां संगतिः सदा ।
अन्तःश्रद्धया प्रकर्तव्या, सर्वस्वार्पणभक्तितः ॥१४२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मभावं विना लोका-भ्रान्ता भ्रमन्ति भूतले।
आत्मशर्म न जानन्ति, भूपेन्द्रा अपि वस्तुतः ॥१४३॥

एक एव महानाऽऽत्मा, हृदि यस्य निरन्तरम्।
भासते तस्य सत्प्रीत्या, मृत्युभीति र्न जायते ॥१४४॥

आत्मनः पूर्णविश्वासी, निर्भयो भवति स्फुटम्।
विपत्तिमृत्युकालेऽपि, पूर्णानन्दः स्वयं सदा ॥१४५॥

देशभाषाविशेषेण, यःस्यादनन्तनामवान्।
अनाद्यनन्तपूर्णाऽऽत्मा, पूर्णदृष्ट्याऽनुभूयते ॥१४६॥

साक्षादनुभवो यस्य, ब्रह्मणो जायते हृदि।
तस्य किञ्चिन्न लब्धव्यं, पश्चात् कुत्राऽपि विद्यते ॥१४७॥

ज्ञानाऽऽत्मा कृतकृत्योऽपि, प्रारब्धकर्मयोगतः।
सर्वकर्माणि कुर्वन्सन्, परमार्थाय जीवति ॥१४८॥

सर्वत्राऽऽत्मप्रभावोऽस्ति, लब्धिसिद्धिमयः सदा।
मंत्रयंत्रादिशक्तीनां, निधिराऽऽत्मा प्रकाशते ॥१४९॥

स पञ्चपरमेष्ठ्याऽऽत्मा, चिदानन्दोदधिः प्रभुः।
प्रत्यक्षो वेदितव्यः स-कृत्वा तत्र मनोलयम् ॥१५०॥

ॐकारः परमाऽऽत्मैव, परमेष्ठिस्वरूपवान्।
दर्शनज्ञानचारित्र-शुद्धपर्यायवान् प्रभुः ॥१५१॥

मंत्रयोगस्वरूपाऽऽत्मा, जैनधर्मः सनातनः।
यत्र तत्र स्वरूपोऽस्ति, जैनधर्मः सतां मतः ॥१५२॥

ॐकार एव जैनाऽऽत्मा, जिनेन्द्रश्च हृदि स्थितः।
चतुर्विधमहासंघ-ॐकार एव सर्वदा ॥१५३॥

सर्वशक्तिस्वरूपोऽस्ति, ह्रींकारो विश्वशासकः।
सर्वविद्यास्वरूपोऽस्ति, ऐंकारो नाभिदेशगः ॥१५४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वकामस्वरूपोऽस्ति, क्लींकारः सर्वकामदः ।
सर्वमंत्रस्वरूपोऽस्ति, जैनाऽऽत्मा जिनधर्मवान् ॥१५५॥
निष्कामकर्म कर्तव्यं, येन मुक्तो भवेज्जनः ।
सकामकर्म लेपाय, जायते सर्वदेहिनाम् ॥१५६॥
निष्कामत्वं सकामत्वं, द्वयोः साम्यं च यद्धृदि ।
सर्वलोकस्य हन्ताऽपि, समाऽऽत्मा स न हन्यते ॥१५७॥
सर्वकर्मप्रकुर्वाणः समाऽऽत्मा नैव लिप्यते ।
सर्वदोषेषु निर्दोषी, जीवन्मुक्तोऽभिधीयते ॥१५८॥
सर्वपापेषु निष्पापो, निष्कामः सर्वकामिषु ।
समाऽऽत्मा सर्वजीवेषु, क्रियावानपि निष्क्रियः ॥१५९॥
समभावदशाप्राप्तौ, माध्यस्थ्यं जायते हृदि ।
साक्षित्वं जायते पश्चात्, दृश्यादृश्येषु वस्तुषु ॥१६०॥
आत्मानुभवसज्ज्ञानं, ततः सम्यक् प्रजायते ।
ततो नयप्रमाणानां, शास्त्राणां न प्रयोजनम् ॥१६१॥
नयप्रमाणनिक्षेप-भंगादीनां विकल्पतः ।
निर्विकल्पाऽऽत्मरूपं तु, प्राप्यते नैव योगिभिः॥१६२॥
नयादीनां विकल्पेन, श्रुतज्ञानविशारदैः ।
आत्मा न ज्ञायते साक्षा, न्निर्विकल्पसुखोदधिः ॥१६३॥
यादृग्भावो भवेद्यस्य, तस्य तादृक् फलं भवेत् ।
शुभभावाद् भवेत्स्वर्गः श्वभ्रश्चाशुभभावतः ॥१६४॥
आत्मभावाद् भवेन्मुक्ति-रखण्डानन्दरूपिणी ।
ज्ञात्वा निष्कामभावेन, कर्तव्यं कर्म मानवैः ॥१६५॥
नास्तिका बहिराऽऽत्मानो-ज्ञेया मिथ्यात्विनो जडाः ।
जडातिरागिणो मूढा-मिथ्यात्वगुणवर्तिनः ॥१६६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आस्तिका अन्तराऽऽत्मानो–जैना जिनेन्द्रवर्त्मगाः ।
मन आत्मनि संन्यस्य, कुर्वन्ति कर्म योगिनः ॥१६७॥
जिनेन्द्रशास्त्रमन्तारः, शासका बहिराऽऽत्मनाम् ।
सद्गुरोः सेवका दक्षा–श्चतुर्वर्गस्य साधकाः ॥१६८॥
कर्ता हर्ता च विश्वेशो–जिनेन्द्रोऽर्हन् महाप्रभुः ।
तद्ध्यानं हृदि कर्तारो–जैनास्ते द्विविधाः स्मृताः ॥१६९॥
भवस्य हेतवो ये ये, ते ते मोक्षस्य हेतवः ।
भवन्ति ज्ञानिजैनानां, त्यागिनां गृहियोगिनाम् ॥१७०॥
पापकर्माऽपि पुण्याय, निर्जरायै प्रजायते
ज्ञानिजैनसमूहस्य, संघधर्मस्य हेतवे ॥१७१॥
सम्यग्दृष्टिमनुष्याणां, सम्यग्रूपतया जगत् ।
भासतेऽतो विरुद्धेऽपि, सम्यग्रूपं विभासते ॥१७२॥
सम्यग्दृष्टिप्रतापेन, मिथ्यात्वसाधनान्यपि ।
सम्यक्त्वहेतुरूपेण, परिणामं प्रयान्त्यहो ॥१७३॥
सर्वविषयभोक्ताऽपि, निर्भोक्ता ज्ञानयोगतः ।
जैन आस्रवकर्ताऽपि, संवरी परिणामतः ॥१७४॥
सम्यग्दृष्टितया जैनाः क्रियावन्तोऽपि निष्क्रियाः ।
कर्मवन्तोऽप्यकर्माणो, जीवन्ति कर्मयोगिनः ॥१७५॥
साक्षिभावेन जैनानां, सर्वकर्मसु योग्यता ।
जायते धर्मरक्षार्थं, मापत्काले विशेषतः ॥१७६॥
जैनसंघस्य रक्षार्थं, सर्वजातीयशक्तिभिः ।
कर्तव्यं सर्वथा जैनै–र्देहादीनां विसर्जनम् ॥१७७॥
सर्वस्थावरतीर्थेभ्यो–जैन एको महान्स्मृतः ।
एकजैनस्य रक्षार्थं, प्राणास्त्याज्या विवेकतः ॥१७८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्तराऽऽत्मा भवेज्जैनो-जैनधर्मस्य रक्षकः ।
मिथ्यात्विभ्यो महान्पूज्यः, श्रावको विश्वपावकः ॥१७९॥
जैनानां जीवनोपाया-स्तथावंशादिरक्षकाः ।
देशकालानुसारेण, कर्तव्याः सर्वमानवैः ॥१८०॥
अनादिकालतो जैना-जैनधर्मस्य साधकाः ।
ब्राह्मणाः क्षत्रिया वैश्या, शूद्राश्च विश्ववर्तिनः ॥१८१॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्वस्वप्रवृत्तिषु ।
वर्तमानाः सदा जैन-धर्मं कुर्वन्ति शक्तितः ॥१८२॥
सर्वजातीयजैनानां, पावित्र्यं सूर्यवत्सदा ।
जैनस्य स्पर्शमात्रेण, पवित्रं वस्तु जायते ॥१८३॥
गुणकर्मानुसारेण, वर्णकर्मव्यवस्थिताः ।
जैनाः परांगतिं यान्ति, अरिष्टनेमिसेवकाः ॥१८४॥
जैनधर्मे वरं मृत्यु, र्नान्यधर्मेषु जीवनम् ।
इत्येवं पूर्णविश्वास-कारका जैनधर्मिणः ॥१८५॥
अरिष्टनेमिनाथेन, केवलज्ञानधारिणा ।
प्रकाशो जैनधर्मस्य, कृतस्तीर्थकृता शुभः ॥१८६॥
साधवः श्रावकाश्चैव, जंगमतीर्थरूपिणः ।
तेषां भक्तिर्जैनैः साध्या, स्वर्गसिद्धिप्रदायिनी ॥१८७॥
सर्वदा सर्वथा जैना, आत्मान एव वस्तुतः ।
कर्मप्रकृतिजेतारः, शुद्धाऽऽत्माभिमुखाः शुभाः ॥१८८॥
सर्वलोकेषु जैनानां, श्रेष्ठताऽनादिकालतः ।
प्रवर्तते स्वभावेन, जैनधर्मस्यसेवनात् ॥१८९॥
आपत्कालो यदाऽऽगच्छेत्, तदा तदनुसारतः ।
विचाराचारकर्माणि, वर्त्स्यन्तीति प्रभाषितम् ॥१९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वंजातीयजैनानां, गुणकर्मानुसारतः ।
लग्नाद्या व्यवहारास्तु, संघटन्ते परस्परम् ॥१९१॥
सर्वंजातीयजैनानां, गुणकर्मानुसारतः ।
स्पृश्यास्पृश्यादिभेदो न, भोजनादिषु तात्त्विकः ॥१९२॥
शूद्रा अपि सदा स्पृश्या- जैना भवन्ति भूतले ।
जिनेन्द्रदेवसद्भक्त्या, विश्वलोकस्य पावकाः ॥१९३॥
स्पृश्याऽस्पृश्यादिकंकर्म-जैनानां हि परस्परम् ।
कदापि कल्पते नैव, सत्यमुक्तं मया भुवि ॥१९४॥
जैनकन्या तु सज्जैनं, विनाऽन्यस्मै न दीयते ।
कन्यादानं विधर्मिभ्यः, सर्वपापाधिकं मतम् ॥१९५॥
गुणकर्मानुसारेण, वर्णधर्मस्य सेवने ।
सर्ववर्णीयजैनानां, कृत्यमावश्यकं स्मृतम् ॥१९६॥
स्वाधिकारेण यो योग्यो, व्यवहारःस धर्मिभिः ।
प्राणान्तेऽपि न मोक्तव्यो, यतो धर्मो भवेत्ततः ॥१९७॥
देहवित्तादिभोगेन, सर्वजैनैः परस्परम् ।
द्रष्टव्यः सर्वजैनेषु. सत्तया परमेश्वरः ॥१९८॥
परस्परं नमस्कारः, कर्तव्यः सर्वदाऽर्हतैः ।
आत्मस्वरूपसमा ज्ञेया- जैना जैनैः परस्परम् ॥१९९॥
जैनानां सर्वदा जैना-आत्मीयाः स्युः स्वभावतः ।
आहारे व्यवहारे च, पावित्र्यं हि परस्परम् ॥२००॥
जैनसंघो महातीर्थं, सर्वतीर्थशिरोमणिः ।
तदस्तित्वे सदा जैनैः, कर्तव्यं स्वार्पणं कलौ ॥२०१
अनन्तज्ञानरूपोऽस्ति, जैन आत्मैव नो वपुः ।
विजितं दुर्मनो येन, स जिनो विश्वपावकः ॥२०२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनत्वं सर्वजीवेषु, जिनत्वं सत्तया तथा ।
जिन एव परब्रह्म, ज्ञात्वा जैनो न मुह्यति ॥२०३

अप्रमत्तो भवेज्जैनः, परार्थं कर्मकारकः ।
व्यक्तीकुर्वन् जिनेन्द्रत्व-माऽऽत्मनो जायते प्रभुः ॥२०४॥

पश्चात्त्वं भजते नैव, जैनः कर्तव्यकर्मसु ।
प्रसह्य सर्वविघ्नानि, धीरो भवति नेमिवत् ॥२०५॥

अरिष्टनेमिनाथोक्त-जैनधर्मस्य साधकाः ।
भवद्भवन्तु सत्प्रीत्या, सज्जना आत्मरागिणः ॥२०६॥

आत्मैव जैनधर्मोऽस्ति, आत्मैव जैन उच्यते ।
आत्मैव परमाऽऽत्मास्ति, समष्टिव्यष्टिरूपवान् ॥२०७॥

शक्तित्वं यत्र तत्राऽस्ति, जैनत्वं जैनधर्मिणाम् ।
जिनत्वं व्यापकं सर्व-लोकेषु सर्वदेहिषु ॥२०८॥

ब्रह्मविष्णुमहेशाख्या, आत्मैव हृदि बोधत ।
अत आत्मैव सज्जैनो जिनेन्द्रो व्यक्तिशक्तितः ॥२०९॥

जैनात्मैव परब्रह्म, मनोदेहनियामकः ।
अन्तर्यामी वपुःस्रष्टो, तस्मै नित्यं नमोनमः ॥२१०॥

सर्वत्र सर्वदेहेषु, जैनाः सन्ति स्वसत्तया ।
जिनाः सन्ति च देहेषु, तेभ्यो नित्यं नमोनमः ॥२११॥

जैनानां जैनधर्मस्य, रागिभ्योऽस्तु नमोनमः ।
महासंघस्य दासेभ्यः पूर्णप्रीत्या नमोऽस्तु मे ॥२१२॥

बाह्यान्तःशक्तियोगेन, जैना जीवन्ति भूतले ।
शक्तिं विना न जीवन्ति, दासा भवन्ति निर्बलाः ॥२१३॥

चतुर्विधस्य संघस्य, प्रत्यनीका भवन्ति ये ।
तेषां शिक्षणकार्येषु, मुक्तिर्जैनेन्द्ररागिणाम् ॥२१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनानां जैनधर्मस्य, शत्रूणां शिक्षणाय ये।
योग्यकर्म न कुर्वन्ति, ते स्यु र्मोहपरायणाः ॥२१५॥
जैनधर्मस्य शत्रूणां, दुर्गति र्दुःखराशयः।
जैनधर्मस्य रक्षातो, दुष्टानामपि सद्गतिः ॥२१६॥
प्रत्यहं श्रीजिनेन्द्रस्य, कर्तव्यं दर्शनं जनैः।
सद्गुरो र्दर्शनं कार्यं, वन्दनं च विवेकतः ॥२१७॥
चतुर्विधमहासंघ,-तीर्थस्य पूर्णरागतः।
दर्शनं वन्दनं कार्यं, वैयावृत्यं च सर्वदा ॥२१८॥
निन्दा कार्या कदाचिन्न, जैनैर्देवस्य सद्गुरोः
हेलना न च कर्तव्या, प्राणान्तेऽपि च धर्मिणाम् ॥२१९॥
सद्गुरुदेवधर्माणां, रागेण सद्गतिः कलौ।
भविष्यति मनुष्याणां, तत्र किञ्चिन्न संशयः ॥२२०॥
कलौ सरागधर्मस्य, प्रवृत्तिर्मोक्षकारिका।
भविष्यतिं च साधूनां, सरागधर्मवर्तनम् ॥२२१॥
जैनानां जैनधर्मस्य, रक्षायै च प्रवृद्धये।
देहवित्तादिसर्वस्य, त्यागः कार्यो विवेकतः ॥२२२॥
जैनानां जैनधर्मस्य, नाशकाश्च भवन्ति ये।
तेषां शिक्षा प्रकर्तव्या, जैनानां धर्म एव सः ॥२२३॥
मह्यां जीवन्ति सज्जैनाः सर्वजातिबलान्विताः।
निर्बला नैव जीवन्ति, भ्रष्टाः क्षात्रादिकर्मतः ॥२२४॥
राज्यकार्यादिनेतारः, क्षात्रव्यापारकर्मठाः।
कृषिकर्मादिभिर्जैना, जीवन्ति सर्वशक्तितः ॥२२५॥
सज्जैनैः सर्वखण्डेषु, यानवाहनयोगतः।
कर्तव्यं भ्रमणं सम्यग्, लोकोपदेशहेतवे ॥२२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सतीभिः सर्वखण्डेषु, यानवाहनयोगतः ।
जैनधर्मप्रचारार्थं, कर्तव्यं भ्रमणं सदा ॥२२७॥

श्राद्धदेवेन सर्वत्र, जैनसंस्कारहेतवे ।
कर्तव्यं भ्रमणं धर्म,–प्रेम्णा धर्मप्रचारिणा ॥२२८॥

साधूनां सेवया मुक्तिः, सर्वसंसारिणां भवेत् ।
सर्वधर्माधिकारोऽस्ति, साधूनां धर्महेतवे ॥२२९॥

आर्यानार्यप्रदेशेषु, धर्मसत्तादिहेतवे ।
कर्तव्यं गमनं जैनै, श्चतुर्वर्गप्रसाधकैः ॥२३०॥

आर्यजैनैः स्ववंशार्थं,सम्पाद्या संततिः शुभा ।
धर्मिपरम्परावृद्धि– हेतवे सर्वयुक्तिभिः ॥२३१॥

तीर्थस्थानेषु संघस्य, संमेलः प्रतिवत्सरम् ।
कर्तव्यो धर्मवृद्ध्यर्थं, तथा तीर्थस्य पूजने ॥२३२॥

जैनमन्दिरतीर्थानां, पूजा कार्या सुभावतः ।
तीर्थस्यसाधुवर्गस्य, सेवा कार्याऽतिरागतः ॥२३३॥

चन्दनाद्यैः शुभं चिन्हं, ललाटे विधिपूर्वकम् ।
सर्वजैनैः प्रकर्तव्यं, जिनाज्ञाप्रेमधारकैः ॥२३४॥

धर्मसंघादिरक्षार्थं, जैनानां शस्त्रधारणम् ।
सदा धर्माय विज्ञेयं, धर्म्ययुद्धे विवेकतः ॥२३५॥

संघाद्यैः सर्वथा विद्या, बलमाप्यं च युक्तितः ।
कृषिक्षात्रादिकर्माणि, कर्तव्यानि विवेकतः ॥२३६॥

जैनानां मृत्युतः, पश्चान्मुक्तिःस्वर्गो न संशयः ।
स्वीकर्तव्यो जनैर्नूनं, जैनधर्मः सनातनः ॥२३७॥

ब्रह्मविष्णुमहेशाद्या, देवा देव्यश्च सर्वथा ।
श्रीजिनेन्द्रप्रभोर्भक्ता, स्तरङ्गा इव वारिधेः ॥२३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाता अनन्ततीर्थेशा, भविष्यन्ति भवन्त्यपि।
अनन्त जैनधर्मस्य, सेवनाच्च प्रबोधनात् ॥२३९॥

सद्गुरोः कृपया भव्य, आत्मज्ञानी भवेज्जनः।
जैनधर्मी स विज्ञेयः, स्याद्वादज्ञानवेदकः ॥२४१॥

आगमनिगमव्यासो-जैनधर्मः सनातनः।
कलौ प्रवर्त्स्यतेति विश्वो-द्धारको मुक्तिदायकः ॥२४३॥

द्रव्यभावतया जैन-धर्मकर्म प्रवर्तनम्।
जैनधर्मः स विज्ञेयः, सर्वप्रगतिसाधकः ॥२४४॥

जिनानां दर्शनज्ञान-चारित्राणां प्रदायकः।
द्रव्यभावस्वरूपो यो-जैनधर्मः स उच्यते ॥२४५॥

जैनानामुन्नते र्हेतु-र्द्रव्यभावतया शुभः।
क्षेत्रकालानुसारेण, जैनधर्मः स उच्यते ॥२४६॥

जिनानां पूर्णविश्वासी, जैन आन्तरबाह्यतः।
तस्य यः स्वाधिकारोऽस्ति, जैनधर्मः स उच्यते ॥२४७॥

रागद्वेषादिदोषाणां, नाशको द्रव्यभावतः।
जैनधर्मःस विज्ञेयो जिनेन्द्रभक्तिपोषकः ॥२४८॥

दोषाणां नाशको योऽस्त, गुणानां च प्रकाशकः।
सर्वशक्तिप्रदो नृणां, जैनधर्मः स उच्यते ॥२४९॥

आत्मनि जैनधर्मोऽस्ति, बाह्यस्तु व्यवहारतः।
व्यवहारो न मोक्तव्यो-जैनसंघस्य रक्षकः ॥२५०॥

आत्मा शुद्धो भवेद्येन, सर्वशक्तिप्रकाशकः।
जैनधर्मः स विज्ञेयः, सद्गुरुदेवसाधनम् ॥२५१॥

जिनेन्द्रगुरुनिर्दिष्टा, विचाराचारराशयः।
देशकालोद्भवास्तेऽपि, जैनधर्मो मयोच्यते ॥२५२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनाना मस्तिता येन, भवेत्तद्व्यवहारतः ।
धर्मकर्तव्यरूपो यो- जैनधर्मः स उच्यते ॥२५३॥

चतुर्विधस्य संघस्य, वृद्धिरक्षाप्रवर्तकाः ।
जैनास्तेषां सदाचारो-जैनधर्मः स उच्यते ॥२५४॥

जीवानां माऽऽत्मवद् यस्मात्, दर्शनं च प्रवर्तनम् ।
परस्परं भवेद्येन, जैनधर्मः स उच्यते ॥२५५॥

दर्शनज्ञानचारित्र-गुणानां व्यक्तताऽऽत्मनि ।
जिनधर्मः स विज्ञेय-उपादानतया जनैः ॥२५६॥

दर्शनज्ञानचारित्र-गुणानां व्यक्तहेतुकः ।
व्यावहारिकधर्मोऽस्ति, ज्ञेयो निमित्तयोगतः ॥२५७॥

स्वार्थत्यागेन, जीवाना-मुपग्रहस्य कर्मसु ।
प्रवृत्ति स्तद्विचारश्च, जैनधर्मो मयोच्यते ॥२५८॥

स्वातंत्र्यं सर्वलोकानां, धर्मराज्यस्य पालनम् ।
आत्मभोगश्च विश्वार्थं, जैनधर्मः स गीयते ॥२५९॥

सर्वदेशेषु जैनाना-मस्तित्वं च प्रवर्धनम् ।
भवेद्येनाऽऽत्मभोगेन, जैनधर्मः स गीयते ॥२६०॥

स्वाध्यायश्च तपःपूजा, साधर्म्यभक्तिहेतवः ।
सम्यक्त्वं सत्यचारित्रं, जैनधर्मः स गीयते ॥२६१॥

जैनधर्मस्य रक्षाया मुत्सर्गेणापवादतः ।
चतुर्विधेन संघेन, वर्तितव्यं सदा मुदा ॥२६२॥

जैनधर्मस्य रक्षायां, धर्मोभवति देहिनाम् ।
महान्हि तीर्थकृन्नाम-बन्धो भवति देहिनाम् ॥२६३॥

जैनानां संकटे प्राप्ते, ये भवन्ति सहायकाः ।
ते पराऽऽत्मपदं यान्ति, पुण्यानुबन्धकारकाः ॥२६४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनात्मा सद्गतिं याति, यादृशस्तादृशोऽपि सः।
जैनसंस्कारयुक्तानां, जायते सर्वथोन्नतिः ॥२६५॥
जिनेन्द्रो हृदि जैनानां, परीणामेन विद्यते।
ततस्तेषां पवित्रत्वं, विश्वपावित्र्यकारकम् ॥२६६॥
जैनाऽऽत्मैव परब्रह्म, मनोदेहनियामकः।
अन्तर्यामी वपुःसृष्टौ, तस्मै नित्यं नमोनमः ॥२६७॥
तीर्थंकरप्रभोः पश्चात्, जैनधर्मप्रवर्तकाः।
धर्माचार्या द्विधा ज्ञेया–गृहित्यागिद्विभेदतः ॥२६८॥
जैनधर्मस्य साम्राज्ये, विद्यमाने तु भूतले।
सत्या विश्वोन्नति र्भूया, च्छान्तिश्च सर्वभूतले ॥२६९॥
तादृक्छान्तिर्न केनाऽपि, वर्त्ततेऽतो जनैः सदा।
जैनधर्मसदाचारः, पालनीयः प्रयत्नतः ॥२७०॥
अल्पदोषं महाधर्मं, ज्ञात्वा जैनैर्विवेकतः।
जैनधर्मोन्नतेः कार्यं, कर्तव्य माऽऽत्मभोगतः ॥२७१॥
जैनधर्मस्य सेवायां, महिंसैव स्वकर्मतः।
अहिंसाप्यन्यथा हिंसा, जैनानां स्वत्वनाशिनी ॥२७२॥
पुरुषाणां च नारीणां, तुल्यत्वं सर्वकर्मसु।
सर्वजातिमनुष्याणा–मुच्चत्वं न च नीचता ॥२७३॥
सर्वदेशीयलोकानां, राष्ट्रादिसर्वकर्मणाम्।
व्यवहारे समानत्वं, स्वातंत्र्यं च समं भुवि ॥२७४॥
स्वातंत्र्यमेव धर्मोऽस्ति, सर्वदेशमनीषिणाम्।
जैनधर्मो मया प्रोक्तो–व्यक्तिस्वातंत्र्यरक्षकः ॥२७५॥
सर्वखण्डस्थलोकानां, रक्षणं सर्वशक्तितः।
जैनधर्मो मया प्रोक्तस्तथा पश्वादिरक्षणम् ॥२७६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यायक्रौर्यनाशेन, विश्वस्य शान्तिरक्षणम् ।
सर्वत्र सर्वं जैनानां, जैनधर्मस्य लक्षणम् ॥२७७॥
नारीभिश्च नरैः प्रीत्या, कर्तव्यं वीर्यरक्षणम् ।
वीर्यरक्षण मप्यस्ति, जैनधर्मः सुखावहः ॥२७८॥
ब्रह्मचर्याश्रमे बालाः संपाद्या ऊर्ध्वरेतसः ।
प्राणायामादिभिर्भव्याः-कर्तव्याः कर्मयोगिनः ॥२७९॥
सर्वदेशेषु रोगाणां, नाशार्थमौषधालयः ।
स्थाप्यो वैद्यप्रबन्धेन, तथा ज्ञानालयः शुभः ॥२८०॥
पशूनां पक्षिणां रोग-नाशार्थं मौषधालयः ।
कर्तव्यः सत्प्रबन्धैश्च, सर्वत्र विश्वयोगिभिः ॥२८१॥
दुष्टानां संगतिस्त्याज्या, चौरा दण्ड्याश्च हिंसकाः ।
राज्यनीतिप्रबन्धेन, वर्तितव्यं जगज्जनैः ॥२८२॥
अहिंसा सर्वखण्डेषु, प्रतिष्ठाप्याऽऽत्मभोगतः ।
आत्मसंघादिरक्षाया, महिंसैव स्वभावतः ॥२८३॥
आत्मवत्सर्वलोकेषु, वर्तनं जैनधर्मिभिः ।
कर्त्तव्यं जैनधर्मोऽस्ति, सत्यं मया प्रकाशितम् ॥२८४॥
षडावश्यककर्माणि, कर्तव्यानि सुभावतः ।
वात्सल्यं सर्वसंघस्य, कर्तव्य माऽऽत्मभोगतः ॥२८५॥
अन्यधर्मिवितर्कैस्तु, चलितव्यं नचाऽऽर्हतैः ।
स्थातव्यं न सदा जैनै-र्गीतार्थसद्गुरुं विना ॥२८६॥
सतां सेवा सदा कार्या, शुद्धाऽऽत्मध्यानयोगिनाम् ।
तिरस्कारो न कर्तव्यः, सतां मोहस्य चेष्टितैः ॥२८७॥
माता पिता कलाचार्यः, सद्गुरुश्च सुभक्तितः ।
सेव्यः शक्त्यनुसारेण, भोजनादिप्रबन्धतः ॥२८८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विश्वस्थसर्वधर्मा ये, जैनधर्मे प्रमान्ति ते
जैनधर्माङ्गभूतास्यु: सर्वधर्मा अपेक्षया ॥ २८९ ॥

शुद्धाऽऽत्मधर्म एवास्ति, जिनधर्मः सुखोदधिः
शुद्धाऽऽत्मधर्मसाध्याय, जैनधर्मोऽस्तिसाधनम् ॥२९०॥

स्वाऽऽत्मैव जैनधर्मोऽस्ति, स्वधर्मो मोक्षदायकः
जडद्रव्यस्थितोधर्मः, आत्मभिन्नःस्वभावतः ॥२९१॥

मोहादिप्रकृतेर्धर्मो, वैभाविकोऽस्ति बोधत
आत्मशुद्धिकराःसर्वे, धर्माः सत्या अपेक्षया ॥२९२॥

सर्वदर्शनधर्माणां, सत्यत्वं नयदृष्टितः
जैनदर्शनसद्धर्मं, जानन्त्येवं विचक्षणाः ॥२९३॥

मुक्त्यर्थं मोहनाशार्थं, चाऽऽत्मनःशुद्धिहेतवे
भूता ये च भविष्यन्ति, जैनधर्माङ्गरूपिणः ॥२९४॥

स्वधर्मा जैनधर्मास्ते, सापेक्षयैव बोधत
साधिते जैनधर्मे ते, सर्वे धर्माः प्रसाधिताः ॥२९५॥

यथाऽब्धौ सरितो यान्ति, जैनधर्मं प्रति स्वयम्
सर्वधर्मास्तथा यान्ति, सर्वधर्ममयः स च ॥२९६॥

परस्परप्रभिन्नानां, धर्माणां धर्मिणां तथा
द्वेषश्च खण्डनं नैव, कर्तव्यं सर्वधर्मिभिः ॥२९७॥

सर्वधर्मस्य सत्यांशा-ग्राह्या सापेक्षदृष्टितः
सर्वधर्मस्वरूपोऽस्ति, जैनधर्मः सनातनः ॥२९८॥

अभ्यागतस्य सन्मानं, दुःखार्त्तानां च पालनम् ।
बालस्त्रीसाधुसंघस्य, रक्षणं स्वीयशक्तितः ॥२९९॥

चतुर्विधस्य संघस्य, तथा धर्माधिकारिणाम् ।
ऋषीणां हेलना नैव, कर्तव्या धर्मसाधकैः ॥३००॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहंकारो न कर्तव्यो–वक्तव्यं न च दुर्वचः ।
मंत्रभेदो न कर्तव्यः, प्राणान्तेऽपि सदा जनैः ॥३०१॥

मित्रद्रोहो न कर्तव्यः, सत्यं वाच्यं च सज्जनैः ।
देशद्रोहो न कर्तव्य,–आत्मनो भूतिमिच्छता । ॥३०२॥

आत्मवज्जननी भूमि–र्मातृभाषा स्वतंत्रता ।
पूज्या रक्ष्या च सत्प्रेम्णा, मानवैराऽऽत्मभोगतः ॥३०३॥

गुणाः सर्वत्र संग्राह्या–दोषा वाच्या न देहिनाम् ।
सद्विद्या सर्वतो ग्राह्या, कर्तव्या गुणसाधना ॥३०४॥

यथोचितं सुपात्रेभ्यो,–दानं देयं स्वशक्तितः ।
वस्त्रान्नज्ञानदानेन, स्वर्गो मुक्तिश्च जायते ॥३०५॥

ज्ञानवृद्धि र्जनैः कार्या, ज्ञानविद्यालयादिभिः ।
साहाय्यं ज्ञानिनां कार्यं, मन्नवस्त्रादिभिर्जनैः ॥३०६॥

त्याज्यानि पापकर्माणि, पुण्यं कार्य जनैः सदा ।
आपद्धर्मो जनैः सेव्य–आपत्काले विशेषतः ॥३०७॥

परोपकारकर्तॄणां, प्रत्युपग्रहकर्मसु ।
स्थातव्य माऽऽत्मभोगेन, जनैर्धर्मपरायणैः ॥३०८॥

महावीरजिनेन्द्रस्य, जैना धर्मस्य साधकाः ।
भविष्यन्ति कलौ धर्म,–दीपका ज्ञानियोगिनः ॥३०९॥

जैनसंघप्रगत्यर्थं, सर्वस्वार्पणकारकाः ।
भविष्यन्ति कलौ जैना–ज्ञानधर्मेण राजिताः ॥३१०॥

एकदा सर्वखण्डेषु, जैनधर्मप्रचारणा ।
भविष्यति कलौ नूनं, विश्वैक्यशांतिकारिका ॥३११॥

महावीरस्य सद्भक्त्या, लोकानां सद्गतिः कलौ ।
अरिष्टनेमिनाथेन, सर्वज्ञेन प्रकाशिता ॥३१२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महावीरस्य जापेन, जनानां सद्गति ध्रुवम् ।
वीरजापसमो यज्ञो,-कलौ नान्यो भविष्यति ॥३१३॥
भवन्ति सर्वजातीया-जैना एव जिनाः स्वतः ।
कलौ जैनस्य पूजैव, जिनपूजाऽस्ति सत्तया ॥३१४॥
कलिकाले करालेऽपि, महावीरस्य भक्तितः ।
सर्वखण्डस्थिताजैना-यास्यन्ति स्वर्गसद्गतिम् ॥३१५॥
महावीरप्रभोर्नाम,-जापकार्यपरायणाः
यादृशास्तादृशाजैना-यास्यन्ति स्वर्गसद्गतिम् ॥३१६॥
कलिकालानुसारेण, वर्णावर्णव्यवस्थिताः ।
महावीरस्य जापेन, लोका यास्यन्ति सद्गतिम् ॥३१७॥
कलिकाले महाघोरे,महावीरः स्वबोधतः ।
तारकः सर्वविश्वस्य, भविष्यति न चान्यथा ॥३१८॥
ज्ञानक्रियायुता जैनाः, सर्वविश्वस्य तारकाः ।
भविष्यन्ति महावीर,-जापेन पञ्चमारके ॥३१९॥
महावीरस्य सत्प्रीत्या, सद्गतिः सर्वदेहिनाम् ।
अरिष्टनेमिना प्रोक्तं, कलौ सत्यं भविष्यति ॥३२०॥
नयनिक्षेपसद्भङ्गैः, प्रमाणैश्च प्रतिष्ठितः ।
जैनधर्मोऽस्तु लोकानां, सर्वदा शरणं महत् ॥३२१॥
जैनधर्मसमो धर्मो,-न भूतो न भविष्यति ।
सर्वजातीयलोकानां, तारको मोहवारकः ॥३२२॥
अरिष्टनेमिबोधेन, जातोऽन्तराऽऽत्मवान्प्रभुः ।
ज्ञापयामि जगल्लोकान्, जैनधर्मं सनातनम् ॥३२३॥
अरिष्टनेमिनाथस्य, पश्चात्पार्श्वप्रभोः शुभम् ।
शासनं वर्त्स्यति व्यक्तं, भारते लोकतारकम् ॥३२४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः श्रीमन्महावीर–शासनं पञ्चमारके ।
वर्त्स्यंति सर्वलोकानां, तारकं दुःखवारकम् ॥३२५॥
अरिष्टनेमिनाथोक्त–मन्यथा नैव जायते ।
भारते वासुदेवेन, मया सत्यं प्रकाशितम् ॥३२६॥
मयोक्ता वासुदेवेन, गीता सत्यसनातना ।
परम्पराप्रवाहेण, कलावपि प्रवर्त्स्यंति ॥३२७॥
कलौ वीरस्य गीतायाः, समा नान्या भविष्यति ।
मद्गीतायाः समावेशा–स्तत्र नूनं भविष्यति ॥३२८॥
शुद्धाऽऽत्मा नेमिनाथोऽस्ति, केवलज्ञानभास्करः
अन्तराऽऽत्मैव कृष्णोऽस्ति, भावितीर्थंकरो महान् ॥३२९॥
शुद्धाऽऽत्मैव महावीर–स्तीर्थकृत्परमेश्वरः
आत्मैव परमाऽऽत्मास्ति, सत्तया सर्वदेहिनाम् ॥३३०॥
आत्मनः परमाऽऽत्मत्व,–प्राकट्यार्थं मनीषिणाम्
जैनधर्मोपदेशोऽयं, वासुदेवेन भाषितः ॥३३१॥
पठन्ति कृष्णगीतां ये, शृण्वन्ति पाठयन्ति च
स्वर्गं मुक्तिं च ते यान्ति, लभन्ते सर्वमङ्गलम् ॥३३२॥
सर्वमङ्गलमाङ्गल्यं, सर्वकल्याणकारणम् ।
प्रधानं सर्वधर्मेषु, जैनं जयतु शासनम् ॥३३३॥

ॐ अर्हंशान्तिः ३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only